THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

No's. 481, 482, 483, 484, 485.

THE

PRAKRITA VYĀKARAṆA VRITTĪ

WITH TEXT

OF

SRĪ TRIVIKRAMA DEVA

Edited with Introduction, Indices, Appendices etc., by

SĀHITYĀCHĀRYA

Pt. Sri Jagannatha S'astri Hoshing

PUBLISHED BY

JAYA KRISHNA DAS HARI DAS GUPTA

The Chowkhambā Sanskrit Series Office,

Vidya Vilas Press, Banaras.

भूमिका

नाविदितं खलु विपश्चिदपश्चिमानां संस्कृतसाहित्यरसिकानां सहृदयधुरीणानां यत्—प्राकृतं नाम किमपि वाङ्मयं लोके बहुलप्रचारमासीत् पुरा भारते वर्षे। वाङ्मयमात्रं हि लक्ष्यलक्षणभेदेन द्वैविध्यं भजति। तत्र हि प्रायो लक्ष्यरूपतामावहन्ति काव्यनाटकप्रबन्धाद्या ग्रन्थाः। व्याकरणाद्यनुशासनानि पुनर्लक्षणग्रन्थरूपेण प्रसिद्धिमुपयान्ति सर्वत्र। 'मुखं व्याकरणं स्मृत'मिति स्फुटं प्रतिपादयता भगवता श्रीमता पाणिनिमुनिना शिक्षायां वेदपुंसः षडङ्गेषु व्याकरणस्य मुखत्वं निरूप्य सर्वस्यैव वाक्प्रपञ्चनिचयस्य मूलं व्याकरणं नाम समुद्घोषितम्। को नाम सचेता नाभ्युपेयादिमं विषयम्। यतो हि व्याकरणज्ञानमन्तरा शब्दसाधुत्वपरिचायकं नान्यत् किमपि लोके लोकलोचनातिथितां प्रयाति। अत एव प्रत्येकस्या भाषाया विद्वत्सम्मताया व्याकरणमुपलभ्यत एव। पूर्वैर्भारतीयैः सूरिभिः संस्कृतप्राकृतदेशीभेदेन भाषायास्त्रैविध्यमुद्घोषितम्। संस्कृतवाङ्मयं हि वैदिकं लौकिकं चेति द्विविधतां भजति। वैदिकलौकिकोभयविधभाषानुबद्धसिद्धान्तप्रतिपादकत्वात् पाणिन्यनुशासनस्य सुशकं वेदाङ्गत्वस्थापनम्। आस्तामिदमप्रस्तुतप्रवाहपतनम्। यथा हि संस्कृतवाङ्मयस्य पाणिन्यादिव्याकरणग्रन्था उपकर्तारस्तथा तत्तद्भाषासौन्दर्यपरिरक्षणाय विशिष्टैर्विद्वद्भिर्निर्मिता व्याकरणप्रबन्धाः सन्त्येव भाषाणामन्यासामपि। वाल्मीकिवररुचिभामहादिप्रणीताः शब्दसाधुत्वसम्पादकाः समुपलभ्यन्ते बहवः प्राकृतभाषाया अपि व्याकरणग्रन्थाः। तदन्तःपातितया प्रसिद्धमेकं प्राकृतभाषाव्याकरणपुस्तकमभिलक्षीकृत्य किञ्चित्समीहामहे वक्तुम्।

प्राकृतव्याकरणनिर्मातृषु को वा श्रीत्रिविक्रमदेवं विस्मर्तुं शक्नुयात्। केचित् सूत्रकाराः, केचिच्च व्याख्याकाराः, केचन च सूत्रव्याख्याकाराः सर्वत्र समुपलभ्यन्ते दृग्गोचरतामुपगताः। अस्माकं श्रीत्रिविक्रमदेवस्तु स्वयं सूत्राणि प्रणीय व्याख्यां च तेषां सोदाहरणां निरमादित्यस्ति तस्मिन् लक्ष्यलक्षणोभयवेत्तृत्वमिति स्पष्टम्। स च ग्रन्थः 'प्राकृतव्याकरणवृत्ति'रिति 'प्राकृत-

सूत्रवृत्ति'रिति वा समुल्लसन्नाम्ना ससूत्रः साम्प्रतं संमुद्य प्रकाश्यते । यदाधारेणैतत्पुस्तकस्य प्रकाशनमभूत्तत्पुस्तकद्वयं स्वर्गतानां "लद्दू" वंश्यानां कृष्णात्मजानां तुकारामशर्मणामेव, तेषु दिवङ्गतेषु तदीयवस्तुविक्रयप्रसङ्गे तत्रोपस्थाय पुस्तकावाप्तिलाभलोभेन श्रीमद्भिः प्राचीनसंस्कृतपुस्तकप्रकाशकैः चौखम्बासंस्कृतमालाविद्याविलासयन्त्रालयाध्यक्षैः श्रीजयकृष्णदासमहोदयैर्द्वित्राणि पञ्चषाणि वा पुस्तकानि क्रीतानि । अनन्तरं कदाचिदेकस्यैव ग्रन्थस्य पुस्तकद्वयं विचार्य प्रचिकाशयिषया ते श्रेष्ठिमहोदयाः कार्यमिदं मह्यं समर्प्य मां प्रोदसाहयन् । आधारभूतं पुस्तकद्वयमपि नवीनमेव प्रायश्च सुस्पष्टाक्षरं शुद्धं च । १०½" × ८½" रूपेण लम्बाकारं २५९ पृष्ठात्मकं (क) संज्ञया स्थापितम् ; अन्यच्च तंजोरपुस्तकालयस्थपुस्तकप्रतिलिपीभूतम् ८" × ६" एतदाकारात्मकं २०६ पृष्ठात्मकं (ख) संज्ञितम् । मुद्रिते च प्रथमाध्यायस्य कियतिचन भागे 'सरस्वतीभवनपुस्तकालय'स्थं ग्रन्थप्रदर्शिन्यां मुद्रितं समुपलभ्य (ग) संज्ञयैकं पुस्तकमत्र सङ्केतितम् । एवं पुस्तकमिदं बहोः कालात् पूर्वं मुद्रितमपि नाद्य यावत् प्राकाश्यमभजदुपोद्घातमन्तरा । उपोद्घातादिलेखने 'प्राकृतभाषा, ग्रन्थेतिहासा'दि सर्वं सावकाशं संगृह्य विलिख्येतेत्युत्तरमदायि प्राच्यप्रतीच्योभयविधविद्यानदीष्णैरस्मदभिन्नसुहृद्भिः काशीस्थहिन्दूविश्वविद्यालयाध्यापकैः श्रीबटुकनाथशर्मभिः 'एम्० ए०', 'साहित्याचार्य' पदवीभृद्भिरस्मत्प्रार्थितैः । परं दैवदुर्घटया कृततद्विषयकसंग्रहा अपि तेऽकाल एवास्मान् परित्यज्य देवभूयत्वं गताः । तदनन्तरं च तत्कृपापात्रभूताः साहित्याचार्य, एम्० ए० पदभाजो वाराणसेयहिन्दूविश्वविद्यालयाध्यापकाः श्रीबलदेवशर्माण उपाध्यायाः प्रार्थिताः । अङ्गीकृतप्रार्थना अपि ते कार्यान्तरासक्ततया व्याध्यादिनैकविधबाधाकुलिता नाशकन् तत्कार्यं पूरयितुम् । दशवत्सरेभ्यः पूर्वं मुद्रितस्य ग्रन्थस्य शीघ्रप्रकाशनाय पुनर्मां प्रेरयन्तो विद्याविलासमुद्रणालयाधिपतयोऽभ्यर्थयन् । अतः कर्मण्यस्मिन् ममैव प्रवर्तनम् । प्रकाशनावसरेऽस्मत्प्रियसुहृद्भिः साहित्याचार्यैः, साहित्यवारिधिभिः, साम्प्रतं वाराणसेयराजकीयमहाविद्यालयप्रधानाध्यक्षचरैर्महामहोपाध्यायपदभृद्भिः श्रीनारायणशास्त्रिखिस्तेमहोदयैः प्रदत्तं स्वीयमेकं टिप्पणीरूपं संक्षिप्तमपूर्णं पुस्तकमपि समये समये साहाय्य-

मातनोदिति सुहृद्वर्याः कथङ्कारं विस्मर्तुं शक्यन्ते। अस्तु तावत्; पुस्तकमिदमध्यायत्रयात्मकम्, तत्र प्रत्यध्यायं चत्वारः पादाः। सूत्राणि पुनः प्रथमेऽध्याये ३८६ सन्ति। ५४, १०९, १०५, १२१—इति क्रमेण पादचतुष्टयसंख्या। द्वितीयेऽध्याये ७७, ९२, ४२, १५७—इति पादक्रमेण ३६८ सूत्राणि। तृतीये पुनरध्याये १३३, ६७, ५८, ७१—इति चतुर्णां पादानां क्रमेण ३२९ सूत्राणामुपलब्धिर्दृश्यते। सङ्कलनया च १०८६ सूत्रसंख्या पूर्णा भवति।

श्रीत्रिविक्रमदेवोपज्ञेऽमुष्मिन् व्याकरणग्रन्थे पूर्वमेकादश पद्यानि, ततः सूत्रव्याख्योदाहरणादि सन्दृब्धं वर्तते। प्रारम्भिकपद्यपर्यालोचनया किमपि किञ्चिदैतिहासिकं तत्त्वमुद्बुद्धं भवति। प्रथमं पद्यं श्रीवीरप्रणामात्मकं मङ्गलरूपेण भासमानमपि शिष्टाचारपरम्परामक्षुण्णां द्योतयति। अयं हि श्रीत्रिविक्रमदेवः स्वीयं गुरुं श्रीमदर्हनन्दित्रैविद्यमुनिं, पितामहं श्रीबाणसुकुलवंशीयमादित्यव(श)र्माणं, पितरं श्रीमल्लिनाथं, मातरं लक्ष्मीं, भ्रातरं च वृत्तविद्याधामानं श्रीभामं द्वितीयतृतीयपद्याभ्यां निर्दिशन् स्वं च सुकविं परिचाययति। अथायमार्यश्रीवीरसेन-जिनसेनयोर्वचनकदम्बकमनुसृत्यै-तदरचयदिति सम्प्रदायशुद्धिं जैनधर्मप्रेमाणं च प्रादर्शयत्। प्राकृतवाङ्मयस्य सुखोच्चारणत्वं प्राकृतस्य च तत्समतद्भवदेश्यभेदेन त्रैविध्यमुपपाद्य तत्समस्य संस्कृतसमस्य संस्कृतलक्ष्मणा व्युत्पत्त्यादिकं ज्ञेयमिति, देश्यस्य पुनरार्षत्वमङ्गीकृत्य तस्य स्वतन्त्रतया रूढतया च साम्प्रदायिकत्वेन तद्द्वयमुपेक्ष्य तद्भवानां शब्दसाधुत्वप्रकारः प्रदर्श्यत इति पञ्चमषष्ठसप्तमाष्टमपद्यैः स्पष्टं प्रतीयते। नवमेन च पद्येन स्वनिर्मितसूत्राणां स्वयमेव वृत्तिं विरचयाम्यागमक्रमेणेति तस्य स्फुटोक्तिः। स्ववृत्तेर्दर्पणसाम्यं पद्येन दशमेन सूचितवान्। प्राकृतरूपाणां विवरणं यथा श्रीहेमचन्द्राचार्यादारभ्य प्राचीनैः कृतं तथैवात्रापीति प्रतिपादयत्येकादशं पद्यम्। ग्रन्थान्तेऽपि पद्यत्रयमुपलभ्यते। तत्र प्रथमेन त्रैविक्रमव्याकरणमाद्रियतेति, द्वितीयेन स्वनिर्मितकाव्यप्रशंसनं, स्वपराशयसंवादिकथासु त्रिविक्रम एवैकः, स्वाभिप्रायप्रकाशकास्तु सर्व एव भवन्तीति तृतीयेन प्रत्यपादयत्।

भारतवर्षीयपण्ढरपुराऽभिजनो लड्डूवंश्यः कृष्णात्मजस्तुकारामशर्मा

श्रीत्रिविक्रमदेवनिर्मितव्याकरणग्रन्थमिममाश्रित्य शार्मण्यभाषायां निबन्धमेकं विलिख्य प्रकाश्य च "डाक्टर" पदवीमवाप्तवान्। "Prolegomena Zu Trivikrama's Prakrit-Grammatik." Von Dr. T. Laddu, Aus Pandharpur, Indien, Ed. in 1912. इति तत्पुस्तकपरिचयः। शार्मण्यदेशीयानां भाषामजानन्तो वयं न तस्मात्किमप्येतस्मिन् विषये साहाय्यमलभामहि। परं मङ्गलपद्ये 'श्रीवीरं', द्वितीये "वर्मणः पौत्रः" इत्यस्य स्थाने "शर्मणः पौत्रः" इति, प्रस्तुतपुस्तके एकादशे पद्ये "प्राच्यैराहेमचन्द्रास्यात्" इति पुस्तकद्वयादर्शभूताधारेण मुद्रितस्य स्थाने "प्राच्यैरा हेमचन्द्रार्यात्" इति च पाठान्तरमुपलभ्य कथं न तत्पुस्तकलेखकस्य विभ्रम उपकारभारमिति "डा० टी० के० लड्डू, बी० ए०, पी० एच्० डी०" महोदया अपि स्मर्यन्ते।

एतत्सम्बन्धेन कदाचिदवकाशसमये वाराणसेये राजकीये 'सरस्वतीभवन'पुस्तकालये श्रीमदाफ्रेक्टमहोदयीये महति सूचीपत्राणां सूचीपत्रेऽधस्तान्निर्दिष्टानि प्राकृतव्याकरणग्रन्थरत्नानि नेत्रगोचरतामुपगतानीति तथा पुरस्तात् समुपस्थाप्यन्ते।

१ प्राकृतसूत्राणि—वाल्मीकिः
२ ,, कल्पतरुः—रामतर्कवागीशः
३ ,, कामधेनुः—लङ्केश्वरः
४ ,, कौमुदी—(?)
५ ,, चन्द्रिका (मनोरमैव)—भामहः
६ ,, ,,—कृष्णपण्डितः=शेषकृष्णः
७ ,, दीपिका—चण्डीदेवशर्मा
८ ,, नामलिङ्गानुशासनम्—(?)
९ ,, पादः—नारायणः
१० ,, प्रकाशः—वररुचिः
११ ,, प्रक्रियावृत्तिः—उदयसौभाग्यगणिः
(हेमचन्द्रकृतप्राकृताध्याये)

१२ प्राकृतप्रदीपिका—(?)

१३ ,, प्रबोधः—नरचन्द्रः (हेमचन्द्रकृतप्राकृताध्याये)

१४ ,, भाषान्तरविधानम्—चन्द्रः (?)

१५ ,, मणिदीपः—अप्पयदीक्षितः

१६ ,, मञ्जरी—कात्यायनः

१७ ,, रहस्यम् (षड्भाषावार्तिकं वा)—(?)

१८ ,, रूपावतारः – सिंहराट् (समुद्रबन्धवडबसुतः)

१९ ,, लक्षणम्—चण्डः

२० ,, व्याकरणम्—समन्तभद्रः

२१ ,, व्याकरणवृत्तिः— } त्रिविक्रमदेवः
,, सूत्रवृत्तिर्वा ससूत्रा— }

२२ ,, सञ्जीवनी—वसन्तराजः

२३ ,, सर्वस्वम्—हेमचन्द्रः

२४ ,, सर्वस्वम्—मार्कण्डेयकवीन्द्रः

२५ ,, सुबोधिनी—सदानन्दः

२६ ,, संस्कारः—(?)

२७ प्राकृतानन्दः—रघुनाथशर्मा

२८ प्राकृताष्टाध्यायी—(?)

२९ षड्भाषाचन्द्रिका—भामकविः

३० ,, ,, —लक्ष्मीधरः

३१ षड्भाषामञ्जरी— ,,

समुपलभ्यमानेष्वेतेष्वेकत्रिंशत्पुस्तकनामसु तत्तत्पुस्तकमुद्रणोपक्रमे तदितिहासप्रकाशं विदध्युरेव संशोधकाः विद्वांसः। एतदतिरिक्तमप्येकं नाम तत्रैव प्रकरणे 'प्राकृतपिङ्गल'मिति दृष्टं, परं प्रायस्तच्छन्दोविषयकं स्यादिति मत्वास्माभिरुपेक्षितम्। तदिदं प्राकृतं मागधी-शौरसेनी-पैशाची-महाराष्ट्रीत्यादिभेदेन षड्विधमिति षड्भाषाचन्द्रिकादिपुस्तकदर्शनादनुमीयते । नैतस्मिन् विषये प्रपञ्च्यतेऽधिकम् ।

किञ्च श्रीहेमचन्द्राचार्योऽपि क्वचित्स्थले समुल्लिखितवान् श्रीश्रुतसागर-प्रणीतमौदार्यचिन्तारत्नाभिधं पुस्तकमेकं प्राकृतभाषीयम्। "प्राकृतप्रकाश-प्राकृतमञ्जरी"स्थानि सूत्राणि समानानि। "प्राकृतव्याकरणवृत्ति-षड्भाषा-चन्द्रिकयोः" सूत्राणि समानतामावहन्त्यपि पूर्वस्माद्भिन्नानि। सिद्धहेम-शब्दानुशासनाख्यहेमचन्द्रव्याकरणस्य तु भिन्नान्येव सन्ति सूत्राणि।

मुद्रिते चाऽस्मिन् पुस्तके श्रीत्रिविक्रमदेवोपज्ञे ससूत्रवृत्तिके प्राकृत-व्याकरणरूपे-१ सूत्राष्टाध्यायी, २ सूत्रानुक्रमणिका, ३ प्राकृतसूत्रवृत्तिगत-पद्यानुक्रमणी, ४ प्राकृतशब्दानुक्रमणिका, ५ शुद्धिपत्रं चेति पञ्च विषयाः संगृह्य निवेशिताः सन्ति। तदिदं पुस्तकं विदुषां प्रेमपात्रं स्यादेवेति बाढं विश्वसिमः।

पराधीने भारते मुद्रितचरमप्येतत्पुस्तकं सम्प्रति भूमिकासम्भूषितं सत् स्वाधीने भारतवर्षे प्राकाश्यमुपगच्छतीति सर्व एव भारतीयाः प्रसन्नाः स्युरेव। प्राकृतभाषादिसम्बन्धेन षड्भाषाचन्द्रिकासम्पादका इतरेऽपि केचन समालोचितवन्तः। केचनाऽन्येपि तदर्थं प्रयतमानाः सन्ति विद्वांस इति मौनमेव समाश्रीयतेऽस्माभिरत्र विषये।

यदनुग्रहेण वाङ्मयस्य सेवनेऽभिरुचिस्तत्प्रवृत्त्यभिमुखी मतिश्च सम-जायत, तं परमेशानं, "गुरुर्ब्रह्मा"-इत्यादिवचनकदम्बसमुद्घोषितं म० म० पं० श्रीलक्ष्मणशास्त्रितैलङ्ग, साहित्याचार्यश्रीभालचन्द्रशास्त्रिमानवल्लीस्वरूपं गुरुद्वयात्मानं परमं देवं च स्मारं स्मारं विरमाम्यमुष्मात् प्रस्तावनालेखन-व्यापारादिति शिवम्।

विदुषां वशंवदः—
श्री जगन्नाथशास्त्री होशिङ्गः
(साहित्याचार्यः)

वाराणसी नगरी,
कार्तिकशुक्लैकादशी,
सं० २००७

प्राकृतसूत्राध्यायत्रयी ।

प्रथमाध्याये—

प्रथमः पादः ।

द्वितीयः पादः ।

तृतीयः पादः ।

द्वितीयाध्याये—

प्रथमः पादः।

द्वितीयः पादः।

तृतीयाध्याये-

प्रथमः पादः ।

द्वितीयः पादः ।

समाप्ता चेयं प्राकृतसूत्राध्यायत्रयी ।

॥ श्रीः ॥

श्रीत्रिविक्रमदेवनिर्मिता

ससूत्रा

प्राकृतव्याकरणवृत्तिः ।

श्रीवीरप्राच्याचलसमुदितमखिलप्रकाशकं वन्दे ।
दिव्यध्वनिपटुदीधितिमहस्सद्वरपद्धतिप्राप्त्यै ॥ १ ॥
श्रुतभर्तुरर्हनन्दित्रैविद्यमुनेः पदाम्बुजभ्रमरः ।
श्रीब्राह्मणकुलकमलद्युमणेरादित्यवर्मणः पौत्रः ॥ २ ॥
श्रीमल्लिनाथपुत्रो लक्ष्मीगर्भामृताम्बुधिसुधांशुः ।
भामस्य वृत्तविद्याधाम्नो भ्राता त्रिविक्रमः सुकविः ॥ ३ ॥
श्रीवीरसेनजिनसेनार्यादिवचःपयोधिपूरात् कतिचित् ।
प्राकृतपदरत्नानि प्रकृतिकृती सुकृतिभूषणाय चिनोति ॥ ४ ॥
अनल्पार्थः सुखोच्चारः शब्दसाहित्यजीवितम् ।
स च प्राकृतमेवेति मतं सूत्रानुवर्तिनाम् ॥ ५ ॥
प्राकृतं तत्समं देश्यं तद्भवं चेत्यदस्त्रिधा ।
तत्समं संस्कृतसमं नेयं संस्कृतलक्ष्मणा ॥ ६ ॥
देश्यमार्षं च रूढत्वात् स्वतन्त्रत्वाच्च भूयसा ।
लक्ष्म नापेक्ष्यते तस्य सम्प्रदायो हि बोधकः ॥ ७ ॥
प्रकृतेः संस्कृतात्साध्यमानात् सिद्धाच्च यद्भवेत् ।
प्राकृतस्यास्य लक्ष्यानुरोधि लक्ष्म प्रचक्ष्महे ॥ ८ ॥
प्राकृतपदार्थसार्थप्राप्त्यै निजसूत्रमार्गमनुजिगमिषताम् ।
वृत्तिर्यथार्थसिद्ध्यै त्रिविक्रमेणाऽऽगमक्रमात् क्रियते ॥ ९ ॥
तद्भवतत्समदेश्यप्राकृतरूपाणि पश्यतां विदुषाम् ।
दर्पणतयैवमवनौ वृत्तिस्त्रैविक्रमी जयति ॥ १० ॥

प्राकृतरूपाणि यथा प्राच्यैराहेमचन्द्रास्यात् ।
विवृतानि तथा तानि प्रतिबिम्बन्तीह सर्वाणि ॥ ११ ॥

सिद्धिर्लोकाच्च ॥ १ ॥

सिद्धिरिह प्राकृतसम्बन्धिनी परिगृह्यते । सा च लोकाद्भवति । यस्मात्— ऋऌवर्णाभ्यामैकारौकाराभ्यामसम्पृक्तङञकाराभ्यां शषाभ्यां द्विवचनादिना रहितः शब्दोच्चारो लोकव्यवहारादेवोपलभ्यते; देश्याश्च शब्दाः, तस्मात् सिद्धिर्लोकादिति वेदितव्यम् । चकाराद्वक्ष्यमाणलक्षणादनैकान्ताच्च ॥

अनुक्तमन्यशब्दानुशासनवत् ॥ २ ॥

यदिह स्वरादिसंज्ञात्वेन सन्धिप्रभृतिकार्यत्वेनाऽनुक्तं तत्सर्वमन्यशब्दानुशासनवत् कौमारजैनेन्द्रपाणिनीयप्रभृतिषु व्याकरणेषु यथोक्तं तत्तथैवेति वेदितव्यम् ॥

संज्ञा प्रत्याहारमयी वा ॥ ३ ॥

इह प्राकृतव्याकरणे संज्ञा प्रत्याहारस्वरूपा व्यह्रियते । वाग्रहणाद्वक्ष्यमाणाच्च । पुनः प्रत्याहारग्रहणं भूयो व्यवहारदर्शनार्थम् । यथा-स्वरोऽच्, ए ओ एङ्, ऐ औ ऐच्, व्यञ्जनं हल्, स्वादिः सुप्, त्यादिस्तिङ्—इत्यादि ॥

सुप्स्वादिरन्त्यहला ॥ ४ ॥

सुप्सु स्वादिषु विभक्तिषु आदिर्वर्णो वचनं वाऽन्त्यहला अन्त्यव्यञ्जनेन सह संज्ञा भवति । यथा—सु औ जस्—सुस् ,अम् औट् शस्—अस्, टा भ्यां भिस्—टास्, ङे भ्यां भ्यस्—ङेस्, ङसि भ्यां भ्यस्—ङसिस्, ङस् ओम् आम् ,—ङाम् ङि ओस् सुप्—ङिप् । पञ्चम्या ङस् इति, ङसिस् इति ङसः षष्ठ्येकवचनस्याऽसन्देहार्थम् ॥

ह्रो ह्रस्वः ॥ ५ ॥

एकमात्रो यो वर्णो ह्रस्व इति प्रसिद्धस्तस्य ह इति संज्ञा ॥

दिर्दीर्घः ॥ ६ ॥

यो द्विमात्रो वर्णो दीर्घ इति रूढस्तस्य दिः इति संज्ञा ॥

शषसाः शुः ॥ ७ ॥

शषस-इत्येते वर्णाः शुसंज्ञका भवन्ति ॥

सः समासः ॥ ८ ॥

समासः ससंज्ञको भवति ॥

आदिः खुः ॥ ९ ॥

आदिवर्णः खुसंज्ञको भवति ॥

गो गणपरः ॥ १० ॥

आदिरिति वर्तते । गणप्रधानो य आदिशब्दः स गसंज्ञको भवति । यथा गुणादिरित्यादौ गुणग इत्यादि ॥

द्वितीयः फुः ॥ ११ ॥

शब्दस्य द्वितीयो वर्णः फुसंज्ञको भवति ॥

संयुक्तः स्तुः ॥ १२ ॥

व्यञ्जनेन युक्तं संयुक्तं, तस्य स्तु इति संज्ञा ॥

तु विकल्पे ॥ १३ ॥

विकल्पे विभाषायां तुशब्दः प्रयुज्यते वाशब्दवत् ॥

प्रायो लिति न विकल्पः ॥ १४ ॥

यः कार्यार्थं सूत्रेऽनुबध्यते न तु दृश्यते सोऽनुबन्ध इति व्याकरणान्तरे लक्षणम् । लकार इत् यस्यासौ लित् । लिति कार्ये विकल्पः प्रायो न भवति ॥

शिति दीर्घः ॥ १५ ॥

शानुबन्धे कार्ये सति पूर्वस्य स्वरस्य दीर्घो भवति । यथा—'शि श्लुङ् नपुनरिति', अत्र नपुनःशब्दे अन्त्यव्यञ्जनस्य शानुबन्धेकारलोपयोः पूर्वस्याऽचो दीर्घः । णउणाइ, णउणा, पक्षे णउण ॥

सानुनासिकोच्चारं ङित ॥ १६ ॥

ङकारानुबन्धं यत्कार्यं तत्सानुनासिकोच्चारं भवति । यथा—कामुकयमुनाचामुण्डाऽतिमुक्तके मो ङ् लुक् । काउंओ, जउंणा । अत्र मकारस्य ङानुबन्धे लोपे शेषस्य स्वरस्य सानुनासिक उच्चारः ॥

बहुलम् ॥ १७ ॥

अधिकारोऽयम्। आ शास्त्रपरिसमाप्तेर्यत्प्राकृतलक्षणमुच्यते तद्बहुलं भवतीति वेदितव्यम्। ततश्च क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव भवति। तच्च यथास्थानं दर्शयिष्यामः॥

दिह्रौ मिथः से ॥ १८ ॥

से समासे दिह्रौ दीर्घह्रस्वौ मिथः अन्योन्यं बहुलं भवतः। तत्र ह्रस्वस्य दीर्घः—अन्तर्वेदिः अंतावेई अंतवेई। सप्तविंशतिः सत्तावीसा सत्तवीसा। वारिमती वारीमई वारिमई। पतिगृहं पईहरं पइहरं। युवतिजनः जुवईजणो जुवइजणो। वेणुवनं वेणूवणं वेणुवणं। दीर्घस्य ह्रस्वः—णिअंबसिलक्खलिअवीइमालस्स नितम्बशिलास्खलितवीचिमालस्य। यमुनातटं जउणअडं जउणाअडं। नदीस्रोतः णइसोत्तं णईसोत्तं। गौरीगृहं गोरिघरं गोरीघरं। वधूमुखं बहुमुहं बहूमुहं।

सन्धिस्त्वपदे ॥ १९ ॥

संस्कृतोक्तः सन्धिः सर्वः प्राकृते भवति, पदे न भवति। तुशब्दो विकल्पार्थः। व्यासर्षिः वासेसी वास इसी। विषमातपः विसमाअवो विसम आअवो। कवीश्वरः कईसरो कइ इसरो। स्वादूदकं साऊअअं साउ उअअं। अपद इति किम्; मुद्धाए वच्छाइ मुग्धा वत्साः। महइ पूजयतीत्यर्थः। बहुलाधिरात् क्वचिदेकपदे च। करिष्यति काही काहिइ। द्वितीयः बीओ बिइओ॥

न यण् ॥ २० ॥

'इको यणचि' इति यः संस्कृते यणादेशः स प्राकृते न भवति। इवर्णस्य यत्वमुवर्णस्य वत्वं च न भवति। यणिति यवरलानां परिग्रहेऽपि प्राकृते ऋवर्णलृवर्णयोः प्रयोगाभावाद्यत्ववत्वयोरेवाऽयं निषेधः। नखप्रभावल्यरुणः णहप्पहावलिअरुणो। सन्ध्यावध्ववगूढः संझावहुअवऊढो। यणिति किम्? गूढोरतामरसाणुसारिणी॥

एङः ॥ २१ ॥

नेत्यनुवर्तते। एङित्येदोतौ। एदोतोः संस्कृतोक्तः सन्धिः प्राकृते तु न भवति। देवीए आसणं, देवो अहिणंदणो, अहो अच्चरिअं–अहो आश्चर्यम्, इत्यादयः संस्कृतवदेव॥

शेषेऽच्यचः ॥ २२ ॥

युक्तस्य हलो लोपे योऽच् शिष्यते स शेषः, तस्मिन्नचि परे अचः सन्धिर्न भवति। गगन एव गन्धकुटीं कुर्वन्ति गगण व्विअ गंधउडिं कुणंति। फणामणिप्रदीपिका फणामणिप्पईवा। ज्योत्स्नापूरितकोशः जोण्हाऊरिदकोसो। बहुलाधिकारात् कचिद्विकल्पः। कुम्भकारः कुंभआरो कुंभारो। सुपुरुषः सुउरिसा सूरिसो। कचित्सन्धिरेव। शातवाहनः सालाहणो। व्यालवाहणो चक्कवाओ इत्येतौ प्रायोग्रहणाच्च वस्य लोपाभावे भवतः। लोपे तु सन्धिरेव ॥

तिङः ॥ २३ ॥

अच इत्येतदनुवर्तते, अचीति च। तिङिति तिबादिविभक्तिः। तिङ्सम्बन्धिनोऽचः अचि परे सन्धिर्न भवति। भवतीह होइ इह। पिबतूदकं पिबउ उअअं ॥

लोपः ॥ २४ ॥

अचः अचि परे बहुलं लोपो भवति। त्रिदशेशः तिअसीसो। निश्वासोच्छ्वासौ णीसासूसासौ ॥

अन्त्यहलोऽश्रदुदी ॥ २५ ॥

लोप इत्यनुवर्तते। शब्देष्वन्त्यहलः अन्त्यव्यञ्जनस्य लोपो भवति, अश्रदुदी श्रदित्यव्ययम्, उदित्युपसर्गं वर्जयित्वा। यावत् जाव। यशस् जसो। तमस् तमो। जन्मन् जम्मो। अश्रदुदीति किम्? श्रद्धा सद्धा। श्रद्धाति सद्दहइ। श्रद्धानं सद्दहणं। उद्गतम् उग्गअं। उन्नतम् उण्णअं। समासे तु वाक्यविभक्त्यपेक्षया अन्त्यत्वमनन्त्यत्वं च, तेनोभयमपि भवति। सद्भिक्षुः सब्भिक्खू सभिक्खू। सज्जनः सज्जणो सजणो। एतद्गुणाः एअग्गुणा एअगुणा ॥

निर्दुरि वा ॥ २६ ॥

निस् दुस् इत्येतयोरुपसर्गयोरन्त्यहलो वा लोपो भवति। णिस्सहं णिसहं। णिघोसो णिग्घोसो। दूसहो दुस्सहो। दुहिओ दुक्खिओ। दूहवो दुब्भवो दुर्भगः ॥

अन्तरि च नाचि ॥ २७ ॥

अन्तर्शब्दे चकारान्निर्दुरोश्च अन्त्यहलोऽचि परे लोपो न भवति । अंत-रंगो, णिरवसेसं, दुरुत्तरं, दुरवगाहं । क्वचित् अंता उवरीति च दृश्यते ॥

शि श्लुङ् नपुनारे तु ॥ २८ ॥

नपुनर्शब्दे अन्त्यव्यञ्जनस्य शानुबन्ध इकारो लुक् च वा भवति । शित्त्वात्पूर्वस्य दीर्घः । णउणाइ णउणा णउण । पुनर्शब्देऽपि पुणाइ इति दृश्यते ॥

अविद्युति स्त्रियामाल् ॥ २९ ॥

स्त्रीलिङ्गे वर्तमानस्याऽन्त्यहल आत्वं भवति । लानुबन्धान्नित्यं विद्यु-च्छब्दं वर्जयित्वा । लोपापवादः । सरित् सरिआ । प्रतिपत् पडिवआ । सम्पत् संपआ । बहुलाधिकारादीषत्स्पृष्टयश्रुतिरपि । अविद्युतीति किम् ? विज्जू विज्जुओ ॥

रो रा ॥ ३० ॥

स्त्रियां वर्तमानस्य रेफस्य रा भवति । गिरा, धुरा, पुरा ॥

ह क्षुत्ककुभि ॥ ३१ ॥

क्षुत्ककुभित्येतयोरन्त्यहलो हकारो भवति । छुहा । कउहा ॥

धनुषि वा ॥ ३२ ॥

अन्त्यहल इत्यनुवर्तते । धनुःशब्दे अन्त्यहलो हो वा भवति । धणुहा धणू ॥

स शाशिषि ॥ ३३ ॥

वेत्यनुवर्तते । आशिस्शब्दे शकारस्य सकारो वा भवति । शित्त्वात्पूर्वस्य दीर्घः । आसीसा आसी ॥

स आयुरप्सरसोः ॥ ३४ ॥

अनयोरन्त्यव्यञ्जनस्य सकारो वा भवति । दीहाउसो दीहाऊ । अच्छ-रसा अच्छरा ॥

दिक्प्रावृषी ॥ ३५ ॥

दिक्प्रावृडित्येतयोरन्त्यहलः सो भवति । योगविभागान्नित्यम् । दिसा, पाउसा ॥

शरदामत् ॥ ३६ ॥

शरत्प्रकाराणामन्त्यहलः अत्वं भवति । शरत् सरओ । भिषक् भिसओ ॥

तु सक्खिणभवंतजम्मणमहंता ॥ ३७ ॥

साक्ष्यादयः शब्दा विहितान्त्यव्यञ्जनादेशा वा निपात्यन्ते । सक्खिणो सक्खी । भवंतो भवं । जम्मणं जम्मो । महंतो महं ॥

यत्तत्सम्यग्विष्वक्पृथक्को मल् ॥ ३८ ॥

यदादीनामव्ययानामन्त्यस्य मकारो भवति । लित्त्वान्नित्यम् । जं, तं, सम्मं, वीसुं, पिहं ॥

मोऽचि वा ॥ ३९ ॥

म इति वर्तते । अन्त्यमकारस्याऽचि परे मकारो वा भवति । उसहमजअं वंदे उसहं अजअं वंदे वृषभमजयं वन्दे ॥

बिन्दुल् ॥ ४० ॥

शब्दानामन्त्यमकारस्य बिन्दुर्भवति । लित्त्वान्नित्यम् । फलं, सव्वं, गरं, बहुं ॥

हलि ङञणनाम् ॥ ४१ ॥

म इति निवृत्तम् । ङञणन-इत्येतेषां हलि व्यञ्जने परे बिन्दुर्भवति । ङ-पङ्क्तिः पंती । पराङ्मुखः परंमुहो । ञ-कञ्चुकः कंचुओ । लाञ्छनं लंछणं। ण-षण्मुखः छंमुओ । उत्कण्ठा उक्कंठा । न-सन्धा संभा । विन्ध्यः विंभो ॥

स्वरेभ्यो वक्रादौ ॥ ४२ ॥

वक्रादिषु प्रथमादिभ्यः स्वरेभ्यो यथादर्शनं बिन्दुर्भवति । वंकं वक्रम् । कुंमलं कुड्मलम् । बुंधणं बुध्नम् । पुंजं पुच्छम् । गुंजं गुच्छम् । कंकोडो कार्कोटः । दंसणं दर्शनम् । एषु प्रथमात् । मणंसिणी मनस्विनी । मणंसिला मनःशिला । वअंसो वयस्यः । पंसत्थं पार्श्वस्थम् । पडिंसिआ प्रतिश्रुत् । एषु द्वितीयात् । उपरिं उपरि । अणिउंतअं अतिमुक्तकम् । अनयोस्तृतीयात् ।

पुच्छाश्रबुध्नदर्शनकुड्मलपार्श्वस्थगुच्छकार्कोटाः ।
पशुश्मश्रुवयस्यप्रतिश्रदतिमुक्तगृष्टिमार्जाराः ॥

स्पर्शनमनःशिलोपरिमनस्विवृश्चिकमनस्विनीत्र्यश्राः ।
मूर्धेति च··················पूर्तौ तु देवनागोऽपि ॥

यथा–देवंणाअसुवंतं देवनागसुवक्त्रमिति । कचित्–गट्ठी , मज्जारो, मणसिला–इति च दृश्यते ॥

त्वासुपोस्तु सुणात् ॥ ४३ ॥

त्वाप्रत्ययस्य सुपश्च सम्बन्धिनः सुकाराणकाराच्च परो वा बिन्दुर्भवति । वच्छेसुं वच्छेसु। अंह्मेसुं अंह्मेसु । तुंह्मेसुं तुंह्मेसु। त्वाप्रत्ययस्य णकारात्–काउण काउआणं काउआण । वच्छेणं वच्छेण । वच्छाणं वच्छाण । ममाणं ममाण । तुंह्माणं तुंह्माण । अंह्माणं अंह्माण । सुणादिति किम् ? करिअ । अग्गिणो ॥

लुङ् मांसादौ ॥ ४४ ॥

वेति वर्तते । बिन्दुरित्यधिकृतस्य बिन्दोरिति षष्ठ्यन्तपरिणामः । बिन्दोर्मांसादिषु लुग्वा भवति । मासं मंसं । मासलं मंसलं । पासू पंसू । कासं कंसं । कह कहं । इआणि इआणिं । दाणि दाणिं । कि करेमि । किं करेमि । समुहं संमुहं । नूण नूणं । एव एवं ।

मांसादिस्तु तदानीं कथमेवं किं करोमि नूनमिदानीम् ।
कासमांसलसंमुखपांसुलपांसव(?) इतीरितो हि गणः ॥

संस्कृतसंस्कारे ॥ ४५ ॥

लुगिति वर्तते । संस्कृतसंस्कारयोर्बिन्दोर्लुग् भवति । सक्कअं, सक्कारो ॥

डेत् किंशुके ॥ ४६ ॥

किंशुके बिन्दोः डानुबन्ध एकारो भवति । केसुओ किंसुओ ॥

वर्गेऽन्त्यः ॥ ४७ ॥

त्वित्यनुवर्तते । बिन्दोर्वर्गे परे सति तस्यैव वर्गस्यान्त्यो भवति । पङ्को पंको । अङ्गणं अंगणं । लञ्छणं लंछणं । सञ्झा संझा । कण्टओ कंटओ । मण्डणं मंडणं । अन्तरं अंतरं । पन्थो पंथो । छन्दो छंदो । बन्धू बंधू । कम्पइ कंपइ । आरम्भो आरंभो । वर्ग इति किम् ? संसओ । नित्यमिच्छन्त्यन्ये ॥

विंशतिषु त्या श्लोपल् ॥ ४८ ॥

विंशतिप्रकारेषु ति इत्यनेन सह बिन्दोर्लोपो भवति । शित्त्वात्पूर्वस्य दीर्घः । लित्त्वान्नित्यम् । वीसा विंशतिः । तीसा त्रिंशत् । तेवीसा त्रयोविंशतिः । तेतीसा त्रयस्त्रिंशत् । दाढा दंष्ट्रा । सीहो सिंहः । सिंघो इति च दृश्यते ॥

नाम्नि सिंहदन्तः ॥ ४९ ॥

सिंहदन्तो । नाम्नि इति किम् ? सीहरवो सिंघरवो ॥

सनमदामशिरोनभो नरि ॥ ५० ॥

सनं सान्तं नान्तं च शब्दरूपं नरि पुंलिङ्गे प्रयोक्तव्यम् , **अदामशिरोनभः** दामन् शिरस् नभस् इत्येतान् वर्जयित्वा । सान्तः—जसो, तमो, सदो, मणो, उरो, तेओ, पयो । नान्तः—जम्मो जन्म । कम्मो कर्म । वम्मो वर्म । अदामशिरोनभ इति किम् ? दामं । सिरं । णहं । अन्यच्च—सदस् सअं, सुमनस् सुमणं, सम्मं शर्म इति च दृश्यते बहुलाधिकारात् ॥

शरत्प्रावृट् ॥ ५१ ॥

शरत्प्रावृषौ पुंसि प्रयोज्यौ । सरओ । पाउसो ॥

अक्ष्यर्थकुलाद्या वा ॥ ५२ ॥

नरीति वर्तते । अक्षिपर्यायाः कुलादयश्च शब्दाः पुंलिङ्गे वा प्रयोज्याः । अक्ष्यर्थाः—एस अच्छी । णच्चाविआ तेणाह्माणमच्छी नर्तिते तेनाऽस्माकमक्षिणी । अञ्जल्यादिपाठात् स्त्रीलिङ्गेऽपि—एसा अच्छी । चक्खू चक्खूइं । णअणा णअणाइं । लोअणा लोअणाइं । कुलादिः—कुलो कुलं । वअणो वअणं । माहप्पो माहप्पं । दुखो दुखं । हाअणा हाअणाइं । विज्जुला विज्जुलाइं । छंदो छंदं । कुलादिः—

कुलगो विद्युच्छन्दोभाजनमाहात्म्यदुःखवचनानि ।

गोत्ता गोत्ताइं इत्यादि संस्कृतवदेव ॥

क्लीबे गुणगाः ॥ ५३ ॥

वेत्यनुवर्तते । गुणादयः शब्दा नपुंसके वा प्रयोज्याः । गुणाइ गुणा । देवाइ देवा । मण्डलग्गं मण्डलग्गो । खग्गं खग्गो । बिन्दूइ बिन्दुणो । कररुहं कररुहो । रुक्खाइ रुक्खा ।

गुणदेवमण्डलाग्राः खड्गो बिन्दुश्च कररुहो वृत्तः ॥

स्त्रियामिमाऽञ्जलिगाः ॥ ५४ ॥

इमान्ता अञ्जल्यादयश्च शब्दाः स्त्रीलिङ्गे वा प्रयोज्याः । एसा गरिमा एस गरिमो । एसा महिमा एस महिमो । एसा णिल्लच्छिमा एस णिल्लच्छिमो । एसा धुंगिमा एस धुंगिमो । अञ्जल्यादिः—एसा अञ्जली एस अंजली । बलीए बलीणो । णिहीए णिहीणो । रस्सीए रस्सीणो । पण्हा पण्हो । अच्छीए अच्छीणो । गंढीए गंढीणो(१) । कुच्छीए कुच्छीणो । चोरिआ चोरिअं । विहीए विहीणो । पिट्ठी पिट्ठं । पृष्ठम्—इत्वे कृते, स्त्रियामेवेत्येके । अञ्जल्यादिः—

कुक्षिबलनिधिरश्मिप्रश्नाक्षिग्रन्थिचौर्यविधिपृष्ठाः ।

इमेति तन्त्रेण त्वादेशस्य डिमा इत्यस्य पृथ्व्यादेरिमनिचश्च सङ्ग्रहः । त्वादेशस्य स्त्रीत्वमेवेच्छन्त्येके ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ प्रथमाध्यायस्य प्रथमः पादः ॥

निष्प्रती ओपरी माल्यस्थोर्वा ॥ १ ॥

निर् प्रति इत्येतावुपसर्गौ माल्यशब्दे स्थाधातौ च परे ओ परि इत्येवं यथासंख्यं वा भवतः । ओमल्लं णिमल्लं निर्माल्यम् । परिट्ठा पइट्ठा प्रतिष्ठा । परिट्ठिअं पइट्ठिअं प्रतिष्ठितम् ॥

आदेः ॥ २ ॥

आदेरित्यधिकारोऽयम् । 'अस्तोरस्रोर च' इति सूत्रात् पृथग्विशेषणं वेदितव्यम् ॥

लुगव्ययत्यदाद्यात्तदचः ॥ ३ ॥

अव्ययात्त्यदादेश्च परस्य तयोरेवाऽव्ययत्यदाद्योरचो लुग्भवति । अम्हे एत्थ अम्हेत्थ वयमत्र । जइ इमा जइमा यदीमाः । जइ अहं जइहं यद्यहम् ॥

(१) गन्धीए गन्धिणो—इति ख० पु० पाठः ।

वाऽलाब्वरण्ये ॥ ४ ॥

गित्यनुवर्तते । अलाबू अरण्य इत्येतयोरादेर्लुग्वा भवति । लाऊ । रण्णं अरण्णं ॥

अपेः पदात् ॥ ५ ॥

ते वर्त्तते । पदात्परस्याऽपीत्युपसर्गस्यादेर्लुग्वा भवति । किंपि किमपि । पि । केणवि केणावि । कहंपि कहमपि । पदादिति किम् ? अवि णाम ॥

इतेः ॥ ६ ॥

दिति वर्तते । पदात्परस्य इतिशब्दस्यादेर्लुग् भवति । योगविभागा- । किमिति किंति । यदिति जंति । तदिति तंति । युक्तमिति जुत्तंति । च । इअ विंझगुहाणिलआए इति विन्ध्यगुहानिलयायाः ॥

तोऽचः ॥ ७ ॥

: परस्य इतिशब्दस्यादेरिकारस्य तकारो भवति । तहत्ति तथेति । टेति । पिअत्ति प्रिय इति । अच इति किम् ? किंति ॥

शोर्लुप्तयवरशोर्दिः ॥ ८ ॥

शषसानां लुप्तयवरशषसानामादेः परस्य दिर्दीर्घो भवति । संयोगे विन वर्तमानानां लोपे सति येऽवशिष्टाः शषसास्तेषामादेरचो दीर्घो : । शस्य यलोपे—कश्यपः कासवो । आवश्यकम् आवासअं । पश्यति वस्य लोपे--अश्वः आसो । विश्वासः वीसासो । विश्वसिति वीस- पे---विश्रामः वीसामो । विश्राम्यति वीसामइ । मिश्रं मीसं । संस्पर्शः शलोपे--दुःशासनः दूसासणो । मनःशिला मणासिला । षस्य ष्यः सीसो । पुष्यः पूसो । मनुष्यः मणूसो । वलोपे--विष्वाणः विष्वक् वीसं । रलोपे--कर्षकः कासओ । वर्षा वासा । । षलोपे—निष्षिक्तः णीसित्तो । सस्य यलोपे—सस्यं सासं । कासइ । वलोपे—विकस्वरः विआसरो । निस्स्वः णीसो । स्रः ऊसो । विस्रम्भः वीसंभो । सलोपे—निस्सहः णीसहो । रात् वलोपे कचिदन्यस्याऽच आदेर्दीर्घः । जिह्वा जीहा । दीर्घान्नेति

प्रतिषेधाच्छेषादेशस्याहो: चो खोरिति सूत्रोक्तं द्वित्वं न भवति ॥

हे दाक्षिणेऽस्य ॥ ९ ॥

दिरित्यनुवर्तते । दक्षिणशब्दे अस्य अवर्णस्य दीर्घो भवति हे तस्य हकारे सति । दाहिणो । हे इति किम् ? दक्खिणो ॥

तु समृद्ध्यादौ ॥ १० ॥

अस्येत्यनुवर्तते । समृद्ध्यादिषु आदेरवर्णस्य दीर्घो भवति तु । सामिद्धी समिद्धी समृद्धिः । पाडिसिद्धी पडिसिद्धी प्रतिसिद्धिः । सारिच्छो सरिच्छो सदृक्षः । माणंसिनी मणंसिनी मनस्विनी । पासुत्तो पसुत्तो प्रसुप्तः । पाडिप्पद्धी पडिप्पद्धी प्रतिस्पर्द्धी । पाडिवआ पडिवआ प्रतिपत् । पावासू पवासू प्रवासी । आभिआई अभिआई अभिजातिः । पाअडं पअडं प्रकटम् । पाअअं पअअं प्रकृतम् । पासिद्धी पसिद्धी प्रसिद्धिः । पारकेरं परकेरं परकीयम् । चाउरंतं चउरंतं चतुरन्तम् । आपंसो अपंसो अस्पर्शः । पावअणं पवअणं प्रवचनम् । पारोहो परोहो प्ररोहः । इत्यादि ।

प्रसिद्धिसदृक्षमनस्विनीप्रसुप्तप्रवासिचतुरन्ताः ।
अभिजात्यस्पर्शप्रवचनप्ररोहपरकीयाः ॥
प्रतिपत्प्रकटप्रकृताः सह प्रतिस्पर्द्धिना समृद्ध्यादिः ॥

स्वप्नादाविल् ॥ ११ ॥

स्वप्नादिषु शब्देष्वादेरवर्णस्य इत्त्वं भवति । लित्त्वान्नित्यम् । सिविणो सिमिणो स्वप्नः । विअणं व्यजनम् । विलीअं व्यलीकम् । किविणो कृपणः । मिइंगो मृदङ्गः । ईसि ईषत् । वेडिसो वेतसः । दिण्णं दत्तम् । उत्तिमो उत्तमः । मिरिअं मरिचम् । बहुलाधिकाराण्णत्वाभावे इत्वं न भवति । दत्तं ।

वेतसकृपणमृदङ्गोत्तमदत्तेषद्व्यलीकमरिचाश्च ।
व्यञ्जनमिति स्वप्नादिर्भाषाविद्भिः समाख्यातः ॥

पक्वाङ्गारललाटे तु ॥ १२ ॥

पक्व अङ्गार ललाट इत्येतेषु आदेरस्य इत्वं भवति तु । पिक्कं पक्कं । इंगारो अङ्गारो । णिडालं णडालं ॥

सप्तपर्णे फोः ॥ १३ ॥

सप्तपर्णे फोः द्वितीयस्य इत्वं भवति तु । छत्तिवराणो छत्तवराणो ॥

मध्यमकतमे च ॥ १४ ॥

चकारः फोरित्यस्यानुवृत्त्यर्थम् । मध्यमकतमयोर्द्वितीयस्याऽच इत्वं भवति । पृथग्योगान्नित्यम् । मज्झिमो । कइमो ॥

हरे त्वी ॥ १५ ॥

हरशब्दस्यादेरच ईत्वं भवति तु । हीरो हरो ॥

उल् ध्वनिगवयविष्वचि वः ॥ १६ ॥

ध्वनिगवयविष्वक्शब्देषु वकारसम्बन्धिनोऽस्य उत्वं लिद्भवति । धुणी । गउआ । वीसुं ॥

ज्ञो णोऽभिज्ञादौ ॥ १७ ॥

उत्वमनुवर्तते । अभिज्ञादिषु ज्ञकरादेशस्य णस्य सम्बन्धिनोऽवर्णस्य उत्वं भवति । अभिण्णू अभिज्ञः । सव्वण्णू सर्वज्ञः । आअमण्णू आगमज्ञः । कअण्णू कृतज्ञः । ण इति किम् ? अहिज्जा अभिज्ञः । अभिज्ञादाविति किम् ? पण्णो प्राज्ञः । अहिण्णो अभिज्ञः । येषां ज्ञादेशणकारसम्बन्धिनः अस्य उत्वं दृश्यते तेऽभिज्ञादयः ॥

स्तावकसास्ने ॥ १८ ॥

स्तावकसास्नाशब्दयोरादेरस्य उत्वं भवति । थुवओ । सुण्हा ॥

चण्डखण्डिते णा वा ॥ १९ ॥

चण्डखण्डितशब्दयोर्णकारेण सहितस्यादेरवर्णस्य उद्भवति । चुडं चण्डं । खुडिओ खण्डिओ ॥

प्रथमे पथोः ॥ २० ॥

प्रथमशब्दे पकारथकारयोः सम्बन्धिनोऽवर्णस्य युगपत्क्रमेण च उत्वं भवति । पुडुमं पडुमं पुडमं पडमं ॥

आर्यायां र्यः श्वश्र्वामूल् ॥ २१ ॥

श्वश्रूवाचिन्यार्याशब्दे यकारसम्बन्धिनोऽवर्णस्य ऊत्वं लिद्भवति । अज्जू । श्वश्र्वामिति किम्? अज्जा ।

आसारे तु ॥ २२ ॥

आसारे आदेरवर्णस्य ऊत्वं भवति तु । ऊसारो आसारो ।

तोऽन्तर्येल् ॥ २३ ॥

अन्तर्शब्दे तकारसम्बन्धिनोऽवर्णस्य एत्वं लिद्भवति । अन्तःपुरम् अंतेउरं । अन्तःसहम् अंतेसहं । अन्तश्चारी अंतेआरी । क्वचिन्न भवति । अन्तर्गतम् अंतग्गअं । अन्तव्वीसंभणीवेसिआण अन्तर्विश्रम्भनिवेशितानाम् ॥

पारावते तु फोः ॥ २४ ॥

पारावतशब्दे फोर्द्वितीयस्याऽस्य एत्वं तु भवति । पारेवओ पारावओ ॥

उत्करवल्लीद्वारमात्रचि ॥ २५ ॥

उत्करवल्लीद्वारशब्देषु मात्रच्प्रत्यये चाऽऽदेरवर्णस्य एत्वं वा भवति । उक्केरो उक्करो । वेल्ली वल्ली । देरं दारं । पक्षे दुआरं । मात्रच्--एत्तिअमेत्तं एतावन्मात्रम् । बहुलाधिकारान्मात्रशब्देऽपि । भोअणमेत्तं भोजनमात्रम् ॥

शय्यादौ ॥ २६ ॥

शय्यादिष्वादेरवर्णस्य एत्वं भवति । पृथग्योगान्नित्यम् । सेज्जा शय्या । एत्थ अत्र । गेज्झं ग्राह्यम् । गेण्डुअं कन्दुकम् । इत्यादि ॥

वाऽऽर्द्रे उदोत ॥ २७ ॥

आर्द्रशब्दे आदेरवर्णस्य उत्त्वमोत्त्वं च वा भवतः । उल्लं ओल्लं । पक्षे अल्लं अद्दं । बाहसलिलप्पवहेण ओल्लेइ बाष्पसलिलप्रवाहेणाऽऽर्द्रयति ॥

स्वपि ॥ २८ ॥

उदोदित्यनुवर्तते । स्वपिधातोरादेरवर्णस्य उदोतौ भवतः । पृथग्योगान्नित्यम् । सुवइ । सोवइ ॥

ओदाल्यां पङ्क्तौ ॥ २९ ॥

पङ्क्तिवाचिन्यालीशब्दे आदेरवर्णस्य ओत्वं भवति । ओली । पङ्क्ताविति किम् ? आली सखी ॥

फोः परस्परनमस्कारे ॥ ३० ॥

ओदित्यनुवर्तते । परस्परनमस्कारशब्दयोः फोर्द्वितीयस्याऽस्य ओत्वं भवति । परोप्परं । णमोक्कारो ॥

पद्मे मि ॥ ३१ ॥

पद्मशब्दे आदेरवर्णस्य मकारे परे ओत्वं भवति । पोम्मं । मीति किम् ? पदुमं ।

त्वर्पौ ॥ ३२ ॥

अर्पयतौ धातावादेरस्य ओद्भवति तु । ओप्पेइ अप्पेइ । ओप्पिअं अप्पिअं ॥

ईल् खल्वाटस्त्यानयोरातः ॥ ३३ ॥

खल्वाटस्त्यानयोरादेरवर्णस्य ईत्वं लिद्भवति । खल्लीडो । थीणं । संखी-अमिति स्त्यः समक्खा इति खादेशे क्तप्रत्ययान्ते सिद्धम् ॥

इत्तु सदादौ ॥ ३४ ॥

आदित्यनुवर्तते । सदा इत्यादिष्वादेराकारस्य इत्वं भवति तु । सइ सआ सदा । कुप्पिसो कुप्पासो कूर्पासः । णिसिअरो णिसाअरो निशाकर इत्यादि ॥

आचार्ये चो ह्रश्च ॥ ३५ ॥

आचार्ये चकारसम्बन्धिन आतो ह्रस्वो भवति । आअरिओ आइरिओ ॥

श्यामाके मः ॥ ३६ ॥

ह्र इत्यनुवर्तते । श्यामाके मकारस्याऽऽतो ह्रस्वो भवति । सामओ ॥

न वाऽव्ययोत्खातादौ ॥ ३७ ॥

अव्यये उत्खातादौ चादेरातो ह्रस्वो न वा भवति । अव्यये—जह जहा । तह तहा । अहव अहवा । व वा । ह हा । इत्यादि । उत्खातादिः—उक्खअं उक्खाअं ।

कुमरो कुमारो। खइरं खाइरं। बलआ बलाआ बलाका। पअअं पाअअं प्राकृतम्। चमरो चामरो। कलओ कलाओ कलादः स्वर्णकारः। हलिओ हालिओ हालिकः कृषीवलः। णराओ णाराओ नाराचः। तलविण्टं तालविण्टं तालवृन्तम्। ठविओ ठाविओ स्थापितः। पट्ठविओ पट्ठाविओ प्रस्थापितः। संठविओ संठाविओ संस्थापितः। इत्यादि। केचिद्ब्राह्मणपूर्वाह्णयोरपीच्छन्ति। बंह्मणो बांह्मणो। पुव्वण्हो पुव्वाण्हो।

उत्खाताव्ययमथवा वा हा यथा तथेत्यपि च।
प्राकृतकुमारचामरसंस्थापिततालवृन्तनाराचाः॥
प्रस्थापितसंस्थापितकलादखादिरहालिकबलाकाः।
संयोगे ह्रो न स्याद् ब्राह्मणपूर्वाह्णयोर्दीर्घः॥

घञि वा ॥ ३८ ॥

घञ्निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य ह्रस्वो वा भवति। पुनर्वाग्रहणादुत्तरत्र न विकल्पः। पवहो पवाहो प्रवाहः। पहरो पहारो प्रहारः। पअरो पआरो प्रकारः, प्रचारो वा। पत्थओ पत्थावो प्रस्तारः। क्वचिन्न भवति। रागः राओ। भागः भाओ॥

स्वरस्य बिन्द्वमि ॥ ३९ ॥

बिन्दौ अमि द्वितीयैकवचने च परे स्वरस्य ह्रस्वो भवति। मांसं मंसं। मांसलं मंसलं। पांसू पंसू। कंसं कांस्यम्। वांशिकः वंसिओ। काञ्चनं कंचणं। लाञ्छनं लंछणं। अमि यथा—गंगं। मालं। नइं। बहुं। वच्छं॥

संयोगे ॥ ४० ॥

संयोगे परे पूर्वस्य स्वरस्य ह्रस्वो भवति। आ—आम्रं अंबं। ताम्रं तंबं। विरहाग्निः विरहग्गी। अमात्यः अमच्चो। काव्यं कव्वं। ई—मुनीन्द्रः मुणिन्दो। तीर्थं तित्थं। शीघ्रं सिग्घं। ऊ—चूर्णः चुण्णो। सूत्रं सुत्तं। पूर्वं पुव्वं। ए—नरेन्द्रः णरिन्दो। म्लेच्छः मिलिच्छो। ऐ—दृष्टैकस्तनपट्टं दिट्ठेक्कत्थणपट्ठं। ओ—अधरोष्ठम् अहरुट्ठो। नीलोत्पलं णीलुप्पलं। एदोतोः क्वचित्स्वरूपेण ह्रस्वः। एकः एक्को। नेत्रं णेत्तं। ग्राह्यं गेज्झं। स्तोकं थोक्कं। तुण्डं तोण्डं। इत्यादि॥

त्वेदितः ॥ ४१ ॥

संयोग इति वर्तते । आदेरिकारस्य संयोगे परे एत्वं तु भवति । पेण्डं पिण्डम् । धम्मेल्लं धम्मिल्लम् । सेन्दूरं सिन्दूरम् । वेल्लं विल्लं बिल्वम् । वेण्णू बिण्णू विष्णुः । क्वचिन्न भवति । चिन्ता ॥

मिरायां लित् ॥ ४२ ॥

इत इत्यनुवर्तते, एदिति च । मिराशब्दे इत एत्वं लिद्भवति । मेरा । सीमेति यावत् ॥

मूषिकविभीतकहरिद्रापथिपृथिवीप्रतिश्रुत्स्यत् ॥ ४३ ॥

मूषिकादिष्वादेरिकारस्य अकारो भवति । मूषिकः मूसओ । विभीतकः वहेडओ । हरिद्रा हलद्दी । पथि पहो । अकारान्ते सत्यपि पथशब्दे पथिशब्दस्य रूपान्तरनिवृत्त्यर्थमयं योगः । पृथिवी पुहवी पुढवी । प्रतिश्रुत् पडसुआ प्रतिध्वनिः ॥

रस्तित्तिरौ ॥ ४४ ॥

अदित्यनुवर्तते । तित्तिरिशब्दे रसम्बन्धिन इकारस्य अत्वं भवति । तित्तिरो ॥

इतौ तो वाक्यादौ ॥ ४५ ॥

वाक्यादिभूते इतिशब्दे तकारसम्बन्धिन इतः अद्भवति । इअ विअसिअ कुमुअसरो इति विकसितकुमुदसरः । वाक्यादाविति किम् ? पिओत्ति ॥

वेङ्गुदशिथिलयोः ॥ ४६ ॥

इङ्गुदशिथिलयोरादेरितः अत्वं वा भवति । अंगुअं इंगुअं । सढिलं सिढिलं । पसढिलं पसिढिलं । णिम्माअं णिम्मअं—इत्येतौ निर्मातृनिर्मिताभ्यां भविष्यतः ॥

उ युधिष्ठिरे ॥ ४७ ॥

युधिष्ठिरे आदेरित उत्वं वा भवति । जुहुट्ठिलो जुहिट्ठिलो जहुट्ठिलो जहिट्ठिलो ॥

द्विनीक्षुप्रवासिषु ॥ ४८ ॥

उत्वमनुवर्तते । द्विशब्दे नीत्युपसर्गे इक्षुप्रवासिशब्दयोश्च आदेरित उत्वं भवति । पृथग्योगान्नित्यम् । द्विमात्रः दुमत्तो । द्विजातिः दुआई । द्विविधः दुविहो । द्विरेफः दुरेहो । द्विवचनं दुवअणं । द्विधाविधः दुहाविओ । बहुलाधिकारात्क्वचिद्विकल्पः । दुउणो दिउणो विउणो द्विगुणः । दुईओ विईओ द्वितीयः । क्वचिन्न भवति । द्विजः दिओ । द्विरदः दिरओ । द्विधागतः दिहागओ । क्वचिदोत्वमपि । द्विवचनं दोवअणं । नेः—णुमज्जइ निमज्जति । क्वचिन्न भवति । निपतति णिवडइ । इक्षुः उच्छू इच्छू । प्रवासी पवासू पावासू ॥

तु (१)निर्झरद्विधाकृञोरोन्ना ॥ ४९ ॥

निर्झरशब्दे द्विधाकृञ्शब्दे च आदेरितो नकारेण सह ओत्वं तु भवति । ओज्झरो णिज्झरो निर्झरः । दोहाकिज्जइ दुहाकिज्जइ द्विधाक्रियते । दोहाकिअं दुहाकिअं द्विधाकृतम् । कृञिति किम् ? दिहागअं द्विधागतम् ॥

ईतः काश्मीरहरीतक्योर्लालौ ॥ ५० ॥

काश्मीरहरीतकीशब्दयोरीकारस्य आ अ इत्येतौ लितौ यथासंख्यं भवतः । कंहारो । हरडई ॥

गभीरग इत् ॥ ५१ ॥

ईत इत्यनुवर्तते । गभीरादिष्वादेरीकारस्य इत्वं भवति । गहिरो गभीरः । सिरिसो शिरीषः । आणिअं आनीतम् । स्त्रियामीकारोऽपि दृश्यते । आणीदा भुअणब्भुएक्कजणणी आनीता भुवनाद्भुतैकजननी । गहिअं गृहीतम् । विलिअं व्रीलितम् । विइओ द्वितीयः । पडिवअं प्रदीपितम् । तइओ तृतीयः । जिअन्तो जीवन् । ओसिअंतो अवसीदन् । पसिअ प्रसीद । वम्मिओ वल्मीकः । इत्यादि । तआणिं इति तु तदानींशब्दस्य स्वरस्य 'बिन्द्वमी'ति ह्रस्वे सिद्धम् ॥

वा पानीयगे ॥ ५२ ॥

पानीयादिष्वादेरीकारस्य इत्वं वा स्यात् । पाणियं पाणीयं पानीयम् । अलिअं अलीअं अलीकम् । करिसं करीसं करीषम् । उवणिअं उवणीअं उपनीतम् । जिअइ जीअइ जीवतीत्यादि ॥

---

(१) त्वोर्निर्झरद्विधाकृञोर्ना—इति क० पु० पाठः ।

उल् जीर्णे ॥ ५३ ॥

जीर्णशब्दे ईत उत्वं भवति। लित्त्वान्नित्यम्। जुण्णं । कचिन्न-जिण्णे भोअणमत्ते जीर्णे भोजनमात्रे ॥

तीर्थे ह्रूल् ॥ ५४ ॥

तीर्थे ईत ऊत्वं भवति हि हकारे सति। तूहं। हीति किम्? तित्थं ॥

विहीनहीने वा ॥ ५५ ॥

विहीनहीनयोरीत ऊत्वं तु भवति। विहूणं विहीणं। हूणं हीणं। अनयोरिति किम्? पहीणजरमरणो ॥

एल् पीठनीडकीदृशपीयूषविभीतकेदृशापीडे ॥ ५६ ॥

पीठादिष्वादेरीत एत्वं लित्त्वान्नित्यं भवति। पेढं। नेडं। केरिसो। पेऊसं। वहेडओ। एरिसो। आमेलो। बहुलाधिकाराच्च पीठनीडयोर्विकल्पः। पीठं। नीडं॥

त्वदुत उपरिगुरुके ॥ ५७ ॥

उपरिगुरुकयोरादेरुकारस्य अद्भवति तु। अवरि उवरि। गरुओ गुरुओ। कप्रत्ययपरिग्रहाद् गुरौ न भवति। गुरू ॥

मुकुलादौ ॥ ५८ ॥

उत इत्यनुवर्तते, अदिति च। मुकुलादिष्वादेरुकारस्य अद्भवति। पृथग्योगान्न विकल्पः। मउलं मुकुलम्। मउडं मुकुटम्। यद्यपि संस्कृते, तथाप्ययं योगो मुकुटशब्दस्य रूपान्तरनिवृत्त्यर्थः। मउरं मुकुरः। अगरू अगुरुः। गलोई गुडूची। गुरुई गुर्वी। जहुट्ठिलो युधिष्ठिरः। सोअमल्लं सौकुमार्यम्। इत्यादि। बहुलाधिकारात् क्वचिदात्वं भवति। विद्दतः विदाओ ॥

रो भ्रुकुटीपुरुषयोरित् ॥ ५९ ॥

भ्रुकुटीपुरुषयो रेफसम्बन्धिन उकारस्य इत्वं भवति। भिउडी। पुरिसो। पउरिसं पौरुषम् ॥

क्षुत इत् ॥ ६० ॥

क्षुत उत ईत्वं भवति । छीअं । पक्षे छुअं ॥

दोदोऽनुत्साहोत्सन्न ऊच्छसि ॥ ६१ ॥

उदित्युपसर्गस्य शकारसकारयोः परयोर्दकारेण सह ऊत्वं भवति, उत्साहोत्सन्नशब्दौ वर्जयित्वा । उच्छ्वासः ऊसासो । उच्छ्वसिति ऊससिइ । उद्गताः शुका यस्मिन् स उच्छुकः ऊसुओ । उत्सुकः ऊसुओ । उत्सवः ऊसओ । उत्सरति ऊसरइ । उत्सिक्तः ऊसित्तो । अनुत्साहोत्सन्न इति किम्? उच्छाहो । उच्छण्णो ॥

दुरो रलुकि तु ॥ ६२ ॥

ऊदित्यनुवर्तते । दुर इत्युपसर्गस्य रलुकि रेफलोपे सति आदेरुत ऊद्वा भवति । दूसहो दुसहो । रलुकीति किम्? दुस्सहो ॥

सुभगमुसले ॥ ६३ ॥

ऊदित्यनुवर्तते । सुभगमुसलयोरुत ऊद्वा भवति । सूहओ सुहओ । मूसलं मुसलं ॥

हश्चौत् कुतूहले ॥ ६४ ॥

कुतूहले आदेरुत ओत्वं भवति हश्च, तत्संनियोगेन ऊतो ह्रस्वश्च । कोउहलं कुऊहलं कुतूहलम् ॥

स्तौ ॥ ६५ ॥

ओदित्यनुवर्तते । स्तौ संयुक्ते परे आदेरुत ओत्वं भवति । तुण्डं तोण्डं । पुष्करं पोक्खरं । कुट्टिमं कोट्टिमं । पुस्तकं पोत्थअं । मुस्ता मोत्था । मुक्तगरः मोत्तअरो । पुद्गरः पोग्गलो । कुन्दं कोन्दं । व्युत्क्रान्तं वोक्कंतं ॥

सूक्ष्मेऽद्वोतः ॥ ६६ ॥

सूक्ष्मशब्दे ऊत अत्वं वा भवति । सण्हं सुण्हं ॥

अल् दुकूले ॥ ६७ ॥

ऊत इत्यनुवर्तते । दुकूले ऊत अल् इत्यादेशो भवति । लकारो नाऽनुबन्धः । दुअल्लं दुऊलं ॥

ईदुद्व्यूढे ॥ ६८ ॥

उद्व्यूढे ऊत ईत्वं वा भवति । उव्वीढं । उव्वूढं ॥

उल् कण्डूयतिहनूमद्वातूले ॥ ६९ ॥

कण्डूयतौ धातौ हनूमद्वातूलयोश्च आदेरूत उत्वं लिद्भवति । कण्डुअइ । हणुमंतो । वाउलो ॥

वा मधूके ॥ ७० ॥

मधूके ऊत उत्वं वा भवति । महुअं महूअं ॥

इदेन्नूपुरे ॥ ७१ ॥

वेत्यनुवर्तते । नूपुरे ऊत इदेतौ वा भवतः । णिउरं णेउरं णूउरं ॥

ओल् स्थूणातृणमूल्यतूणीरकूर्परगुडूचीकूष्माण्डी-ताम्बूलीषु ॥ ७२ ॥

एषु ऊत ओत्वं लिद्भवति । थोणा । तोणं । मोल्लं । तोणीरं । कोप्परं । गलोई । कोह्मंडी । तंबोली । बहुलाधिकारात् स्थूणातूणयोर्विकल्पः । थूणा । तूणं ॥

ऋतोऽत् ॥ ७३ ॥

आदेः ऋकारस्याऽत्वं भवति । घृतं घअं । तृणं तणं । कृतं कअं । वृषभः वसहो । मृगः मओ ॥

आद्वा मृदुत्वमृदुककृशासु ॥ ७४ ॥

ऋत इत्यनुवर्तते । मृदुत्वादिष्वादेः ऋकारस्याऽऽत्वं वा भवति । माउत्तं मउत्तं । माउअं मउअं । कासा कसा ॥

इल् कृपगे ॥ ७५ ॥

कृप इत्यादिषु शब्देषु ऋत इत्वं भवति । लित्त्वान्नित्यम् । किवो कृपः । णिवो नृपः । किवा कृपा । किवणो कृपणः । किवाणो कृपाणः । किसो कृशः । किसाणू कृशानुः । किई कृतिः । किसरो कृसरः । किच्छं कृच्छ्रम् । किसओ

कृषकः । तिसिओ तृषितः । इसी ऋषिः । धिई धृतिः । विच्छिओ वृश्चिकः । वित्तं वृत्तम् । वित्ती वृत्तिः । पिंही पृथ्वी । किच्छा कृत्या । घुसिणं घुसृणम् । घिणा घृणा । इद्धी ऋद्धिः । समिद्धी समृद्धिः । गिंद्वी गृन्द्धिः । विद्धकई वृद्धकपिः । पिहा स्पृहा । विसी बृसी । हिअअं हृदयम् । उक्किट्टं उत्कृष्टम् । मिट्ठं मृष्टम्, रस एव । अन्यत्र मठं । दिट्ठं दृष्टम् । विहिण्णो वितृष्णः । सइ सकृत् । दिट्ठी दृष्टिः । गिट्ठी गृष्टिः । सिट्ठी सृष्टिः । सिआलो शृगालः । वाहित्तं व्याहृतम् । बिंहिअं बृंहितम् । तिप्पं तृप्तम् । सिट्ठं सृष्टम् । सिंगारो शृङ्गारः । भिंगो भृङ्गः । मिओ मृगः । भिऊ भृगुः । भिङ्गारो भृङ्गारः । इत्यादि ॥

शृङ्गमृगाङ्कमृत्युधृष्टमसृणेषु वा ॥ ७६ ॥

शृङ्गादिषु ऋत इत्वं वा स्यात् । सिंगं संगं । मिअङ्को मअङ्को । मिच्चू मच्चू । धिट्ठो धट्ठो । मसिणं मसणं ॥

पृष्ठेऽनुत्तरपदे ॥ ७७ ॥

पृष्ठशब्दे अनुत्तरपदे ऋत इत्वं वा भवति । पिट्ठं पट्ठं । अनुत्तरपद इति किम् ? महिपट्ठं महीपृष्ठम् ॥

उद् वृषभे वुः ॥ ७८ ॥

वृषभे वृ इत्येतस्य उत्वं वा स्यात् । उसहो वसहो ॥

वृन्दारकनिवृत्तयोः ॥ ७९ ॥

उदित्यनुवर्तते । अनयोः ऋत उद्भवति । वुंदारओ वंदारओ । णिउत्तं णिअत्तं ॥

ऋतुगे ॥ ८० ॥

ऋत्वादिषु शब्देषु आदेः ऋत उत्वं भवति । पृथग्योगान्नित्यम् । उऊ ऋतुः । उसहो ऋषभः । पाहुडं प्राभृतम् । पहुडि प्रभृति । भुई भृतिः । णिहुअं निभृतम् । परहुअं परभृतम् । णिउअं निवृतम् । संवुअं संवृतम् । णिउत्ती निवृत्तिः । पउत्ती प्रवृत्तिः । पाउसो प्रावृट् । वुत्तंतो वृत्तान्तः । बुन्दं वृन्दम् । बुन्दावणं वृन्दावनम् । पुहई पृथिवी । वुड्ढो वृद्धः । उज्जू ऋजुः । तैलादित्वात् द्वित्वम् । मुणालं मृणालम् । पुट्ठो स्पृष्टः । पउट्ठो प्रवृष्टः । वुड्ढी वृष्टिः । परामुट्ठो

परामृष्टः । भाउओ भ्रातृकः । पिउओ पितृकः । जामाउओ जामातृकः । माउआ मातृका । पाउअं प्राकृतम् । प्रत्यादित्वात्तस्य डः । हूई हृतिः । इत्यादि ॥

गौणान्त्यस्य ॥ ८१ ॥

गौणस्य—उपसर्जनस्य योऽन्त्य ऋकारस्तस्य उद्भवति । माउमण्डलं । माउघरं। माउसिआ । माउच्छा । पिउसिआ । पिउच्छा । पिउवणं । पिउवई ॥

इदुन्मातुः ॥ ८२ ॥

गौणस्य मातृशब्दस्य ऋत इदुतौ भवतः । माइघरं माउघरं । कचिदगौणस्यापि । माईणं ॥

वृष्टिपृथङ्मृदङ्गनप्तृकवृष्टे ॥ ८३ ॥

इदुदित्यनुवर्तते । वृष्ट्यादिषु ऋत इदुतौ भवतः । विट्ठी वुड्ढी वृष्टिः । पिहं पुहं पृथक् । मिअङ्गो मुअङ्गो मृदङ्गः । णत्तिओ णत्तुओ नप्तृकः । विट्ठो वुट्ठो वृष्टः ॥

तु बृहस्पतौ ॥ ८४ ॥

ऋत इदुतौ तु भवतः । बिहप्फई बुहप्फई बहप्फई ॥

उदूदोल् मृषि ॥ ८५ ॥

मृषाशब्दे ऋत उत्वं ऊत्वं ओत्वं च भवति । लित्वान्न विकल्पः । मुसा मूसा मोसा। मुसावाओ मृषावादः ॥

वृन्त इदेङ् ॥ ८६ ॥

वृन्ते ऋत इदेङ् वा भवति । ए ओ एङ् , इश्च एङ् च इदेङ् । इत्वमेत्वमोत्वमित्यर्थः । विंटं वेंटं वोंटं ॥

ढिरादृते ॥ ८७ ॥

आदृते ऋतो ढिरादेशो भवति । आढिओ ॥

दृसेऽरि सा ॥ ८८ ॥

दृप्ते ऋतः पकारतकाराभ्यां सह अरि-इत्यादेशो भवति । दरिओ । दरिअसीहेण ॥

केवलस्य रिः ॥ ८९ ॥

ऋतः केवलस्य व्यञ्जनेनाऽसम्पृक्तस्य रि इत्यादेशो भवति । रिच्छो ऋक्षः ।

दृश्यक्सक्विनि(१) ॥ ९० ॥

अ, क्स, क्विन् इत्येतदन्ते दृशिधातौ ऋतो रित्वं भवति । अ-सरिसो सदृशः । क्स—सरिच्छो सदृक्षः । क्विन्—सरी सदृक् । सरिवण्णो । सरिरूवो । एवम्—एआरिसो । भवारिसो । जारिसो । तारिसो । कीरिसो । एरिसो । तुह्मारिसो । अक्सयोः साहचर्यात् त्यदाद्यन्यादिविहितः क्विन् इह गृह्यते । क्सक्विनोः साहचर्यात् त्यादादीत्यादिसूत्रविहितः कञ् इह परिगृह्यते ॥

ऋतुऋजुऋणऋषिऋषभे वा ॥ ९१ ॥

एषु ऋतो रित्वं वा स्यात् । रिऊ उऊ । रिजू उज्जू । रिणं उणं । रिसी उसी । रिसहो उसहो ॥

क्लृप्त इलिः ॥ ९२ ॥

क्लृप्त इत्यत्र आदेरच इलि इत्यादेशो भवति । किलित्तं ॥

चपेटाकेसरदेवरसैन्यवेदनास्वेचस्त्वित् ॥ ९३ ॥

एषु एचः सन्ध्यक्षराणामित्वं भवति तु । चविडा चवेडा चपेटा । किसरं केसरं केसरम् । दिअरो देअरो देवरः । सिन्नं सेन्नं दैत्यादित्वात् सइन्नं सैन्यम् । विअणा वेअणा वेदना । महिला महेला इत्येतौ तत्समावेव ॥

सैन्धवशनैश्चरे ॥ ९४ ॥

एच इत्यनुवर्तते । सैन्धवशनैश्चरयोरादेरेच इत्वं भवति । पृथग्योगान्नित्यम् । सिन्धवं । सणिच्चरो ॥

---

(१) दृशि टक्सक्विपि—इति क० पु० पाठः ।

त्वत्सरोरुहमनोहरप्रकोष्ठातोद्यान्योन्ये वश्च क्तोः ॥ ९५ ॥

एषु एच अत्वं भवति तु, तत्संनियोगेन यथासम्भवं कतकारयोश्च वकारादेशो भवति। सररुहं सरोरुहं। मणहरं मणोहरं। पवट्ठो पओट्ठो। आवज्जं आओज्जं। अण्णण्णं अण्णोण्णं। सिरवेअणा सिरोवेअणा---इत्येतौ शिरोवेदनायाः साध्यमानसिद्धावस्थयोरेव भवतः ॥

कौक्षेयक उत् ॥ ९६ ॥

कौक्षेयक आदेरेच उत्वं भवति तु। कुच्छेअअं कोच्छेअअं ॥

शौण्डगेषु ॥ ९७ ॥

शौण्डादिष्वादेरेच उत्वं भवति। योगविभागान्न विकल्पः। सुण्डो शौण्डः। सुण्डोअणी शौण्डोदनिः। मुञ्जाअणो मौञ्जायनः। सुंदेरं सौन्दर्यम्। सुगन्धत्तणं सौगन्ध्यम्। दुवारिओ दौवारिकः। सुवण्णिओ सौवर्णिकः। पुलोमी पौलोमी। इत्यादि ॥

गव्यउदाईत् ॥ ९८ ॥

गोशब्दे एच अउ आई इत्येतौ भवतः। गउओ हरस्स। एसा गाई ॥

ऊ स्तेने वा ॥ ९९ ॥

स्तेने सन्ध्यक्षरस्य ऊत्वं वा भवति। थूणो थेणो ॥

सोच्छ्वासे ॥ १०० ॥

सोच्छ्वासशब्दे एच ऊ भवति। पृथग्योगान्नित्यम्। सूसासो ॥

ऐच एङ् ॥ १०१ ॥

ऐच ऐकारौकारयोः एङ् एकारौकारौ यथासंख्यं भवतः। ऐ—शैलः सेलो। त्रैलोक्यं तेल्लोक्कं। ऐरावणः एरावणो। कैलासः केलासो। वैद्यः वेज्जो। कैटभः केडवो। वैधव्यं वेहव्वं। औ—कौमुदी कोमुई। यौवनं जोव्वणं। कौस्तुभः कोत्थुहो। कौशाम्बी कोसम्बी। क्रौञ्चः कोञ्चो। कौशिकः कोसिओ ॥

अइ तु वैरादौ ॥ १०२ ॥

ऐच इत्यनुवर्तते। वैरादिष्वादेरैच अइ इत्यादेशो भवति तु। वैरं वइरं वेरं। वैशम्पायनः वइसंपाअणो वेसंपाअणो। वैशिकं वइसिअं वेसिअं। वैश्रवणः वइसवणो वेसवणो। चैत्रः चइत्तो चेत्तो। कैलासः कइलासो केलासो। वैद्यः वइज्जो वेज्जो। कैटभः कइडहो केडहो। वैधव्यं वइहव्वं वेहव्वं। वैतालिकः वइआलिओ वेआलिओ। कैरवं कइरवं केरवं। दैवं दइवं देवं। इत्यादि॥

दैत्यादौ(१)॥ १०३॥

दैत्यादिष्वादेरैच अइ इत्ययमादेशो भवति। पृथग्योगान्नित्यम्। दैत्यः दइच्चो। दैन्यं दइण्णं। दैवतं दइवअं। कैतवं कइअवं। वइअब्भो वैदर्भः। वइसाहो वैशाखः। अइसरिअं ऐश्वर्यम्। वइअवणो वैजवनः। भइरवो भैरवः। वइएसो वैदेशः। वइसाणरो वैश्वानरः। वइदेहो वैदेहः। वइसालो वैशालः। सइरं स्वैरम्। चइत्तं चैत्यम्। चैत्यविशेषे न भवति। चेतअं॥

नाव्यावः॥ १०४॥

नौशब्दे ऐच आव इत्यादेशो भवति। णावा॥

गौरव आत्॥ १०५॥

गौरवे ऐच आत्वं भवति। गारवं॥

पौरगे चाऽउत्॥ १०६॥

पौरादिषु चकाराद्गौरवे च ऐच अउ इत्यादेशो भवति। पउरो पौरः। सउरो सौरः। मउली मौलिः। कउरवो कौरवः। गउडो गौडः। कउलो कौलः। कउसलं कौशलम्। पउरिसं पौरुषम्। कउच्छेअअं कौक्षेयकम्। सउहं सौधम्। मउणं मौनम्। गउरवं गौरवम्। इत्यादि॥

उच्चैर्नीचैसोरअः॥ १०७॥

उच्चैर्नीचैःशब्दयोरैचः अअ इत्यादेशो भवति। उच्चअं। णीचअं। उच्चनीचाभ्यां कप्रत्यये सिद्धेऽपि उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम्॥

ई धैर्ये॥ १०८॥

---

(१) दैत्यगेषु–इति क. पु. पाठः।

धैर्ये ऐच ईत्वं भवति । धीरं । धीरं हरइ विसाओ ॥

वा पुआय्याद्याः ॥ १०९ ॥

पुआयी इत्यादयः शब्दाः स्वराद्यादेशविशेषिता वा निपात्यन्ते । पुआयी पिशाच उन्मत्तश्च । ऊणंदिअं आनन्दितम् । तोब्बरो तुम्बुरुः । माहिवाओ माघवातः । सइकोडी शतकोटिः । माइन्दो माकन्दः । ओन्दुरो उन्दुरुः । आलिआ आली । तणसोल्लं तृणशूल्यं, मल्लिकेत्यर्थः । अरिट्ठो अरिष्टः दैत्यः काको वा । दरिअं लघु, शीघ्रमित्यर्थः । किरो किरिः, वराह इत्यर्थः । वामल्लूरो वामल्लूरः वल्मीकम् । वसो वृक्षः । मूसिओ मूषिकः । वत्तं वृन्तम् । हेरिंबो हेरम्बः । चिक्कं स्तोकं स्पृष्टं च । चलणाओहो चरणायुधः । उअणिआ उन्मत्ता दुःशीला च । मांसलं मूसलं मुसल्लं । महल्लअपक्खो महालयपक्षः । चंचरीओ चञ्चरीकः ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ
प्रथमाध्यायस्य द्वितीयः पादः ॥

एत्साज्झला त्रयोदशगेऽचः ॥ १ ॥

आदेरित्यनुवर्तते । त्रयोदशादिष्वादेरचः साज्झला सस्वरव्यञ्जनेन परेण सह एत्वं भवति । तेरह त्रयोदश । थेरो स्थविरः ब्रह्मा वा । एक्कारो अयस्कारः । वेइलं विचकिलम् । मुद्धविअइलप्पसूणपुञ्जा इति च दृश्यते । तेवीसा त्रयोविंशतिः । तेतीसा त्रयस्त्रिंशत् । इत्यादि ॥

कदले तु ॥ २ ॥

एत्साज्झलेत्यनुवर्तते । कदले आदेरचः परेण स्वरव्यञ्जनेन सह एत्वं तु भवति । केलं कअलं । केली कअली ॥

कर्णिकारे फोः ॥ ३ ॥

कर्णिकारे फोर्द्वितीयस्याऽचः परेण साज्झला एत्वं तु भवति । कण्णेरो कण्णिआरो ॥

नवमालिकाबदरनवफलिकापूगफलपूतर ओल् ॥ ४ ॥

एष्वादेरचः परेण साञ्भला ओत्वं भवति । लित्वान्नित्यम् । णोमालिआ नवमालिका । बोरं बदरम् । णोहलिआ नवफलिका । पोफलं पूगफलम् । पोरो पूतरः अधमो जलजन्तुर्वा ॥

तु मयूरचतुर्थचतुर्वारचतुर्दशचतुर्गुणमयूखो-लूखलसुकुमारोदूखललवणकुतूहले ॥ ५ ॥

एष्वादेः स्वरस्य परेण स्वरव्यञ्जनेन सह ओत्वं तु भवति । मोरो मऊरो मयूरः । चोत्थो चउत्थो चतुर्थः । चोव्वारो चउव्वारो चतुर्वारः । चोद्दहो चउद्दहो चतुर्दश । चोद्दही चउद्दही चतुर्दशी । चोग्गुणो चउग्गुणो चतुर्गुणः । मोहो मऊहो मयूखः । ओहलं उलूहलं उलूखलम् । सोमालो सुउमालो सुकुमारः । ओहलो उऊहलो उदूखलः । लोणं लअणं लवणम् । कोहलं कुऊहलं कुतूहलम् । मोरः संस्कृतेऽपीति केचित्, तदप्रसिद्धम् ॥

निषण्ण उमः ॥ ६ ॥

निषण्णे आदेरचः परेण साञ्भला उम इत्यादेशो भवति । णुमण्णो णिसण्णो ॥

अस्तोरखोरचः ॥ ७ ॥

अधिकारोऽयम् , 'शोः सलिल'ति यावत् । यदित ऊर्ध्वमनुक्रमिष्यामः तदस्तोरसंयुक्तस्याऽखोरनादेरचः परस्य भवतीति वेदितव्यम् ॥

प्रायो लुक् कगचजतदपयवाम् ॥ ८ ॥

असंयुक्तानामनादौ वर्तमानानामचः परेषां कगचजतदपयव-इत्येतेषां प्रायो लुग्भवति । क—लोकः लोओ । शकटः सअडो । तीर्थकरः तित्थअरो । ग—नगरं णअरं । नगः णओ । मृगाङ्कः मिअंको । च—शची सई । कचग्रहः कअग्गहो । रचना रअणा । ज—गजः गओ । रजतं रअअं । प्रजापतिः पआवई । भजनं भअणं । त—सुतः सुओ । यतिः जई । रतिः रई । रसातलं रसाअलं । द—नदी णई । मदनः मअणो । गदा गआ । कदनं कअणं । प—रिपुः रिऊ । विपुलं विउलं । सुपुरुषः सुउरिसो । य—जयः जओ । प्रियः पिओ । वियोगः

विओओ । नयनं णअणं । व—लावण्यं लाअण्णं । वडवानल: वडआणलो । विविध: विइहो । वग्रहणाद्बकारस्याऽपि । विबुधो विउहो । प्रायोग्रहणात् कचिन्न भवति । सुकुसुमं । पआगजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो । सपावं । समवाओ । देवो । दाणवो । अस्तोरित्येव । अक्को । ससक्को । सङ्गो । सङ्का । चचा । अज्जुणो । युत्तो । उद्दामो । विप्पो । सच्चं । सव्वं । अक्को । सग्गो अखोरित्येव । कुलं । गङ्गा । चरो । जडो । तमो । दआ । परो । वरो । अच इत्येव । संकरो । संगमो । कंचणं । वंचणा । धणंजओ । आंतरं । चंदणं । कंपो । सअंवरो । समासे तु वाक्यविभक्त्यपेक्षया भिन्नपदत्वमपीष्यते, तेन तत्र यथादर्शनमुभयमपि भवति । सुहकरो सुहअरो सुखकरः । आअमिओ आगमिओ आगमिकः । सहचरो सहअरो सहचरः । आअओ आगओ आगतः । जलअरो जलचरो जलचरः । सुअणो सुजणो सुजनः । बहुअरो बहुतरो बहुतरः । वित्तअरो वित्तपरो वित्तपरः । धीरअमो धीरयमो धीरयमः । गणवारो गणआरो गणवारः । सुहओ सुहदो शुभदः सुखदो वा । इत्यादि । बहुलाधिकारात् कचिदादेरपि भवति । चिह्नम् इण्हंम् । सपुनः सोउणो । नपुनः णाउणो । सच सोअ । कचिचस्य जः । पिशाची पिसाजी ॥

नात् पः ॥ ९ ॥

आद्वर्णात्परस्य पः पकारस्य लुङ् न भवति । सवहो शपथः । सावो शापः । आदिति किम् ? परिउट्ठो परिपुष्टः ॥

यश्रुतिरः ॥ १० ॥

आदित्यनुवर्तते । 'प्रायो लुगि'त्यादिना लुकि सति योऽवशिष्यते अवर्णः, सः अवर्णात्परः लघुप्रयत्नतरयकारश्रुतिर्भवति । शकटं सयढं । आकरः आयरो । प्रकाशः पआसो । आकाशः आआसो । नगरं णअरं । सागरः साअरो । वचनं वअणं । आचारः आआरो । रजतं रअअं । भाजनं भाअणं । प्रजापतिः पआवई । कृतं कअं । पातालं पाआलं । पदं पअं । गदा गआ । नादवती णाअवई । नयनं नअणं । जाया जाआ । लावण्यं लाअण्णं । अवर्ण इति किम् ? सउणो शकुनः । पउणो प्रगुणः । पउरं प्रचुरम् । राईवं राजीवम् ।

रई रतिः। साऊ स्वादुः। वाऊ वायुः। कई कपिः कविर्वा। आदित्येव। विअडं विकटम्। देअरो देवरः। क्वचिद्भवति। पिअइ पिबति॥

कामुकयमुनाचामुण्डाऽतिमुक्तके मोङ् लुक्॥ ११॥

कामुकादिषु मकारस्य लुग्भवति। ङानुबन्धत्वाच्छेषस्य स्वरस्य सानुनासिक उच्चारः। कामुकः काउँओ। यमुना जउँणा। चामुण्डा चाउँण्डा। अतिमुक्तकः अइउँत्तओ। क्वचित्–अइमुत्तअ इति च दृश्यते॥

खोऽपुष्पकुब्जकर्पूरकीले कोः॥ १२॥

'उकारेणाऽनुबन्धेन स्ववर्ग्याः परिगृह्यन्ते'—इति व्याकरणान्तरे प्रसिद्धम्। यथा—कुः कवर्गः। चुः चवर्गः। एवं टुतुपुषु। अपुष्पवाचिनि कुब्जशब्दे कर्परकीलयोश्च कोः कवर्गस्य खो भवति। खुज्जो। पुष्पे तु बन्धुअकुज्जपसूणं। खप्परो। खिलिओ॥

छागशृङ्खलकिराते लकचाः॥ १३॥

कोरित्यनुवर्तते। छागशृङ्खलकिरातेषु कवर्गस्य लकच इत्येते यथासंख्यं भवन्ति। छागः छालो। छागी छाली। संकलं शृङ्खलम्। किरातः चिलाओ। पुलिन्दपर्याय एव। कामरूपिणस्तु नेष्यते—नमिमो हरकिराअं॥

वैकादौ गः॥ १४॥

एकादिषु कोर्गकारो वा भवति। एगो। पक्षे-एक्को एओ। आगरिसो आअरिसो आकर्षः। लोगो लोओ लोकः। असुगो असुओ असुकः। तित्थगरो तित्थअरो तीर्थकरः। उज्जोअगरो उज्जोअअरो उद्योतकरः। सावगो सावओ श्रावकः। अमुगो अमुओ अमुकः। आगारो आआरो आकारः। इत्यादि॥

खोः कन्दुकमरकतमदकले॥ १५॥

एषु खोरादेः कवर्गस्य गो भवति। पृथग्योगान्नित्यम्। गंदुओ कन्दुकः। मरगअं मरकतम्। मदगलो मदकलः॥

पुन्नागभगिनीचन्द्रिकासु मः॥ १६॥

एषु कोर्मो भवति। पुण्णामो। भामिणी। चंदिमा॥

शीकरे तु भहौ ॥ १७ ॥

शीकरे कोर्भकारहकारौ तु भवतः । सीहरो सीभरो सीअरो ॥

ऊत्वे सुभगदुर्भगे वः ॥ १८ ॥

अनयोरुतः ऊत्वे सति कोर्वकारो भवति । दूहवो । सूहवो । ऊत्व इति किम् ? दुहओ । सुहओ ॥

निकषस्फटिकचिकुरे हः ॥ १९ ॥

एषु कवर्गस्य हत्वं भवति । णिहसो णीहसो । फलिहो । चिहुरो । चिहुरः संस्कृतेऽपीति भृङ्गाचार्यः ॥

खघथधभाम् ॥ २० ॥

ह इति वर्तते । असंयुक्तानामनादौ वर्तमानानामचः परेषां खघथधभ-इत्येतेषां प्रायो हकारो भवति । ख—शाखा साहा । मुखं मुहं । लिखति लिहइ । घ—मेघः मेहो । जघनं जहणं । श्लाघते सलाहइ । थ—नाथः णाहो । रथः रहो । मिथुनं मिहुणं । कथयति कहअइ । ध—साधुः साहु । सुधा सुहा । बाधते बाहइ । भ—शुभं सुहं । स्वभावः सुहावो । स्तनभरः थणहरो । शोभते सोहइ । अस्तोरित्येव । सौख्यं सोक्खं । आख्याति अक्खइ । अर्घः अग्घो । कत्थइ कथ्यते । गृद्धः गिद्धो । उद्धरइ उद्धरति । । दर्भः दब्भो । लभ्यते लब्भइ । अखोरित्येव । खगो । घटा । थणो । धणं । भरो । अच इत्येव । संखो । संघो । कंथा । बन्धो । रंभा । प्राय इत्येव । सरिसवखलो सर्षप-खलः । पलअघणो प्रलयघनः । अथिरो अस्थिरः । जिणधम्मो जिनधर्मः । पणट्ठभवो प्रणष्टभवः ॥

धः पृथकि तु ॥ २१ ॥

पृथक्शब्दे थस्य धकारो भवति तु । पुधं पिधं पुहं पिहं ॥

चोः खचितपिशाचयोः सल्लौ ॥ २२ ॥

त्विरत्यनुवर्तते । खचितपिशाचयोः चोश्चवर्गस्य सकारद्विरुक्तलकारौ यथासंख्यं तु भवतः । खसिओ खइओ । पिसल्लो पिसाओ । स्त्रियां क्विज्जत्वमपि । पिसाजी ॥

झो जटिले ॥ २३ ॥

चोरिति वर्तते, त्विति च। जटिले चवर्गस्य झत्वं तु भवति। झडिलो जडिलो ॥

टोर्बडिशादौ लः ॥ २४ ॥

त्वित्यनुवर्तते। बडिशादौ टवर्गस्य लत्वं तु भवति। बलिसं बडिसं। गुलो गुडो। णलं णडं। चविलो चविडो। आमेलो आमेडो। णाली णाडी। वेलू वेणू। दालिमं दाडिवं। पालेइ पाडेइ। बडिशगुडनडचपेटापीडनाडीवेणु-दाडिमाः। पाटयति-इति णिजन्तः पटिधातुरिह गृह्यते ॥

स्फटिके ॥ २५ ॥

टोरित्यनुवर्तते। स्फटिके टवर्गस्य लो भवति। पृथग्योगान्नित्यम्। फलिहो ॥

लरङ्कोडे ॥ २६ ॥

अङ्कोडे टोर्लत्वं भवति। रित्वात् द्वित्वम्। अङ्कोल्लं ॥

ढः कैटभशकटसटे ॥ २७ ॥

कैटभशकटसटाशब्दे टोर्ढत्वं भवति। कइढवो। सअढं। सढा ॥

ठः ॥ २८ ॥

असंयुक्तस्याऽनादौ वर्तमानस्याऽचः परस्य ठकारस्य ढो भवति। मठः मढो। कमठः कमढो। शठः सढो। कुठारः कुढारो। अस्तोरित्येव। चिट्ठइ। अखो-रित्येव। ठाइ। अच इत्येव। कंठो ॥

पिठरे हस्तु रश्च ढः ॥ २९ ॥

ठ इति वर्तते। पिठरे ठस्य हत्वं भवति तु, तत्संनियोगे रस्य च ढत्वम्। पिहढो पिढरो पिठरः ॥

लड् डोऽनुडुगे ॥ ३० ॥

अस्तोरखोरचः परस्य डकारस्य लकारो भवति, अनुडुगे उडुवादीन्

वर्जयित्वा । लित्वान्नित्यम् । वडवामुखं वलआमुहं । गरुडः गरुलो । तडाकं तलाअं । क्रीडति कीलइ । अस्तोरित्येव । कुड्डं कुड्यम् । अखोरित्येव । डमरुओ । अच इत्येव । तोंडं तुण्डम् । अनुडुग इति किम् ? उड्डु । निविडं । गउडो । नाडी । पीडिअं । नीडं । इत्यादि ॥

टो डः ॥ ३१ ॥

अस्तोरखोरचः परस्य टस्य डत्वं भवति । भटः भडो । नटः णडो । पटः पडो । घटः घडो । घटते घडइ । अस्तोरित्येव । खट्टङ्गं खट्वाङ्गम् । अखोरित्येव । टङ्को देशः । अच इत्येव । घण्टा । क्वचिन्न भवति । अटति अटइ ॥

वेतस इति तोः ॥ ३२ ॥

अत इत्यनुवर्तते । वेतसे अत इत्वे सति तोस्तवर्गस्य डो भवति । वेडिसो । इतीति किम् ? वेअसो । अत एव विधानात् स्वप्नादौ वेतसस्य अत इत्वं वा भवतीति वेदितव्यम् ॥

प्रतिगेऽप्रतीपगे ॥ ३३ ॥

तोरित्यनुवर्तते । प्रत्यादिषु तवर्गस्य डो भवति, अप्रतीपगे प्रतीपादीन् वर्जयित्वा । प्रतिपन्नं पडिवण्णं । प्रतिभासः पडिहासो । प्रतीहारः पडिहारो । प्रतिस्पर्द्धी पडिप्पद्धी । प्रतिनिवृत्तं पडिणिउत्तं । प्रतिकरोति पडिकरेई । प्रतिपत् पडिवआ । प्रतिश्रुत् पडिसुआ । प्रतिमा पडिमा । प्रभृति पहुडि । मृतकं मडअं । भिन्दिपालः भिंडिवालो । पताका पडाआ । प्राभृतं पाहुडं । विभीतकः बहेडओ । व्यापृतः वावडो । व्याहृतं वाहिडो । कन्दरिका कण्डरिआ, औषध-विशेषः । हरीतकी हरडई । इत्यादि । अप्रतीपग इति किम् ? प्रतीपं पईवं । प्रतिज्ञा पइण्णा । सम्प्रति संपइ । प्रतिसमयं पइसमअं । प्रतिसमजं पइसमजं । प्रतिष्ठा पइट्ठा । प्रतिस्थानं पइट्ठाणं । इत्यादि ॥

दंशदहोः ॥ ३४ ॥

दंशतिदहत्याद्योर्धात्वोस्तवर्गस्य डत्वं भवति । डंसइ । डहइ ॥

दम्भदरदर्भगर्दभदष्टदशनदग्धदाहदोहद-
दोलादण्डकदने तु ॥ ३५ ॥

दम्भादिषु तवर्गस्य डो भवति तु । डंभो दंभो । डरो दरो । डब्भो दब्भो । गड्डहो गद्दहो । डट्ठो दट्ठो । डसणो दसणो । डड्ढो दड्ढो । डाहो दाहो । डोहलं दोहलं । डोला दोला । डंडो दण्डो । कडणं कदणं । दरशब्दे भयार्थवृत्तावेव । अन्यत्र दरदलिअं अर्धदलितम् । दोहदे दम्भादिसाहचर्यादाद्यस्यैव ॥

तुच्छे चछौ ॥ ३६ ॥

तुच्छे तवर्गस्य चकारछकारौ तु भवतः । चुच्छं छुच्छं ॥

टल् त्रसरवृन्ततूबरतगरे ॥ ३७ ॥

एषु तवर्गस्य टकारो भवति । लित्वान्न विकल्पः । टसरो । वेण्टं । तालवेण्टं । टूबरो तूबरः शृङ्गरहितोऽनड्वान् , श्मश्रुरहितः पुरुषो वा, जनको वा । टगरो तगरः ओषधिविशेषो वृक्षविशेषो वा ॥

हः कातरककुदवितस्तिमातुलिङ्गे ॥ ३८ ॥

एषु तवर्गस्य हत्वं भवति । काहरो । कउहं । विहत्थी । माहुलिंगं ॥

तु वसतिभरते ॥ ३९ ॥

अनयोस्तवर्गस्य हत्वं वा भवति । वसही वसई । भरहो भरओ ॥

लः पलितनितम्बकदम्बे ॥ ४० ॥

एषु तवर्गस्य लो भवति । पलिलं पलिअं । णिलंबो णिअंबो । कलंबो कअंबो ॥

दोहदप्रदीपशातवाहनाऽतस्याम् ॥ ४१ ॥

दोहदे प्रपूर्वकदीप्यतिधातौ शातवाहने अतस्यां च तवर्गस्य लत्वं भवति । पृथग्योगान्नित्यम् । डोहलो। पलीवेइ । पलित्तं । सालवाहणो सालाहणो । अलसी ॥

रल् सप्तत्यादौ ॥ ४२ ॥

सप्तत्यादौ तवर्गस्य रत्वं भवति । लित्वान्नित्यम् । सप्ततिः सत्तरी । सप्तदश सत्तरह । एकादश एआरह । द्वादश बारह । त्रयोदश तेरह । पञ्चदश पण्णरह । अष्टादश अट्ठारह । गग्गरं गद्गदम् । इत्यादि ॥

अद्रुमे कदल्याम् ॥ ४३ ॥

अद्रुमवाचिनि कदलीशब्दे तोः रत्वं भवति । करली । अद्रुम इति किम् ? कअली केली ॥

कदर्थिते खोर्वः ॥ ४४ ॥

कदर्थिते खोरादेस्तवर्गस्य वत्वं भवति । कवट्टिअो ॥

पीते ले वा ॥ ४५ ॥

व इत्यनुवर्तते । पीते स्वार्थिकलकारे सति तोर्वकारो भवति । पीवलो पीअलो । ल इति किम् ? पीओ ॥

डो दीपि ॥ ४६ ॥

दीप्यतौ धातौ तवर्गस्य डकारो वा भवति । डिप्पइ दिप्पइ ॥

ढः पृथिव्योषधिनिशीथे ॥ ४७ ॥

एषु तवर्गस्य ढो वा भवति । पुढवी पुहवी । ओसढी ओसही । णिसीढो णिसीहो ॥

प्रथमशिथिलमेथिशिथिरनिषधेषु ॥ ४८ ॥

ढ इति वर्तते । प्रथमादिषु तोर्ढत्वं भवति । पृथग्योगान्नित्यम् । पढमं पुढमं । सिढिलं । मेढी । सिढिरो । णिसढो ॥

णर्दिना रुदिते ॥ ४९ ॥

रुदिते तवर्गस्य दि-इत्यवयवेन सह णत्वं भवति । रित्वाद् द्वित्वम् । रुण्णं । अत्र केचित् ऋत्वादिषु तो द इत्यारब्धवन्तः, तत् शौरसेनीमागधीविषय एव दृश्यत इति नोच्यते । प्राकृते तु-ऋतुः उऊ । रजतं रअअं । एतत् एअं । गतः गओ । आगतः आगओ । साम्प्रतं संपअं । यतः जओ । ततः तओ । कृतं कअं । हतं हअं । हताशः हआसो । श्रुतः सुओ । सुकृतिः सुकिई । निर्वृतः णिव्वुओ । तातः ताओ । कातरः काअरा । कतरः कअरो । द्वितीयः बीओ । इत्यादयः प्रयोगा बहवः सन्ति । क्वचित् संभवेऽपि तद्व्यत्ययश्चेति सिद्धम् ॥

णो वाऽतिमुक्तके ॥ ५० ॥

अतिमुक्तके तवर्गस्य णत्वं वा भवति । अणिउत्तअं अइउत्तअं अणिउँत्तअं अइउँत्तअं अइमुत्तअं ॥

गर्भिते ॥ ५१ ॥

ण इत्यनुवर्तते। गर्भिते तवर्गस्य णत्वं भवति। पृथग्योगान्नित्यम्। गब्भिणो ॥

नः ॥ ५२ ॥

अस्तोरखोरचः परस्य नकारस्य णकारो भवति। कनकं कणअं। धनं धणं। माणेइति मानयति ॥

आदेस्तु ॥ ५३ ॥

न इत्यनुवर्तते। शब्दानामादेर्नकारस्य णत्वं भवति तु। नदी णई नई। नयति णेइ नेइ। अस्तोरित्येव। न्यायः नाओ ॥

नापिते ण्हः ॥ ५४ ॥

नापिते नकारस्य ण्ह इत्ययमादेशस्तु भवति। ण्हाविओ णाविओ नाविओ ॥

पो वः ॥ ५५ ॥

असंयुक्तस्याऽनादौ वर्तमानस्याऽचः परस्य पकारस्य वकारः स्यात् प्रायः। शपथः सवहो। शापः सावो। उपसर्गः उवसग्गो। प्रदीपः पईवो। पापं पावं। उपमा उवमा। कपिलः कविलो। कुणपं कुणवं। कलापः कलावो। कपालं कवालं। महीपालः महीवालो। नरपतिः नरवई। गोपायति गोवाअइ। तपति तवइ। अस्तोरित्येव। विप्रः विप्पो। अखोरित्येव। पटइ पतति। पढइ पठति। अच इत्येव। कंपइ कम्पते। प्राय इत्येव। कविः कई। रिपुः रिऊ। एतेन प्रकारेण पकारस्य प्राप्तयोर्लोपवकारयोर्यस्मिन् कृते श्रुतिसुखमुत्पद्यते स तत्र विधेयः ॥

फः पाटिपरिघपरिखापरुषपनसपारिभद्रेषु ॥ ५६ ॥

पइत्यनुवर्तते। णिजन्ते पटिधातौ परिघादिषु च पस्य फत्वं भवति। पाटयति फालेइ फाडेइ। परिघः फलिहो। परिखा फलिहा। परुषः फरुसो। पनसः फणसो। फनसः संस्कृतेऽपीति केचित्। पारिभद्रः फालिहद्दो ॥

नीपापीडे मो वा ॥ ५७ ॥

नीपे आपीडे च पस्य मो वा भवति । नीमो नीवो । आमेडो आवेडो ॥

रल् पापर्द्धौ ॥ ५८ ॥

पापर्द्धौ पस्य रो भवति । लित्वान्नित्यम् । पारद्धी । पापर्द्धिर्मृगया ॥

प्रभूते वः ॥ ५९ ॥

प्रभूते पस्य वो भवति । वहुत्तं ॥

फस्य भहौ वा ॥ ६० ॥

अस्तोरखोरचः परस्य फकारस्य भकारहकारौ यथादर्शनं व्यवस्थित-विभाषायां भवतः । क्वचित् भः-रेफः रेभो । शिफा सिभा । क्वचित्तु हः-मोत्ता-हलं मुक्ताफलम् । क्वचिदुभावपि-सफलं सहलं सभलं । शेफालिका सेहालिआ सेभालिआ । शफरी सहरी सभरी । गुंहइ गुंभइ गुम्फति । अस्तोरित्येव । गुप्फं गुल्फम् । पुप्फं पुष्पम् । अखोरित्येव । फणी । अच इत्येव । गुम्फइ । प्राय इत्येव । कसणफणी कृष्णफणी ॥

बो वः ॥ ६१ ॥

अस्तोरखोरचः परस्य बकारस्य वो भवति । शबलः सवलो । अलाबुः अलावू ॥

ङ्वयौ कबन्धे ॥ ६२ ॥

कबन्धे बस्य वकारयकारौ भवतः । ङित्वात्सानुनासिक उच्चारो वकारस्य । कबन्धः कवँधो कयंधो ॥

बिसिन्यां भः ॥ ६३ ॥

बिसिनीशब्दे बस्य भो भवति । भिसिणी ॥

वो भस्य कैटभे ॥ ६४ ॥

कैटभे भस्य वो भवति । कइढवो ॥

त्वभिमन्यौ मः ॥ ६५ ॥

व इत्यनुवर्तते । अभिमन्यौ मस्य वो भवति तु । अहिवण्णू अहिमण्णू ॥

मन्मथे ॥ ६६ ॥

म इत्यनुवर्तते । मन्मथे आदेर्मस्य वो भवति । पृथग्योगान्नित्यम् । वम्महो ॥

तु डो विषमे ॥ ६७ ॥

विषमशब्दे मस्य डो भवति । विसडो विसमो ॥

यो जर् तीयाऽनीयोत्तरीयकृत्येषु ॥ ६८ ॥

त्वित्यनुवर्तते । तीये अनीये च प्रत्यये उत्तरीयशब्दे कृद्विहितप्रत्यये च यकारस्य जकारो भवति । रित्वाद् द्वित्वम् । तीये-द्वितीयः विइज्जो विइओ । तृतीयः तइज्जो तइओ । अनीये-करणिज्जं करणीअं करणीयम् । विह्मअणिज्जं विह्मअणीअं विस्मयनीयम् । जावणिज्जं जावणीअं यापनीयम् । उत्तरिज्जं उत्तरीअं उत्तरीयम् । कृत्ये-पेज्जा पेआ पेया । मेज्जं मेअं मेयम् ॥

इन् मयटि ॥ ६९ ॥

य इत्यनुवर्तते । मयट्प्रत्यये यस्य इकारो भवति तु । विषमयः विसमइओ विसमओ ॥

छायायां होऽकान्तौ ॥ ७० ॥

अकान्तौ वर्तमाने छायाशब्दे यस्य हत्वं भवति । वच्छस्स छाहा । वच्छस्स छाआ । पुद्गलपर्यायः । सच्छाहं सच्छाअं । अकान्ताविति किम् ? मुहच्छाआ । मुखकान्तिरित्यर्थः ॥

यष्ट्यां लल् ॥ ७१ ॥

यष्ट्यां यस्य लत्वं भवति । लट्ठी । वेणुलट्ठी । चूअलट्ठी चूतयष्टिः । महुलट्ठी मधुयष्टिः ॥

कतिपये वहशौ ॥ ७२ ॥

कतिपये यस्य वत्वहत्वे भवतः । हत्वे शित्वात्पूर्वस्य दीर्घः । कइअवं कइवहं ॥

अर्थपरे तो युष्मदि ॥ ७३ ॥

य इत्यनुवर्तते । अर्थपरे युष्मच्छब्दे यस्य तकारो भवति । तुह्मेच्चिअ । यूयमेव । तुह्मच्चिअं यौष्माकम् । तुह्मकेरो युष्मदीयः । अर्थपर इति किम् ? जुह्मदह्मप्पअरणं युष्मदस्मत्प्रकरणम् ॥

आदेर्जः ॥ ७४ ॥

पदादेर्यस्य जो भवति । यशः जसो । यमः जमो । युवतिः जुवई । याति जाइ । आदेरिति किम् ? आमओ । अवअवो । विणओ । बहुलाधिकारात् सोपसर्गस्याऽनादेरपि । संजोओ संयोगः । संजमो संयमः । अपजसो अपयशः । क्वचिन्न भवति । प्रयोगः पओओ ॥

भ्यौ बृहस्पतौ तु बहोः ॥ ७५ ॥

बृहस्पतौ बकारहकारयोर्यथासंख्यं भकारयकारौ तु भवतः । भयप्पई बहप्पई ॥

रो डा पर्याणे ॥ ७६ ॥

पर्याणे रेफस्य डा इत्ययमादेशो भवति । पडाआणं पल्लाणं ॥

लो जठरवठरनिष्ठुरे ॥ ७७ ॥

र इति वर्तते । जठरादौ रस्य लत्वं भवति । जठरं जढलं जढरं । वठरः वढलो वढरो । णिट्ठुलो णिट्ठुरो निष्ठुरः । भसलशब्दो भ्रमरपर्यायः संस्कृत इव ॥

हरिद्रादौ ॥ ७८ ॥

हरिद्रादिषु रस्य लत्वं भवति । पृथग्योगान्नित्यम् । हलद्दी हरिद्रा । इङ्गालो अङ्गारः । चलणो चरणः । जुहुट्ठिलो युधिष्ठिरः । सउमालो सुकुमारः । सिढिलो शिथिरः । सक्कालो सत्कारः । मुहलो मुखरः । वलुणो वरुणः । चिलाओ किरातः । लुग्गो रुग्णः । संपद्दालं सम्पद्द्वारम् । अवद्दालं अपद्वारम् । कलुणो करुणः । दलिद्दो दरिद्रः । फलिहो परिघः । फलिहा परिखा । दलिद्दाइ दरिद्राति । सच्छलो मत्सरः । संवच्छलो संवत्सरः । फालिहद्दो पारिभद्रः । दालिद्दं दारिद्र्यम् । काहलो कातरः । इत्यादि । बहुलाधिकारादङ्गारस्य कृतेत्वस्यैव । अन्यत्र अङ्गारो । चरणस्य श्लोकपादार्थवृत्तेरेव । अन्यत्र—चरणप्पहरणं । किरातस्य चकारसंनियोग एव । अन्यत्र—णमिमो हरकिराअं ॥

किरिवेरे डः ॥ ७९ ॥

अनयोः रेफस्य डो भवति । किडी किरिः, वराहो, गर्वो, मूषिको, गन्धर्वो वा । वेडो वेरः, भीरुः शरभः, करभो, मण्डूको, दुन्दुभिर्वा ॥

खोः करवीरे णः ॥ ८० ॥

करवीरे खोरादेः रेफस्य णत्वं भवति । कणवीरो ॥

लो ललाटे च ॥ ८१ ॥

ण इति वर्तते । ललाटे आदेर्लकारस्य णो भवति । चकारः खोरित्यनुवृत्त्यर्थः । णिडालं णडालं ॥

लाहललाङ्गललाङ्गूले वा ॥ ८२ ॥

एष्वादेर्लकारस्य णो वा भवति । णोहलो लोहलो । लोहलः (१)शफरविशेषः । णंगलं लंगलं । णंगुलं लंगुलं ॥

स्थूले रलूतश्चौत् ॥ ८३ ॥

स्थूले लस्य रत्वं लिद्भवति, तत्संनियोगेन ऊत ओत्वं च भवति । थोरो । थूलहलद्दो इति तु स्थूलशब्दे हरिद्रादिलत्वे भविष्यति ॥

बो मः शबरे ॥ ८४ ॥

शबरे बस्य मो भवति । समरो ॥

नीवीस्वप्ने वा ॥ ८५ ॥

अनयोर्वस्य मो वा भवति । नीमी नीवी । सिमिणो सिविणो ॥

हस्य घो बिन्दोः ॥ ८६ ॥

बिन्दोः परस्य हस्य घत्वं वा भवति । संघारो संहारो संहारः । सिंहो सिंघो सिंहः । क्वचिदबिन्दोरपि । दाघो दाहः ॥

शोः सल् ॥ ८७ ॥

'अस्तोरखोरच' इति निवृत्तम् । शोः शषसानां सकारो भवति । लित्वान्नित्यम् । शब्दः सद्दो । कुशः कुसो । नृशंसः णिसंसो । वंशः वंसो । अश्वः आसो । श्वश्रूः ससू । श्यामा सामा । दशा दसा । शोभते सोहइ । षण्डः संडो । निकषः णिहसो । कषायः कसाओ । विष्वक् वीसुं । वर्षा वासा । तुष्यति तूसइ । शेषः सेसो ॥

प्रत्यूषदिवसदशपाषाणे तु हः ॥ ८८ ॥

(१) शब्दविशेषः इति ख० पु० पाठः ।

शोरित्यनुवर्तते । प्रत्यूषादिषु शषसानां हत्वं भवति तु । पच्चूहो पच्चूसो । दिअहो दिअसो । दह दस । दहमुहो दसमुहो । दहवलो दसबलो । दहरहो दसरहो । एआरह । तेरह । पाहाणो पासाणो ॥

स्नुषायां ण्हः फोः ॥ ८९ ॥

स्नुषाशब्दे फोर्द्वितीयस्य शोः ण्ह इत्यादेशस्तु भवति । सुण्हा सुसा स्नुषा ॥

छल् षट्शमीसुधाशाव(१)सप्तपर्णे ॥ ९० ॥

एषु शषसानां छत्वं लिद्भवति । छट्ठी षष्ठी । छप्पओ षट्पदः । छम्मुहो षण्मुखः । छमी शमी । छुहा सुधा । छावो शावः । छत्तिवण्णो सप्तपर्णः ॥

सिरायां वा ॥ ९१ ॥

सिराशब्दे शोश्छो वा भवति । छिरा सिरा ।

लुक् पादपीठपादपतनदुर्गादेव्युदुम्बरेऽचाऽन्तर्दः ॥ ९२ ॥

पादपीठादिषु अन्तर्वर्तमानस्य दकारस्य अचा सहितस्य लुग्वा भवति । पावीढं पाअवीढं पादपीठम् । पावडणं पाअवडणं पादपतनम् । दुग्गाई दुग्गादेई । उम्बरो उउम्बरो उदुम्बरः । अन्तरिति किम्? दुर्गादेव्या आदौ मा भूत् ॥

व्याकरणप्राकारागते कगोः ॥ ९३ ॥

लुगित्यनुवर्तते । वेति वर्तते, अचेति च । व्याकरणादिषु ककारगकारयोरचा सह लुग्वा भवति । वारणं वाअरणं । पारो पाआरो । आओ आअओ ॥

एवमेवदेवकुलप्रावारकयावज्जीविताऽवटाऽऽवर्तमानतावति वः ॥ ९४ ॥

एवमेवादिष्वन्तर्वर्तमानस्य वकारस्य अचा सहितस्य लुग्वा भवति । एमेअ एव्वंएव्व । देउलं देवउलं । पारओ पावारओ । जा जाव । जीअं जीविअं । अडो अवडो । अत्तमाणं आवत्तमाणं । ता ताव । अन्तरित्येव । एवमेवेत्यन्त्यस्य मा भूत् ॥

---

(१) शाप०—इति क० पु० पाठः ।

खोः करवीरे णः ॥ ८० ॥

करवीरे खोरादेः रेफस्य णत्वं भवति । कणवीरो ॥

लो ललाटे च ॥ ८१ ॥

ण इति वर्तते । ललाटे आदेर्लकारस्य णो भवति । चकारः खोरित्यनुवृत्त्यर्थः । णिडालं णडालं ॥

लाहललाङ्गललाङ्गूले वा ॥ ८२ ॥

एष्वादेर्लकारस्य णो वा भवति । णोहलो लोहलो । लोहलः (१)शफरविशेषः । णंगलं लंगलं । णंगुलं लंगुलं ॥

स्थूले रलूतश्चौत् ॥ ८३ ॥

स्थूले लस्य रत्वं लिङ्भवति, तत्संनियोगेन ऊत ओत्वं च भवति । थोरो । थूलहलद्दो इति तु स्थूलशब्दे हरिद्रादिलत्वे भविष्यति ॥

बो मः शबरे ॥ ८४ ॥

शबरे बस्य मो भवति । समरो ॥

नीवीस्वप्ने वा ॥ ८५ ॥

अनयोर्वस्य मो वा भवति । नीमी नीवी । सिमिणो सिविणो ॥

हस्य घो बिन्दोः ॥ ८६ ॥

बिन्दोः परस्य हस्य घत्वं वा भवति । संघारो संहारो संहारः । सिंहो सिंघो सिंहः । क्वचिदबिन्दोरपि । दाघो दाहः ॥

शोः सल् ॥ ८७ ॥

'अस्तोरखोरच' इति निवृत्तम् । शोः शषसानां सकारो भवति । लित्वान्नित्यम् । शब्दः सद्दो । कुशः कुसो । नृशंसः णिसंसो । वंशः वंसो । अश्वः आसो । श्वश्रूः ससू । श्यामा सामा । दशा दसा । शोभते सोहइ । षण्डः संडो । निकषः णिहसो । कषायः कसाओ । विष्वक् वीसुं । वर्षा वासा । तुष्यति तूसइ । शेषः सेसो ॥

प्रत्यूषदिवसदशपाषाणे तु हः ॥ ८८ ॥

---

(१) शब्दविशेषः इति ख० पु० पाठः ।

शोरित्यनुवर्तते । प्रत्यूषादिषु शषसानां हत्वं भवति तु । पच्चूहो पच्चूसो । दिअहो दिअसो । दह दस । दहमुहो दसमुहो । दहबलो दसबलो । दहरहो दसरहो । एआरह । तेरह । पाहाणो पासाणो ॥

स्नुषायां ण्हः फोः ॥ ८९ ॥

स्नुषाशब्दे फोर्द्वितीयस्य शोः ण्ह इत्यादेशस्तु भवति । सुण्हा सुसा स्नुषा ॥

छल् षट्शमीसुधाशाव(१)सप्तपर्णे ॥ ९० ॥

एषु शषसानां छत्वं लिद्भवति । छट्ठी षष्ठी । छप्पओ षट्पदः । छम्मुहो षण्मुखः । छमी शमी । छुहा सुधा । छावो शावः । छत्तिवण्णो सप्तपर्णः ॥

सिरायां वा ॥ ९१ ॥

सिराशब्दे शोश्छो वा भवति । छिरा सिरा ।

लुक् पादपीठपादपतनदुर्गादेव्युदुम्बरे-ऽचाऽन्तर्दः ॥ ९२ ॥

पादपीठादिषु अन्तर्वर्तमानस्य दकारस्य अचा सहितस्य लुग्वा भवति । पावीढं पाअवीढं पादपीठम् । पावडणं पाअवडणं पादपतनम् । दुग्गाई दुग्गा-देई । उम्बरो उउम्बरो उदुम्बरः। अन्तरिति किम्? दुर्गादेव्या आदौ मा भूत् ॥

व्याकरणप्राकारागते कगोः ॥ ९३ ॥

लुगित्यनुवर्तते । वेति वर्तते, अचेति च । व्याकरणादिषु ककारगकारयो-रचा सह लुग्वा भवति । वारणं वाअरणं। पारो पाआरो। आओ आअओ ॥

एवमेवदेवकुलप्रावारकयावज्जीविताऽवटाऽऽवर्तमान-तावति वः ॥ ९४ ॥

एवमेवादिष्वन्तर्वर्तमानस्य वकारस्य अचा सहितस्य लुग्वा भवति । एमेअ एव्वंएव्व । देउलं देवउलं । पारओ पावारओ । जा जाव । जीअं जीविअं । अडो अवडो । अत्तमाणं आवत्तमाणं । ता ताव । अन्तरित्येव । एवमेवेत्यन्त्यस्य मा भूत् ॥

---

(१) शाप०—इति क० पु० पाठः ।

ज्योर्दनुजवधराजकुलभोजनकालायस–
किसलयहृदयेषु ॥ ९५ ॥

दनुजवधादिषु ज्योर्जकारयकारयोरचा सहितयोर्लुग्वा भवति। दणुवहो दणुअवहो दनुजवधः। राउलं राअउलं राजकुलम्। भाणं भाअणं भाजनम्। कालासं कालाअसं कालायसम्। किसलं किसलअं किसलयम्। हिअं हिअअं हृदयम्। महासुसमा सहिआ ममासुसमाः सहृदयाः॥

अपतौ घरो गृहस्य ॥ ९६ ॥

गृहस्य घर इत्यादेशो भवति, पतिशब्दः परो न चेत्। घरो गृहम्। घरसामी गृहस्वामी। राअघरं राजगृहम्। अपताविति किम्? गहवई गृहपतिः॥

स्त्रीभगिनीदुहितृवनितानामित्थीबहिणी-
दूआविलआः ॥ ९७ ॥

स्त्रीप्रभृतीनामित्थीप्रभृतय आदेशा यथासंख्यं वा भवन्ति। इत्थी थी स्त्री। बहिणी भइणी भगिनी। दूआ दुहिआ दुहिता। विलआ वणिआ वनिता। विलआशब्दः संस्कृतेऽपीति केचित्॥

उभयाधसोरवहहेट्ठौ ॥ ९८ ॥

उभय अधस् इत्येतयोर्यथासंख्यम् अवह हेट्ठ इत्यादेशौ वा भवतः। अवहं उहअं। उवहं–इत्यपि केचित्। हेट्ठं अह। हेट्ठमग्गो अहमग्गो अधोमार्गः॥

मलिनधृतिपूर्ववैडूर्याणां मइलदिहीपूरिम–
वेरुलिआः ॥ ९९ ॥

मलिनादिनां मइलादय आदेशा यथासंख्यं वा भवन्ति। मलिनं मइलं मलिणं। धृतिः दिही धिई। पूरिमं पुव्वं पूर्वम्। वेरुलिअं वेडुज्जं वैडूर्यम्॥

स्मरकट्वोरीसरकारौ ॥ १०० ॥

स्मरकटुशब्दयोरीसरकारौ यथासंख्यं वा भवतः। ईसरो सरो स्मरः। कारं कडू कटुः॥

बाहिंबाहिरौ बहिषः ॥ १०१ ॥

बहिःशब्दस्य बाहिं बाहिर इत्यादेशौ वा भवतः । बाहिं बहिरं । बाहिरब्भंतरकिरिआरोहो बाह्याभ्यन्तरक्रियारोधः ॥

कूरो गौणेषदः ॥ १०२ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति । चिंचव्व कूरपक्का चिञ्चेवेषत्पक्का । पक्षे ईसि ॥

एण्हिं एत्ताहे इदानीमः ॥ १०३ ॥

इदानीमित्यस्य एण्हिं एत्ताहे इत्यादेशौ वा भवतः । एण्हिं एत्ताहे इआणीं पक्षे दाणिं ॥

तिर्यक्पदातिशुक्तेस्तिरच्छिपाइक्कसिप्पि ॥ १०४ ॥

तिर्यगादेस्तिरिच्छादिरादेशो भवति । तिरच्छि पेच्छइ तिर्यक्पश्यति । पदातिः पाइक्को पआई । शुक्तिः सिप्पि सुत्ती ॥

गोणाद्याः ॥ १०५ ॥

गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते। गोणो गौः। स्वार्थे णः। गोला गोदा, गोदेति गोदावरी। दस्य लः। गोला संस्कृतेऽपीति केचित्। ओसाअणं आपोशनम्। आपो इत्यस्य ओसा इत्यादेशः, ततः शकारात् परो यकारागमः। ओसाशब्दो नीहारवाची देश्यः, तत्कणो वा। ओसा-अअणं। वणाई वनराजिः। रेफस्य लुक्। तल्लडं तल्लं तल्पम्। लद्वित्वपलोपौ स्वार्थे डो वा। द्वित्वाभावे तलं। थोवो थेवो थोक्को स्तोकः। कस्य वत्वम्, ओत एत्वं च वा, सेवादिपाठाद् द्वित्वम्। विरुअं विरुद्धम्। संयुक्तस्य लुक्। आओ आपः। शरदादिपाठादन्त्यस्य हलोऽत्वं दीर्घश्च। गोसो गोस्पर्शः, गोसर्गः प्रत्यूषः। सस्य लुक्। वोसिरणं व्युत्सर्जनम्। व्युदोवो, सृजतीति जस्य रः, सस्य ऋत इत्वं च। धिरत्थु धिगस्तु। गस्य रः। पथ्थेवाअं पाथेयम्। थो द्वित्वं वाकारागमश्च। वेलंबो वडंबो विडम्बना। इत एत्; डो लः, नकारस्य लुक् च। बुलबुलो बुद्बुदः। दकारयोर्लः, संयुक्तयोर्मध्ये उत्वम्। किरल्लं करीरम्। रस्य ल्लः। ऊआ यूका। यो लुक्। दोग्गं युग्मम्। योर्दो। धणिआ धन्या प्रियतमा। यकारात्पूर्वमित्वम्। णिव्व-

हणं उद्वहनं विवाहः। उकारस्य णिः। मुव्वहइ उद्वहति। उकारस्य मुः। धिक् २ छि छि। धस्य छः। वाडी वृत्तिः। ऋत आत्वं, तकारस्य डत्वम्। गहिल्लो ग्रहिलः। लो द्वित्वम्। गोणिक्को गोनीकः, गवामनीकः गवां समूहः। को द्वित्वम्। अइरजुवई अचिरयुवतिः। अपूर्वेत्यर्थः। अणरहू नववधूः। नकारवकारयोरत्व-णत्वे बस्य च रः। अमआ असुराः। सुकाररेफयोर्मयौ। पण्णवण्णा पञ्चावण्णा पञ्चपञ्चाशत्। स्तोरादेर्णः, पस्य वः, चाशतोर्णः। द्वितीयस्याऽतः आ, चाशतोर्णः। गामहणं ग्रामस्थानम्। स्थकारस्य हः। तेवण्णा त्रिपञ्चाशत्। इत एत्वं, चाशतोर्णः। घुसिमं घुसृणम्। णो मः, ऋकारस्य इत्वम्। छट्टा छटा। टकारस्य ट्टः। बइल्लो बलीवर्दः। दोर्लः, लीवयोरित्वम्। पागुरणं पाउरणं प्रावरणम्। द्वितीयस्यात उः, वस्य गुरादेशौ। लक्कुडो लगुडः। गकारस्य क्कः। आसंघो आस्था। स्थकारस्य संघः। छेणो स्तेनः। स्तोः छः। दोसिणी ज्योत्स्ना। ज्योर्दो, नात्पूर्वमित्वम्। हिज्जा ह्रज्जा। ज्जः ह्यकारस्य। कक्खडो कर्कशः। कशोः खडौ। तेआलिसा त्रिचत्वारिंशत्। इत ए, चत्वयोः आ, रो लः, विंशत्यादिपाठाद् बिन्दोर्लुक्। कत्तं कलत्रम्। लस्य साचो लुक्। कलबू अलावू। अकारस्य कः, आकारस्य अः। नलिअं निहेलणं निलयः। इदतोर्व्यत्ययः, यो णः, लात्पूर्वं हे। णिक्कडो निश्चयः। श्चयोः कडौ। णिक्कडो निश्चलः। चलोः कडौ। णिरांसो नृशंसः। शंकारस्य रा। णिप्फंसो निस्त्रिंशः। स्त्रिकारस्य फः। विहुड्डुओ विधुन्तुदः। तो डः। वहिओ मथितः। मो वः। खड्डं खेलम्। लो ड्डः। कोलिरं कुरुविन्दः पद्मरागविशेषः। उकारयोरोदितौ, रो लः, बिन्दोश्च रः। विसग्गो व्युत्सर्गः। व्युदोः विः। संघअणं संहननम्। हस्य घः, आदेर्नो यः। घाअणो गायनः। गो घः। ढेक्कुणो मत्कुणः। मतोः ढे। ककुडं ककुदम्। दो डः। सेवालं जम्बालम्। जमोः से। कुड्डओ चुल्लकः। लो डः। वड्डुअरो बृहत्तरः। बृहदित्यस्य वड्डु। अत्थकं अकाण्डम्। काण्डयोः त्थकौ। आणुअं आननम्। आदेरत उः, द्वितीयस्य नो लुक्। संगोलं संघातः। घातयोर्गोलः। सामरी शामली शाल्मलिः। लो लुक्, द्वित्वाभावश्च। हिमोरं हिमोदरम्। दो लुक्। अम्बा अम्वा। बिन्दोर्लुक् बो द्वित्वं च। सिप्फी सूची। ऊत इः, चस्य द्विरुक्तः फः। बह्मी वाणी। णो ह्मः। जच्छन्दो स्वच्छन्दः। स्वस्य जः। तलरो तलवरः, पुराध्यक्षः। वस्य साचो लुक्। कुट्टं कुतुकम्। तोर्लुक्, को द्विरुक्तष्टः। सीसक्कं

शिरःपत्रम् । पत्रस्य कः । जम्बालं शैवालम् । शै इत्यस्य जः । अणुदिवं दिनमुखम् । अनु पश्चात्, दिवा दिनम् । नो वः । सत्थरो संस्तरः । बिन्दोर्लुक् । विट्टिरं विस्तारः । स्तकारस्य टिः । विली वीचिः विबी च । चो लः, चो बः । डांभिओ दाम्भिकः । दो डः । कडप्पो कलापः समूहः । लो डः, पो द्वित्वं च । दूसलो दुर्भगः । भगोः सलौ । गल्लं गंडं । डो लः । पडिसिद्धी प्रतिस्पर्धा । स्पस्य सिः, आत ई । वढो वटः । टो ढः । डोअणो डोअलो डोलो लोचनम् । लो डः, लनोर्डलौ, अत्रैव चस्य साचो लुक् । कत्थइ क्वचित् । चेर्थः । डेड्डुरो दर्दुरः । अत ए, दकारयोर्डः । छिल्लं छिद्रम् । द्रो लः । मंजरो वंजरो मार्जारः । मो वो वा, वक्रादिपाठादनुस्वारः, आतो ह्रस्वः । गहरो गृध्रः । रात्पूर्वमत् । उरओ अज्जमो ऋजुः । जो रः । ऋकारोकारयोरत्, स्वार्थे मश्च । शारिका साइआ सारिआ । रेर्लुक्, अन्त्यस्य आत इआ । अरणी सरणिः । सो लुक् । तणेसी तृणराशिः । राकारस्य पूर्वेणाऽचा सह एत्वम् । दुग्गं दुःखम् । स्तोर्गः । चउक्क चतुष्पथम् । पथस्य क्कः । कलेरं करालम् । रलयोर्व्यत्ययः, अत एत्वं च । कक्काल इत्यादि ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ प्रथमाध्यायस्य तृतीयः पादः ॥

स्तोः ॥ १ ॥

अधिकारोऽयम्, 'ईल् ज्याया'मिति यावत्, यदित ऊर्ध्वमनुक्रमिष्यते तत् स्तोः संयुक्तस्य भवतीति वेदितव्यम् ॥

वा रक्ते गः ॥ २ ॥

रक्ते स्तोः संयुक्तस्य ग इत्यादेशो वा भवति । रग्गो रत्तो ॥

शुल्के(१) ङ्गः ॥ ३ ॥

शुल्के संयुक्तस्य ङ्ग इत्यादेशो वा भवति । सुङ्गं सुक्कं ॥

कः शक्तमुक्तदष्टमृदुत्वरुग्णेषु ॥ ४ ॥

(१) शुष्के—इति क० पु० पाठः ।

एषु स्तोः ककारो वा भवति । सक्को सत्तो । मुक्को मुत्तो । दक्को दट्ठो । माउक्कं माउत्तणं । लुक्को लुग्गो ॥

क्ष्वेडकगे खल् ॥ ५ ॥

क्ष्वेडकादिषु संयुक्तस्य खकारो भवति । लित्वान्नित्यम् । क्ष्वेडकः खेडओ । क्ष्वेडको विषपर्यायः । स्फोटकः खोडओ । स्फोटिका खोडिआ ॥

ष्कस्कोर्नाम्नि ॥ ६ ॥

ख इत्यनुवर्तते । ष्क स्क इत्येतयोर्नाम्नि संज्ञायां खो भवति । पुष्करं पोक्खरं । पुष्करिणी पोक्खरिणी । निष्कं णिक्कं । स्कन्धः कंधो । स्कन्धावारः खंधावारो । अवस्कन्दः अवक्खंदो । नाम्नीति किम् ? दुक्करं दुष्करम् । णिक्कम्पं निष्कम्पं । णमोक्कारो नमस्कारः । सक्कअं संस्कृतम् । सक्कारो संस्कारः ॥

वृक्ष रुर्वृक्षे ॥ ७ ॥

वृक्षशब्दे संयुक्तस्य खो भवति, तत्संनियोगेन वृकारस्य च रुकारः । रुक्खो । स्पृहादित्वाच्छत्वे वच्छो ॥

क्षः ॥ ८ ॥

क्षस्य खो भवति । लक्षणं लक्खणं । क्षयः खओ । विचक्षणः विअक्खणो । बहुलाधिकारात् क्वचिच्छझावपि । छीणं झीणं क्षीणम् । क्षीयते छिज्जइ झिज्जइ ॥

स्थाणावहरे ॥ ९ ॥

स्थाणुशब्दे स्तोः खो भवति, अहरे हरश्चेद्वाच्यो न भवति । खाणू । अहर इति किम् ? थाणू ॥

स्कन्दतीक्ष्णशुष्के तु खोः ॥ १० ॥

एषु खोरादेः संयुक्तस्य खो भवति तु । खन्दो कन्दो । तिक्खं तिण्हं । सुक्खं सुक्कं ॥

स्तम्भे ॥ ११ ॥

खोरित्यनुवर्तते, त्विति च । स्तम्भे खोः संयुक्तस्य खकारो भवति तु । खंभो थंभो ॥

थलस्पन्दे ॥ १२ ॥

स्पन्दाभाववृत्तौ स्तम्भे आदेः संयुक्तस्य थो लिङ्गवति। थंभो। थंभिज्जइ ॥

स्त्यानचतुर्थे च तु ठः ॥ १३ ॥

स्त्यानचतुर्थयोश्चकारादस्पन्दवृत्तौ स्तम्भे च ठत्वं भवति तु । ठीणं थीणं। :ट्ठो चउत्थो । ठंभो । ठंभिज्जइ ॥

ष्टः ॥ १४ ॥

ठ इत्यनुवर्तते । ष्टस्य ठो भवति । योगविभागान्नित्यम् । दृष्टिः दिट्ठी । : मुट्ठि । यष्टिः लट्ठी । सौराष्ट्रं सोरट्ठं ॥

विसंस्थुलास्थ्यधनार्थे ॥ १५ ॥

विसंस्थुलास्थिशब्दयोरधनवाचिन्यर्थशब्दे च संयुक्तस्य ठो भवति । विसं- विसंस्थुलम् । अट्ठी अस्थि । अट्ठो अर्थः प्रयोजनम् । अधन इति ? अत्थो ॥

चः कृत्तिचत्वरे ॥ १६ ॥

कृत्तिचत्वरयोः संयुक्तस्य चो भवति । किच्ची कृत्तिः । चच्चरं चत्वरम् ॥

त्योऽचैत्ये ॥ १७ ॥

चैत्यवर्जितस्य त्यस्य चो भवति । सत्यं सच्चं । प्रत्ययः पच्चओ । :त्यः अमच्चो । अचैत्य इति किम् ? चइत्तं ॥

श्चेर्वृश्चिके ञ्चुर्वा ॥ १८ ॥

श्चिके श्चि-इत्यस्य ञ्चु इत्ययमादेशो भवति । विञ्चुओ विच्छुओ ॥

उत्सवऋक्षोत्सुकसामर्थ्ये छो वा ॥ १९ ॥

षु स्तोः छो वा भवति। पुनर्वाग्रहणादुत्तरत्र न विकल्पः। उच्छओ ऊसओ । रिक्खो । उच्छुओ ऊसुओ । सामच्छं सामत्थं ॥

क्षमायां कौ ॥ २० ॥

इत्यनुवर्तते । कौ पृथिव्यां वर्तमाने क्षमाशब्दे स्तोः छत्वं भवति । (१)लाक्षणिकस्यापि छमा । काविति किम् ? खमा क्षान्तिः ॥

---

(१) क्ष्माशब्दनिष्पन्नस्येत्यर्थः ।

क्षण उत्सवे ॥ २१ ॥

उत्सववाचिनि क्षणशब्दे संयुक्तस्य छो भवति। छणो। उत्सव इति किम्? खणो॥

स्पृहादौ ॥ २२ ॥

स्पृहादिषु स्तोः छो भवति। छिहा स्पृहा। क्षुरः छुरो। क्षीरं छीरं। वृक्षः वच्छो। क्षेत्रं छेत्रं। कुक्षिः कुच्छी। क्षुतं छुअं। क्षुण्णं छुण्णं। कक्षा कच्छा। कक्षः कच्छो। मक्षिका मच्छिआ। क्षारं छारं। इक्षुः इच्छू। सदृक्षः सरिच्छो। अक्षि अच्छी। स्थगितः छइओ। दक्षः दच्छो। कौक्षेयकं कुच्छेअअं। उक्षा उच्छा। सादृश्यं सारिच्छं। क्षुधा छुहा। लक्ष्मीः लच्छी। लक्ष्म लच्छं। इत्यादि॥

थ्यश्चत्सप्सामनिश्चले ॥ २३ ॥

निश्चलवर्जिते थ्यश्चत्सप्स इत्येतेषां छो भवति। थ्य—पथ्यः पच्छो। मिथ्या मिच्छा। श्च—पश्चिमं पच्छिमं। आश्चर्यम् अच्छेरं। पश्चात् पच्छा। त्स—उत्साहः उच्छाहो। मत्सरः मच्छरो। संवत्सरः संवच्छलो। चिकित्सति चिइच्छइ। प्स—अप्सरसः अच्छरा। लिप्सते लिच्छइ। जुगुप्सति जुउच्छइ। अनिश्चल इति किम्? णिच्चलो॥

द्यय्यर्यां जः ॥ २४ ॥

एषां जकारो भवति। द्य—मद्यं मज्जं। अवद्यम् अवज्जं। आतोद्यम् आतोज्जं। द्युतिः जुई। द्योतः जोओ। य्य—शय्या सेज्जा। जय्यः जज्जो। खाद्यः खज्जो। र्य—जर्यः जज्जो। कार्यं कज्जं। पर्यायः पज्जाओ। पर्याप्तं पज्जत्तं॥

त्वभिमन्यौ जञौ ॥ २५ ॥

अभिमन्यौ स्तोः जञ् ज इत्येतौ तु भवतः। अहिमञ्जू अहिमजू अहिवण्णू अहिमण्णू॥

ध्यह्योर्झल् ॥ २६ ॥

ध्य ह्य इत्येतयोर्झत्वं भवति। लित्वान्नित्यम्। ध्य—ध्यानं झाणं। अध्ययनम् अज्झअणं। सन्ध्या संझा। विन्ध्यः विंझो। उपाध्यायः उवज्झाओ। ह्य—सह्यः सज्झो। गुह्यं—गुज्झं। ग्राह्यं गेज्झं। नह्यते णज्झइ॥

साध्वसे ॥ २७ ॥

साध्वसे स्तोर्भ्को भवति। सज्झसं॥

ध्वजे वा॥ २८॥

ध्वजे स्तोर्भ्को वा भवति। झओ धओ ध्वजः॥

इन्धौ॥ २९॥

इन्धी दीप्तावित्यस्मिन् धातौ स्तोर्भ्क इत्यादेशो भवति। समिज्झइ समिध्यति। विज्झइ विध्यते॥

र्तस्याऽधूर्तादौ टः॥ ३०॥

र्तस्य टो भवति, अधूर्तादौ धूर्तादीन् वर्जयित्वा। केवट्टो कैवर्तः। वट्टी वर्तिः। वट्टुलं वर्तुलम्। संवट्टिओ संवर्तितः। पअट्टइ प्रवर्तते। णट्टइ नर्तयति। अधूर्तादाविति किम्? धुत्तो धूर्तः। वत्ता वार्ता। अत्ती आर्तिः। संवत्तणं संवर्तनम्। विवत्तणं विवर्तनम्। पवत्तणं प्रवर्तनम्। आवत्तणं आवर्तनम्। मुहुत्तो मुहूर्तः। मुत्तो मूर्तः। आवत्तओ आवर्तकः। संवत्तओ संवर्तकः। वत्तिओ वार्तिकः। वत्तिआ वर्तिका। पवत्तओ प्रवर्तकः। मुत्ती मूर्तिः। उक्कित्तिओ उत्कीर्तितः। णिवत्तओ निवर्तकः। णिव्वत्तिओ निर्वर्तकः॥ कित्ती कीर्तिः। कत्तिओ कार्तिकः। बहुलाधिकारात्-वट्टा वार्ता॥

प्रवृत्तसन्दष्टमृत्तिवृत्तेष्टापत्तनकदर्थितोष्ट्रे॥ ३१॥

एषु स्तोः टत्वं भवति। पवट्टो प्रवृत्तः। संदट्टो सन्दष्टः। मट्टी मृत्तिः। वट्टं वृत्तम्। इट्टा इष्टा। पट्टणं पत्तनम्। कवट्टिओ कदर्थितः। उट्टो उष्ट्रः। सन्दष्टोष्ट्रे तु ठत्वापवादः॥

वा न्तन्धौ मन्युचिन्हयोः॥ ३२॥

अनयोः संयुक्तयोर्यथासंख्यं न्त न्ध इत्येतावादेशौ वा भवतः। मन्तू मण्णू। इन्धं चिण्हं॥

डल् फोर्मर्दितविच्छर्दच्छर्दिकपर्दवितर्दिगर्तसंमर्दे॥ ३३॥

एषु फोर्द्वितीयस्यस्तोः॥ संयुक्तस्य डत्वं लिद्भवति। मड्डिओ मर्दितः। विच्छड्डो विच्छर्दः। छड्डी छर्दः। कवड्डो कपर्दः। विअड्डी वितर्दिः। गड्डो गर्तः। संमड्डो संमर्दः॥

ढोऽर्धर्द्धिश्रद्धामूर्ध्नि तु ॥ ३४ ॥

फोरित्यनुवर्तते । एषु स्तोर्द्वितीयस्य ढो भवति तु । अर्धम् अड्ढं अद्धं । ऋद्धिः इड्ढी इद्धी । श्रद्धा सड्ढा सद्धा । मूर्धा मुड्ढा मुद्धा ॥

दग्धविदग्धवृद्धिदंष्ट्रावृद्धे ॥ ३५ ॥

एषु संयुक्तस्य ढो भवति । पृथग्योगान्नित्यम् । दड्ढो दग्धः । विअड्ढो विदग्धः । वुड्ढी वृद्धिः । दाढा दंष्ट्रा । वुड्ढो वृद्धः । क्वचिन्न—विद्धकइ-णिरूवियं वृद्धकविनिरूपितम् ॥

पञ्चदशदत्तपञ्चाशति णः ॥ ३६ ॥

एषु स्तोर्णत्वं भवति । पण्णरह पञ्चदश । दिण्णं दत्तम् । पण्णासा पञ्चाशत् ॥

ज्ञम्नोः ॥ ३७ ॥

ज्ञ म्न–इत्येतयोर्णत्वं भवति । ज्ञानं णाणं । संज्ञा संणा । विज्ञानं विण्णाणं । निम्नं निण्णं । प्रद्युम्नः पज्जुण्णो ॥

स्तवे थो वा ॥ ३८ ॥

स्तवे संयुक्तस्य थो वा भवति । थवो तत्रो ॥

रो ह्रश्चोत्साहे ॥ ३९ ॥

थ इति वर्तते, वेति च । उत्साहे संयुक्तस्य थो वा भवति, तत्संनियोगेन ह्रस्य च रेफः । उत्थारो उच्छाहो ॥

स्तः ॥ ४० ॥

स्तस्य थकारो भवति । हत्थो हस्तः । थुई स्तुतिः । थोअं स्तोकम् । पत्थरो प्रस्तरः । सत्थि स्वस्ति ॥

पर्यस्ते टश्च ॥ ४१ ॥

पर्यस्ते स्तस्य टो भवति, चकारात् थश्च । पल्लट्टो पल्लत्थो ॥

वाऽऽत्मभस्मनि पः ॥ ४२ ॥

आत्मभस्मनोः स्तोः पो वा भवति । अप्पा अप्पाणो । अत्ता अत्ताणो । भप्पो भस्सो भस्म ॥

ड्मक्मोः ॥ ४३ ॥

ड्मक्म इत्येतयोः पो भवति । कुड्मलं कुप्पलं । रुक्मिणी रुप्पिणी । क्वचिद् मोऽपि–रुम्मी रुप्पी रुक्मी ॥

ष्पस्फोः फः ॥ ४४ ॥

ष्प स्प–इत्येतयोः फो भवति । ष्प–पुष्पं पुप्फं । शष्पं सप्फं । निष्पावः णिप्फावो । निष्पेषः णिप्फेसो । स्प–स्पन्दनं फंदणं । प्रतिस्पर्द्धी पडिप्फद्धी ॥

भीष्मे ॥ ४५ ॥

फइत्यनुवर्तते । भीष्मे स्तोः फत्वं भवति । भिप्फो ॥

श्लेष्मबृहस्पतौ तु फोः ॥ ४६ ॥

अनयोः फोर्द्वितीयस्य संयुक्तस्य फो भवति तु । सेप्फो सेम्महो बिहप्फई बहप्पई ॥

ग्मो मः ॥ ४७ ॥

ग्मस्य मो भवति तु । जुम्मं जुग्गं युग्मम् । तिग्गं तिम्मं तिग्मम् ॥

न्मः ॥ ४८ ॥

न्मस्य मो भवति । पृथग्योगान्नित्यम् । जम्मो जन्म । मम्महो मन्मथः । मम्मणो मन्मनः ॥

ताम्राम्रयोर्म्बः ॥ ४९ ॥

अनयोः संयुक्तस्य मकाराक्रान्तो बकारो भवति । तम्बं ताम्रम् । अम्बं आम्रम् । तंम्बीरं अंम्बीरं–इत्येतौ देश्यौ ॥

ऊर्ध्वे भो वा ॥ ५० ॥

ऊर्ध्वे स्तोर्भो वा भवति । उब्भं उद्धं ॥

ह्वः ॥ ५१ ॥

भो वेत्यनुवर्तते । ह्वस्य भो वा भवति । जिब्भा जीहा जिह्वा ॥

भश्च विह्वले ॥ ५२ ॥

विह्वले संयुक्तस्य वकारस्य भो वा भवति । विब्भलो विह्वलो ॥

काश्मीरे म्भः ॥ ५३ ॥

काश्मीरे संयुक्तस्य म्भ इत्यादेशो भवति । कम्भारं कम्हारं ॥

लो वाऽऽर्द्रे ॥ ५४ ॥

आर्द्रे स्तोर्लत्वं वा भवति । पुनर्वाग्रहणादुत्तरत्र न विकल्पः । अल्लं उल्लं ओल्लं अद्दं उद्दं ओद्दं ॥

र्यः सौकुमार्यपर्यस्तपर्याणे ॥ ५५ ॥

एषु र्यस्य लो भवति । सोअमल्लं सौकुमार्यम् । पल्लट्टं पर्यस्तम् । पल्लाणं पर्याणम् । पल्लङ्को इति तु पल्यङ्कस्य ॥

अररिअ(१)रिज्जमाश्चर्ये ॥ ५६ ॥

आश्चर्ये र्यस्य अर रिअ रिज्ज इति त्रय आदेशा भवन्ति । अच्चअरं अच्चरिअं अच्चरिज्जं ॥

डेरो ब्रह्मचर्यसौन्दर्ये च ॥ ५७ ॥

ब्रह्मचर्यसौन्दर्ययोः चकारादाश्चर्ये च र्यस्य डित् एर इत्यादेशो भवति । बह्मचेरं । सुन्देरं । अच्चेरं । डित्वात्टिलोपः । चौर्यसमत्वात् । बह्मचरिअं । सुन्दरिअं । अच्चरिअं ॥

वा पर्यन्ते ॥ ५८ ॥

पर्यन्ते र्यस्य डेरो वा भवति । पेरन्तो पज्जन्तो ॥

धैर्ये रः ॥ ५९ ॥

वेत्यनुवर्तते । धैर्ये र्यस्य रो वा भवति । धीरं धिज्जं ॥

तूर्यदशार्हशौण्डीर्ये ॥ ६० ॥

एषु स्तोः रो भवति । पृथग्योगान्नित्यम् । तूरं । दसारो । सोण्डीरं ॥

बाष्पे होऽश्रुणि ॥ ६१ ॥

अश्रुवाचिनि बाष्पशब्दे स्तोर्हो भवति । बाहो नेत्रजलम् । अश्रुणीति किम् ? वप्फो ऊष्मा ॥

---

(१) अररीअरिज्जमाश्चर्ये—इति ग० पु० पाठः ।

कार्षापणे ॥ ६२ ॥

कार्षापाणे स्तोर्हो भवति । काहावणो । बहुलाधिकारात्–कासावणो । कहावणो इत्यत्र 'संयोगे' इति पूर्वमेव ह्रस्वः, पश्चादादेशः । अथवा कर्षापणशब्दात् सिद्धिः ॥

न वा तीर्थदुःखदक्षिणदीर्घे ॥ ६३ ॥

एषु संयुक्तस्य हत्वं न वा भवति । तूहं तित्थं तीर्थम् । दुहं दुक्खं दुःखम् । दुहिओ दुक्खिओ दुःखितः । दाहिणो दक्खिणो दक्षिणः । दीहो दीहरो दिग्घो दीर्घः ॥

कूष्माण्ड्यां ण्डश्च तु लः ॥ ६४ ॥

कूष्माण्डीशब्दे प्रथमस्य संयुक्तस्य हकारो भवति, ण्ड इत्यस्य लत्वं तु भवति । कोहली कोहंडी । कोहली–इत्यत्र 'संयोगे' इति प्रागेव ह्रस्वः, पश्चाल्लत्वम् ॥

त्वथ्वद्वध्वां क्वचिच्चछजझाः ॥ ६५ ॥

एतेषां यथासंख्यं च छ ज झ—इत्येते क्वचित् प्रयोगानुसारेण भवन्ति । च–भुक्त्वा भोच्चा । ज्ञात्वा णच्चा । श्रुत्वा सोच्चा । छ–पृथ्वी पिच्छी । ज–विद्वान् विज्जं । झ–ध्वनिः झणी । बुद्ध्वा बुज्झा । सअलपिच्छीविज्जं सकलपृथ्वीविद्वान् ॥

ह्लो ल्हः ॥ ६६ ॥

ह्लकारस्य लकाराक्रान्तो हकारो भवति । कल्हारं कल्हारम् । पल्हादो प्रह्लादः ॥

श्मष्मस्मह्मामस्मररश्मौ म्हः ॥ ६७ ॥

एषां म्ह इत्यादेशो भवति, स्मररश्मिशब्दौ वर्जयित्वा । कम्हारो काश्मीरः । गिम्हो ग्रीष्मः । उम्हा ऊष्मा । विम्हओ विस्मयः । अम्हारिसो अस्मादृशः । बम्हा ब्रह्मा, बम्हणो । बम्हचेरं ब्रह्मचर्यम् । अस्मररश्माविति किम् ? सरो । स्मरः । रस्सी रश्मिः ॥

पक्ष्मणि ॥ ६८ ॥

काश्मीरे म्भः ॥ ५३ ॥

काश्मीरे संयुक्तस्य म्भ इत्यादेशो भवति । कम्भारं कम्हारं ॥

लो वाऽऽर्द्रे ॥ ५४ ॥

आर्द्रे स्तोर्लत्वं वा भवति । पुनर्वाग्रहणादुत्तरत्र न विकल्पः । अल्लं उल्लं ओल्लं अद्दं उद्दं ओद्दं ॥

र्यः सौकुमार्यपर्यस्तपर्याणे ॥ ५५ ॥

एषु र्यस्य लो भवति । सोअमल्लं सौकुमार्यम् । पल्लट्टं पर्यस्तम् । पल्लणं पर्याणम् । पल्लङ्को इति तु पल्यङ्कस्य ॥

अररिअ(१)रिज्जमाश्चर्ये ॥ ५६ ॥

आश्चर्ये र्यस्य अर रिअ रिज्ज इति त्रय आदेशा भवन्ति । अच्चअरं अच्चरिअं अच्चरिज्जं ॥

डेरो ब्रह्मचर्यसौन्दर्ये च ॥ ५७ ॥

ब्रह्मचर्यसौन्दर्ययोः चकारादाश्चर्ये च र्यस्य डित् एर इत्यादेशो भवति । बह्मचेरं । सुन्देरं । अच्चेरं । डित्वात्‌टिलोपः । चौर्यसमत्वात् । बह्मचरिअं । सुन्दरिअं । अच्चरिअं ॥

वा पर्यन्ते ॥ ५८ ॥

पर्यन्ते र्यस्य डेरो वा भवति । पेरन्तो पज्जन्तो ॥

धैर्ये रः ॥ ५९ ॥

वेत्यनुवर्तते । धैर्ये र्यस्य रो वा भवति । धीरं धिज्जं ॥

तूर्यदशार्हशौण्डीर्ये ॥ ६० ॥

एषु स्तोः रो भवति । पृथग्योगान्नित्यम् । तूरं । दसारो । सोण्डीरं ॥

बाष्पे होऽश्रुणि ॥ ६१ ॥

अश्रुवाचिनि बाष्पशब्दे स्तोर्हो भवति । बाहो नेत्रजलम् । अश्रुणीति किम् ? बप्फो ऊष्मा ॥

---

(१) अररीअरिज्जमाश्चर्ये—इति ग० पु० पाठः ।

कार्षापणे ॥ ६२ ॥

कार्षापणे स्तोर्हों भवति । काहावणो । बहुलाधिकारात्–कासावणो । कहावणो इत्यत्र 'संयोगे' इति पूर्वमेव ह्रस्वः, पश्चादादेशः । अथवा कर्षापणशब्दात् सिद्धिः ॥

न वा तीर्थदुःखदक्षिणदीर्घे ॥ ६३ ॥

एषु संयुक्तस्य हत्वं न वा भवति । तूहं तित्थं तीर्थम् । दुहं दुक्खं दुःखम् । दुहिओ दुक्खिओ दुःखितः । दाहिणो दक्खिणो दक्षिणः । दीहो दीहरो दिग्घो दीर्घः ॥

कूष्माण्ड्यां ण्डश्च तु लः ॥ ६४ ॥

कूष्माण्डीशब्दे प्रथमस्य संयुक्तस्य हकारो भवति, ण्ड इत्यस्य लत्वं तु भवति । कोहली कोहंडी । कोहली–इत्यत्र 'संयोगे' इति प्रागेव ह्रस्वः, पश्चाल्लत्वम् ॥

त्वथ्वद्ध्वां कचिच्चछजझाः ॥ ६५ ॥

एतेषां यथासंख्यं च छ ज झ—इत्येते कचित् प्रयोगानुसारेण भवन्ति । च–भुक्त्वा भोच्चा । ज्ञात्वा णच्चा । श्रुत्वा सोच्चा । छ–पृथ्वी पिच्छी । ज–विद्वान् विज्जं । झ–ध्वनिः झणी । बुद्ध्वा बुज्झा । । सअलपिच्छीविज्जं सकलपृथ्वीविद्वान् ॥

ह्लो ह्लः ॥ ६६ ॥

ह्लकारस्य लकाराक्रान्तो हकारो भवति । कह्लारं कल्हारम् । पह्लादो प्रह्लादः ॥

श्मष्मस्मह्मामस्मररश्मौ ह्मः ॥ ६७ ॥

एषां ह्म इत्यादेशो भवति, स्मररश्मिशब्दौ वर्जयित्वा । कह्मारो काश्मीरः । गिह्मो ग्रीष्मः । उह्मा ऊष्मा । विह्मओ विस्मयः । अह्मारिसो अस्मादृशः । बह्मा ब्रह्मा, बह्मणो । बह्मचेरं ब्रह्मचर्यम् । अस्मररश्माविति किम्? सरो । स्मरः । रस्सी रश्मिः ॥

पक्ष्मणि ॥ ६८ ॥

ह्म इत्यनुवर्तते। पद्मशब्दे स्तोः ह्म इत्यादेशो भवति। पह्माइ पद्माणि। पह्मललोअणो पद्मललोचनः॥

श्नष्णस्नह्नह्लक्ष्णां ण्हः॥ ६९॥

एषां ण्ह इत्यादेशो भवति श्न–प्रश्नः पण्हो। शिश्नः शिण्हो। ष्ण—विष्णुः विण्हू। जिष्णुः जिण्हू। कृष्णः किण्हो। उष्णीषम् उण्हीसं। स्न—स्नातः ण्हाओ। प्रस्नवः पण्हवो। ज्योत्स्ना जोण्हा। ह्न—जह्नुः जण्हू। ह्ल–पूर्वाह्लः पुव्वण्हो। अपराह्लः अवरण्हो। क्ष्ण–श्लक्ष्णं सण्हं। तीक्ष्णं तिण्हं॥

सूक्ष्मे॥ ७०॥

सूक्ष्मे संयुक्तस्य ण्हो भवति। सुण्हं॥

आश्लिष्टे लधौ॥ ७१॥

आश्लिष्टे संयुक्तयोर्यथासंख्यं लधौ भवतः। आलिद्धो॥

ठढौ स्तब्धे॥ ७२॥

स्तब्धे संयुक्तयोर्यथासंख्यं ठढौ भवतः। ठड्ढो॥

तो ढो रश्चारब्धे तु॥ ७३॥

आरब्धे स्तोः तकारो भवति तु, तत्संनियोगेन रस्य च ढः। आढत्तो आरद्धो॥

सो बृहस्पतिवनस्पत्योः॥ ७४॥

अनयोः संयुक्तस्य सकारो भवति तु। बहस्सई बहप्फई विहस्सई विहप्फई। वणस्सई वणप्फई॥

शोर्लुक् खोः स्तम्बसमस्तनिस्पृहपरस्परश्मशानश्मश्रौ॥ ७५॥

स्तम्बादिषु शोः शषसानां खोरादौ वर्तमानानां संयुक्तसम्बन्धिनां लुग्भवति। तम्बो। समत्तो। निप्पिहो। परोप्परं। मसाणं। मंसु॥

श्चस्य हरिश्चन्द्रे॥ ७६॥

हरिश्चन्द्रे श्चस्य लुग्भवति। हरिअन्दो॥

कगटडतदपᳲकᳲपशोरुपर्यद्रे॥ ७७॥

कगटडतदपानां जिह्वामूलीयोपध्मानीययोः शोः शषसानां च संयुक्तसम्ब-

न्धिनामुपरि स्थितानां लुग्भवति, द्रकारं वर्जयित्वा क—भुक्तं भुत्तं । सिक्थं सित्थं । ग-दुग्धं दुद्धं । मुग्धं मुद्धं । ट-षट्पदः छप्पओ । कट्फलं कप्फलं । ड-खड्गः खग्गो । षड्जः सज्जो । त-उत्पलम् उप्पलं । उत्पातः उप्पाओ । द-मद्गुः मग्गू । मुद्गरः मोग्गलो । उद्विग्नः उव्विग्गो । प-सुप्तः सुत्तो । गुप्तः गुत्तो । ≍क—दुःखं दुक्खं । ≍प—अन्तःपातः अन्तप्पाओ । श—निश्चलः निच्चलो । श्लक्ष्णं लण्हं । श्च्योतति चुअइ । ष—गोष्ठी गोट्ठी । षष्ठः चट्ठो । स-स्खलितः खलिओ । स्नेहः णेहो । अद्र इति किम् ? समुद्दो । चंदो । भद्दं । अद्र इति निषेधोऽयं 'धात्रीद्रे रस्त्वि'ति विकल्पिते रेफलोपेऽप्राप्ते दकारलोपो मा भूदिति ॥

लवरामधश्च ॥ ७८ ॥

लवरां संयुक्तस्याऽधो वर्तमानानां चकारादुपरि स्थितानां च लुग्भवति । अधः, ल—श्लक्ष्णं सण्हं । विक्लवः विक्कओ । व—पक्वः पक्को । विध्वस्तः विद्धत्था । र—चक्रं चक्कं । ग्रहः गहो । रात्रिः रत्ती । उपरि, ल—उल्का उक्का । वल्कलं वक्कलं । व—शब्दः सद्दो । अब्दः अद्दो । लुब्धकः लुद्धओ । र—अर्कः अक्को । तर्कः तक्को ॥

मनयाम् ॥ ७९ ॥

संयुक्तस्याऽधो वर्तमानानां मनयां लुग्भवति । म—युग्मं जुग्गं । रश्मिः रस्सी । स्मरः सरो । न—नग्नः नग्गो । लग्नः लग्गो । मग्नः मग्गो । य-श्यामा सामा । कुड्यं कोड्डं । अत्र द्वितीयकल्मषमाल्यादिष्वेतत्सूत्रत्रयविधिप्राप्तौ यथादर्शनं लोपः । द्वितीयः बिइओ । द्विगुणः बिउणो । द्वादश बारह । द्वाविंशतिः बावीसा । द्वात्रिंशत् बत्तीसा । कल्मषं कम्मसं । शुल्बं सुब्बं । क्वचित्तु अधः-द्विपः दिवो । द्वीपः दीवो । द्विजातिः दिआई । काव्यं कव्वं । दिव्यं दिव्वं । माल्यं मल्लं । कुल्या कुल्ला । क्वचित्पर्यायेण—उद्विग्नः उद्दिग्गो उव्विण्णो । रेफस्य तु सर्वत्रैव—सव्वं । वक्कं । चक्कं । 'सर्वत्र लवरामचन्द्रे इति केचित्, तदयुक्तम् । चंदो चन्द्रो इति स्वयमेवोदाहृतत्वात् तथाविधप्रयोगदर्शनाच्च । उत्तरत्र सूत्रोक्तविकल्प एकऽभ्युपगन्तव्यः ॥

धात्रीद्रे रस्तु ॥ ८० ॥

धात्रीशब्दे द्रशब्दे च रेफस्य लुग्भवति तु। धात्री धत्ती धारी। ह्रस्वात् प्रागेव रलोपे-धाई। द्र-चंदो चंद्रो। मंदो मंद्रो। रुद्दो रुद्रो। भद्दं भद्रं। समुद्दो समुद्रो। 'ह्रदे दह्यो'रिति ह्रदशब्दस्य दह्योः स्थितिपरिवृत्तौ द्रह इति रूपम्, तत्र च दहो इति। केचिन्नेच्छन्ति द्रे रलोपम्। द्रहशब्दः संस्कृतेऽपीति केचित्। द्रहादयस्तरुणपुरुषवाचका नित्यं रेफसंयुक्ता देश्या एव। सिक्खंतु वो द्रही द्रहम्मि पडिआ शिक्ष्यतां वस्तरुणी तरुणे पतिता।

ह्रस्य मध्याह्ने ॥ ८१ ॥

मध्याह्ने ह्रस्य लुग्वा भवति। मज्झण्णो मज्झह्नो ॥

ज्ञो ञोऽविज्ञाने ॥ ८२ ॥

ज्ञकारसम्बन्धिनो ञकारस्य लुग्भवति तु, अविज्ञाने विज्ञानशब्दे न भवति। ज्ञानं जाणं णाणं। सर्वज्ञः सव्वज्जो सव्वण्णो। आत्मज्ञः अप्पज्जो अप्पण्णो। दैवज्ञः दइवज्जो दइवण्णो। इङ्गितज्ञः इंगिअज्जो इंगिअण्णो। अभिज्ञः अहिज्जो अहिण्णो। मनोज्ञं मणोज्जं मणोण्णो। प्रज्ञा पज्जा पण्णा। आज्ञा अज्जा अण्णा। संज्ञा सज्जा सण्णा। अविज्ञान इति किम्? विण्णाणं ॥

द्वोर्द्वारे ॥ ८३ ॥

द्वारे दकारवकारयोः पर्यायेण लुग्भवति तु। दारं वारं। पक्षे दुवारं देरं वेरं ॥

रात्रौ ॥ ८४ ॥

रात्रिशब्दे संयुक्तस्य लुग्भवति तु। राई रत्ती ॥

रितो द्वित्वल् ॥ ८५ ॥

रेफानुबन्धस्य आदेशव्यञ्जनस्य द्वित्वं लिङ्भवति। अंकोल्लं अङ्कोलः। रुण्णं रुदितम्। करणिज्जं करणीयम् ॥

शेषादेशस्याऽह्रोऽचोऽखोः ॥८६॥

द्वित्वमिति वर्तते। संयुक्तयोरेकतरस्य लोपे योऽवशिष्यते स शेषः, तस्य संयुक्तादेशस्य च अह्रः हकाररेफवर्जितस्यअचः स्वरात् परस्य अखोरनादौ वर्तमानस्य द्वित्वं लिङ्भवति। शेषः—समस्तः समत्तो। निस्पृहः निप्पिहो

भुक्तं भुत्तं। दुग्धं दुद्धं। षट्पदः छप्पओ। खड्गः खग्गो। उत्पलम् उप्पलं। मुद्गरः मुग्गरो। प्राप्तः पत्तो। दुर्गं दुग्गं। दुःखं दुक्खं। अन्तःपातः अन्तप्पाओ। निश्चलः णिच्चलो। दुष्करं दुक्करं। विप्लवः विप्पओ। पक्कं पक्कं। धूर्तः धुत्तो। रात्रिः रत्ती। युक्तं जुत्तं। युग्मं जुग्गं। रश्मिः रस्सी। नग्नः नग्गो। काव्यं कव्वं। आदेशः–रक्तः रग्गो। सक्तः सग्गो। अमात्यः अमच्चो। आत्मा अप्पा। आर्या अज्जा। उपाध्यायः उवज्झाओ। सह्यः सज्झो। साध्वसं सज्झसं। बृहस्पतिः बहप्फई। अह्व इति किम्? विह्वलः विहलो। दुःखं दुहं। बाष्पः बाहो। धात्री धारी। तूर्यं तूरं। धैर्यं धीरं। अच इति किम्? कंसं कांस्यम्। वयस्यः वअंसो। सन्ध्या संझा। भिन्दिपालः भिंडिवालो। अखो-रिति किम्? स्खलितः खलिओ। स्थूलः थूरो। स्तम्भः खंभो॥

दीर्घान्न ॥ ८७ ॥

शेषादेशस्येति वर्तते। लाक्षणिकादलाक्षणिकाच्च दीर्घात् परयोः शेषादेशयोः द्वित्वं न भवति। लाक्षणिकात्–णीसासो निश्वासः। फासो स्पर्शः। दाढा दंष्ट्रा। अप्फासो अस्पर्शः। अलाक्षणिकात्—पार्श्वं पासं। शीर्षं सीसं। ईश्वरः ईसरो। द्वेष्यः वेसो। लास्यं लासं। आस्यम् आसं। प्रेष्यः पेसो। निर्मा-ल्यम् ओमालं। आज्ञा आणा। आज्ञप्तिः आणत्ती। आज्ञापनम् आणावणं। अमच्चो इत्यादिषु 'संयोग' इति आदावेव ह्रस्वः, पश्चाल्लोपे द्वित्वम्। अ-लाक्षणिकात् प्रायो द्वित्वाभावः प्रयोगतोऽनुसर्तव्यः॥

कर्णिकारे णो वा ॥ ८८ ॥

कर्णिकारे शेषस्य णस्य द्वित्वं वा न भवति। कणिआरो कण्णिआरो। णग्रहणमुत्तरार्थम्॥

धृष्टद्युम्ने ॥ ८९ ॥

आदेशस्य णस्य द्वित्वं न भवति। पृथग्योगान्न विकल्पः। धट्ठज्जुणो॥

वा से ॥ ९० ॥

से समासे शेषादेशयोर्द्वित्वं वा भवति। णइग्गामो णइगामो। कुसुम-प्पअरो कुसुमपअरो। देवत्थुई देवथुई। हरक्कन्दा हरकन्दा हरस्कन्दौ। आणाल-क्खंभो आणालखंभो॥

प्रमुक्तगे ॥ ९१ ॥

भुक्तं भुत्तं । दुग्धं दुद्धं । षट्पदः छप्पओ । खड्गः खग्गो । उत्पलम् उप्पलं । मुद्गरः मुग्गरो । प्राप्तः पत्तो । दुर्गं दुग्गं । दुःखं दुक्खं । अन्तःपातः अन्तप्पाओ । निश्चलः णिच्चलो । दुष्करं दुक्करं । विप्लवः विप्पओ । पक्वं पक्कं । धूर्तः धुत्तो । रात्रिः रत्ती । युक्तं जुत्तं । युग्मं जुग्गं । रश्मिः रस्सी । नग्नः नग्गो । काव्यं कव्वं । आदेशः—रक्तः रग्गो । सक्तः सग्गो । अमात्यः अमच्चो । आत्मा अप्पा । आर्या अज्जा । उपाध्यायः उवज्झाओ । सह्यः सज्झो । साध्वसं सज्झसं । बृहस्पतिः बहप्फई । अह्व इति किम् ? विह्वलः विहलो । दुःखं दुहं । बाष्पः बाहो । धात्री धारी । तूर्यं तूरं । धैर्यं धीरं । अच इति किम् ? कंसं कांस्यम् । वयस्यः वअंसो । सन्ध्या संझा । भिन्दिपालः भिंडिवालो । अखो-रिति किम् ? स्खलितः खलिओ । स्थूलः थूरो । स्तम्भः खंभो ॥

दीर्घान्न ॥ ८७ ॥

शेषादेशस्येति वर्तते । लाक्षणिकादलाक्षणिकाच्च दीर्घात् परयोः शेषादेशयोः द्वित्वं न भवति । लाक्षणिकात्—णीसासो निश्वासः । फासो स्पर्शः । दाढा दंष्ट्रा । अप्फासो अस्पर्शः । अलाक्षणिकात्—पार्श्वं पासं । शीर्षं सीसं । ईश्वरः ईसरो । द्वेष्यः वेसो । लास्यं लासं । आस्यम् आसं । प्रेष्यः पेसो । निर्मा-ल्यम् ओमालं । आज्ञा आणा । आज्ञप्तिः आणत्ती । आज्ञापनम् आणावणं । अमच्चो इत्यादिषु 'संयोग' इति आदावेव ह्रस्वः, पश्चाल्लोपे द्वित्वम् । अ-लाक्षणिकात् प्रायो द्वित्वाभावः प्रयोगतोऽनुसर्तव्यः ॥

कर्णिकारे णो वा ॥ ८८ ॥

कर्णिकारे शेषस्य णस्य द्वित्वं वा न भवति । कणिआरो कण्णिआरो । णग्रहणमुत्तरार्थम् ॥

धृष्टद्युम्ने ॥ ८९ ॥

आदेशस्य णस्य द्वित्वं न भवति । पृथग्योगान्न विकल्पः । धट्ठज्जुणो ॥

वा से ॥ ९० ॥

से समासे शेषादेशयोर्द्वित्वं वा भवति । णइग्गामो णइगामो । कुसुम-प्पअरो कुसुमपअरो । देवत्थुई देवथुई । हरक्कन्दा हरकन्दा हरस्कन्दौ । आणाल-क्खंभो आणालखंभो ॥

प्रमुक्तगे ॥ ९१ ॥

हस्ती । हत्थो हस्तः । णिद्धणो निर्धनः । आलिद्धो आश्लिष्टः । गुल्फं गुप्फं । पुष्पं पुप्फं । णिब्भरो निर्भरः । विब्भमो विभ्रमः । पिप्पलः विंचूलो । प्रमुक्तादौ द्वित्वे मलअसिहरक्खंडं । दैवादौ णक्खो । तैलादौ ओक्खलं । समासे कइद्धओ कपिध्वजः । द्वित्व इत्येव-ख्यातः खाओ ॥

प्राक् श्लाघाप्लक्षशार्ङ्गे ङ्लोऽत् ॥ ९५ ॥

श्लाघादिषु ङ्लः, ङकारलकारयोः प्राक् अत् अकारो भवति । सलाहा श्लाघा । पलक्खो प्लक्षः । सारंगं शार्ङ्गम् ॥

क्ष्मारत्नेऽन्त्यहलः ॥ ९६ ॥

प्रागित्यनुवर्तते, अदिति च । क्ष्माशब्दे रत्नशब्दे च संयुक्तस्याऽन्त्यहलः अन्त्यव्यञ्जनस्य प्रागत्वं भवति । छमा खमा क्ष्मा । रअणं रत्नम् ॥

स्नेहाग्न्योर्वा ॥ ९७ ॥

अन्त्यहल इति वर्तते । स्नेहाग्न्योः संयुक्तस्याऽन्त्यहलः प्रागत्वं वा भवति । सणेहो णेहो । अगणी अग्गी ॥

र्शर्षतप्त(१)वज्रेष्वित् ॥ ९८ ॥

र्शर्षइत्येतयोस्तप्ते वज्रे च संयुक्तस्याऽन्त्यहलः प्रागित्वं वा भवति । र्श- आदर्शः आअरिसो आअसो । सुदर्शनः सुअरिसणो सुदंसणो । दर्शनम् दरिसणं दंसणं । र्ष-वर्ष वरिसं वासं । वर्षाः वरिसा वासा । वर्षशतं वरिससअं वाससअं । तप्तः तविओ तत्तो । वज्रं वइरं वज्जं ॥

हर्षाऽमर्षश्रीह्रीक्रियापरामर्शकृत्स्नदिष्ट्यार्हे ॥ ९९ ॥

हर्षादिषु र्ह इत्यत्र च संयुक्तस्याऽन्त्यहलः प्रागित्वं भवति । पृथग्योगान्नित्यम् । हरिसो हर्षः । अमरिसो अमर्षः । सिरी श्रीः । हिरी ह्रीः । अहिरिओ अह्रीकः । किरिआ क्रिया । परामरिसो परामर्शः । कसिणं कृत्स्नम् । दिट्ठिआ दिष्ट्या । र्ह-अरिहो अर्हः । गरिहा गर्हा । बरिहो बर्हः ॥

स्याद्भव्यचैत्यचौर्यसमे यात् ॥ १०० ॥

स्याद्भव्यचैत्य इत्येतेषु चौर्यसमेषु च यकारात् प्रागित्वं भवति । स्यात् सिआ । स्याद्वादः सिआवाओ । भविओ भव्यः । चेइअं चैत्यम् । चौर्यसमे- चौर्यं चोरिअं । गाम्भीर्यं गंभीरिअं । धैर्यं धीरिअं । भार्या भारिआ । सौन्दर्यं

---

(१) र्शर्षवज्रतप्तेष्वित्—इति क. पु. पाठः ।

सुंदरिअं । ब्रह्मचर्यं बह्मचरिअं । सूर्यः सूरिओ । शौर्यं सोरिअं । आचार्यः आअरिओ । वर्यः वरिओ । वीर्यं वीरिअं । चर्या चरिआ । स्थैर्यं थेरिअं । इत्यादि । आकृतिगणत्वात्–पर्यङ्कादयः, पलिअंको पर्यङ्कः ॥

लादक्लीबेषु ॥ १०१ ॥

संयुक्तस्य लकारात् प्रागित्वं भवति, अक्लीबेषु क्लीबप्रकारेषु न भवति । किलिन्नं क्लिन्नम् । किलिट्ठं क्लिष्टम् । किलित्तं क्लृप्तम् । पिलिट्ठं प्लुष्टम् । किलिन्नं क्लान्तम् । प्लोषः पिलोसो । श्लेष्मा सिलिह्मो । श्लेषः सिलेसो । शुक्लं सुकिलं । क्लेदः किलेओ । क्लेशः किलेसो । प्लवः पिलेवो । अम्लम् अम्बिलं । ग्लायति गिलाअइ । म्लायते मिलाअइ । म्लानं मिलाणं । क्लाम्यति किलामइ । अक्लीबेष्विति किम् ? क्लीबः कीवो । विक्लवः विक्कओ । क्लमः कमो । प्लवः पओ । विप्लवः विप्पओ । शुक्लपक्षः सुक्कपक्खो । उत्प्लावयति उप्पावेइ ॥

नात् स्वप्ने ॥ १०२ ॥

स्वप्ने संयुक्तस्य नकारात् प्रागित्वं भवति । सिविणो सिमिणो ॥

स्निग्धे त्वदितौ(१) ॥ १०३ ॥

नादिति वर्तते । स्निग्धे संयुक्तस्य नकारात् प्रागत्वमित्वं च तु भवतः । सिणिद्धं सणिद्धं । पक्षे णिद्धं ॥

कृष्णे वर्णे ॥ १०४ ॥

अदिताविति वर्तते । वर्णवाचिनि कृष्णशब्देऽन्त्यहलः प्रागदितौ भवतः । कसणो कसिणो । वर्ण इति किम् ? कण्हो कृष्णः (विष्णुः) ॥

अर्हत्युच्च ॥ १०५ ॥

अर्हशब्देऽन्त्यहलः प्रागुत्त्वमदितौ च भवन्ति । अरुहो अरहो अरिहो । अरुहितो अरिहितो अरहतो ॥

तन्व्याभे ॥ १०६ ॥

उदित्यनुवर्तते । उकारान्ता ईकारप्रत्ययान्तास्तन्व्याभास्तेषु संयुक्तस्याऽन्त्यहलः प्रागुत्वं भवति । तन्वी तणुई । लघ्वी लहुई । गुर्वी गुरुई । पृथ्वी पुहुई । मृद्वी मउई । बह्वी बहुई । पट्वी पटुई । इत्यादि ॥

स्रुघ्ने रात् ॥ १०७ ॥

(१) स्निग्धे तु —इति क. पु. पाठः ।

स्रुघ्ने संयुक्तस्य रात्पूर्वमुत्वं भवति । सुरुग्घं नगरम् ॥

एकाचि श्वःस्वे ॥ १०८ ॥

एकस्वरयोः श्वः स्व इत्येतयोः संयुक्तस्याऽन्त्यहलः प्रागुत्वं भवति । श्वः कृतं सुवो कअं । स्वे जनाः सुवे जणा । एकाचीति किम् ? स्वजनः सजणो ॥

वा छद्मपद्ममूर्खद्वारे ॥ १०९ ॥

एषु स्तोरन्त्यहलः प्रागुत्वं वा भवति । छउमं छम्मं । पउमं पम्मं । मुरुक्खो मुक्खो । दुवारं पक्षे दारं वारं देरं वेरं ॥

ईल् ज्यायाम् ॥ ११० ॥

ज्याशब्देऽन्यहलः प्रागीत्वं लिद्भवति । जीआ ॥

ह्रश्च महाराष्ट्रे ह्रोर्व्यत्ययः ॥ १११ ॥

स्तोरिति निवृत्तम् । महाराष्ट्रशब्दे ह्रोः हकाररेफयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति । एकस्य स्थाने एको भवतीत्यर्थः । ह्रश्च ह्रस्वश्च दीर्घस्य भवति । मरहट्ठो॥

लनोरालाने ॥ ११२ ॥

आलाने लकारनकारयोर्व्यत्ययो भवति । आणालो ॥

वाराणसीकरेण्वां रणोः ॥ ११३ ॥

अनयो रेफणकारयोर्व्यत्ययो भवति । वाणारसी । कणेरू । करेण्वामिति किम् ? स्त्रीलिङ्गनिर्देशादन्यत्र न भवति । एसो करेणू ॥

ललाटे डलोः ॥ ११४ ॥

ललाटे टस्य डत्वे डलयोर्व्यत्ययो भवति । णिडालं णडालं । 'लो ललाटे च' इत्याद्यस्य णत्वमेव ॥

ह्रदे दहयोः ॥ ११५ ॥

ह्रदे दहयोर्व्यत्ययो भवति । द्रहो दहो ॥

चलयोरचलपुरे ॥ ११६ ॥

अचलपुरे चलयोर्व्यत्ययो भवति । अलअउरं ॥

ह्ये ह्योर्वा ॥ ११७ ॥

ह्यशब्दे हकारयकारयोर्व्यत्ययो वा भवति । गुह्यं गुय्हं गुज्झं गुरुअहं । सह्यं सय्हं सज्झं सहिअहं ॥

लघुके हलोः ॥ ११८ ॥

लघुकशब्दे घस्य हत्वे हलोर्व्यत्ययो वा भवति। हलुओ लहुओ। घस्य व्यत्यये कृते पदादित्वात् हत्वं न भवतीति हत्वकरणम् ॥

रलोर्हरिताले ॥ ११९ ॥

हरिताले रलोर्व्यत्ययो भवति। हरिआलो हलिआरो।

दर्वीकरनिवहौ दव्विरअणिहवौ ॥ १२० ॥

एतयोर्यथासंख्यं दव्वीरअ णिहव इति कृतव्यत्ययविधानौ निपात्येते। दव्विरओ। पक्षे दव्वीअरो सर्पः। णिहवो॥

गहिआऽऽद्याः ॥ १२१ ॥

गहिआ इत्यादयः शब्दा निर्वचनगोचरा निपात्यन्ते। गहिआ काम्यमाना ग्राह्या, काम्यमानत्वात्। ह्रस्वः। चौर्यसमत्वात् प्रागित्वं च। किमिघरवसणं कौशेये, कृमिगृहवसनम्। कृमिविहितावरणादेव तत्तन्तोरुत्पत्तेः। णंदिणी धेनुः। नन्दिनीव नन्दिनी। वडिणाओ घर्घरकण्ठः। प्रतिशब्दवत्त्वात् ध्वनेः प्रतिपादनत्वाद्वा। वइरोडो पतिं रोटयति वञ्चयतीति। पो वः। टो डः। अविणअवई अविनयपतिः। अणडो अनृतम्। प्रत्यादिपाठात्तस्य डः। अजडो अजडः, शीघ्रकारित्वात्। छिण्णो स्मरशरच्छिन्नत्वात्। छिण्णालो सदाचारच्छिन्नां लीत्यादत्त इति। चिच्छओ अच्छिन्नतः, नयनप्रीत्यनर्हत्वात्। अदणोरकारस्य लुक्। मदोली कामपरम्पराकारणत्वात्। आदेरातोऽत्। संचारी प्रीतिं सञ्चारयतीति दूती। सहउत्थिआ सहोत्थिता, कार्यानुकूलत्वात्। मराली मृदुस्वभावात् मधुरवचनत्वाद्वा। पेसणआरी प्रेषणं करोतीति। अत्तिहरी दूती आर्तिहरी, संतर्पणशीलत्वात्। पडिसोत्तो प्रतिकूले, प्रतिमुखं स्रोतः प्रवाहो यस्यासौ। पडिक्खरो प्रतिकूले, प्रतिमुखं क्षरतीति। जोओ, दोसणिजन्तो, दोसारअणो, समुद्दणवणीअं, चन्द्रः। द्योतत इति द्योतः। ज्योत्स्नायन्त्रम्। आत इः। जस्य दः। नात्प्रागत्वम्। दोषारत्नम्। समुद्रनवनीतम्, मथनोत्थितत्वात्। चिरिचिरिआ चिलिचिलिआ, धारा। चिरिचिरीति चिलिचिलीति ध्वनिर्यस्याः सा तथोक्ता। समुद्दहरं अम्बुगृहम्, जलधारोपचारात्। तम्बकुसुमं कुरवकं कुरण्टकं च ताम्रकुसुमं, तथाविधकुसुमत्वात्। मुहरोमराई भ्रूः श्मश्रूर्वा मुखरोमराजिः, तथा-

विधस्वरूपत्वात् । थेवो बिन्दुः, स्तोकत्वात् । धूमद्धअमहिसी कृत्तिकाः, धूमध्वजमहिष्यः, अग्निना संभुक्तत्वात् । विसारो सैन्यम् , विसरणशीलत्वात् । अवहोओ विरहः अपभोगः, भोगासहत्वात् । पाओ, पअलाओ फणी, प्राणिघातुकत्वात् । पापः । पदानि लायति निगूहतीति पदलापः । अहिअलो क्रोधः । अहिरिव वलति नाशयतीति अहिवलः । सिहिणं स्तनः चूचुकवत्त्वात् । अस्त्यर्थे णः । थिरणेसो यो न क्वचिदपि स्थितिं बध्नाति । स्थिरं यथास्यात्तथा न तिष्ठतीति थिरणेसो चपलहृदयः । सूरङ्गो दीपः । सूरवदङ्गं यस्यासौ । जोइक्खो ज्योतिष्कः । पासावओ, गवाक्षः । पासो इति प्राकृते चक्षुः, तदापद्यत इति पासावओ, अक्षि पश्यतीति पासो । कोप्पो अपराधः । आत्मनः कोप एवाऽपराधः । उम्मुहो उन्मुखः । उद्दणो उद्वहनः । हस्य वस्य च लुक् । पहट्ठो प्रधृष्टः, गर्वीत्यर्थः । लम्बा केशाः । लम्बन्त इति लम्बाः । वल्लीवत् वेल्ली । वल्लरीवत् वेल्लरिआ । आदेरत एः । स्वार्थे कश्च । जणहरो यज्ञहरो राक्षसः, तत्स्वभावत्वात् । जणउत्तो ग्रामप्रधाननरः जनपुत्रः, तद्वदाचरतीति । बह्महरं, आरनालं, थेरोसणं अम्बुजे । ब्रह्मगृहम् । आराद्दूरे समीपे च, नालमस्तीति आरनालं । द्वितीयस्यातोऽत् । स्थविरासनम्, स्थविरो ब्रह्मा । आत ओत् । कलिमं, कन्दोट्टं उत्पले । के लीयत इति कलिमं । डिमः । कन्दादुट्टीकृते उद्गच्छतीति कन्दोट्टं । 'स्तौ' इत्योत्वम् । चन्दोज्जं, रअणिद्धअं कुमुदम् । चन्द्रेण द्योतत इति चन्दोज्जं । रजनिध्वजम् । घरअंदं मुकुरम् । गृहे चन्द्रवदुद्योतत इति । आआसतअं हर्म्यपृष्ठम् , आकाशतलमिति । आणंदवसो नववध्वा रक्तारुणं वस्त्रम्, प्रथमरजस्वलाया रक्ताक्तः पटः, आनन्दविषयत्वात् । सूरद्धओ दिवसः । सूर्यो ध्वजो यस्यसः । पल्लविअं लाक्षारक्तं सपल्लवमिव पल्लवितम् । अच्छिवडणं निमीलनम्, अक्षिपक्ष्मणां पतनम् । णीसंको वृषः निःशङ्कः । एलविलो धनवांश्च, चकाराद्वृषश्च । सुभरओ दारिकागृहं चटकश्च । सुखं रतमस्यास्तीति । हट्ठमहट्ठो स्वस्थः । हृष्टश्चासौ महार्थश्च । णिमीसुओ निःश्मश्रुकः । आदेरत ई । जहणारोहो ऊरुः । जघनेनारुह्यत इति । पल्लोट्टजीहो, अउज्झहरो रहस्यभेदी । पर्यस्तजिह्वः । गुह्यहरः । आदावडागमः । णिहुअं निधुवनं सुरतं निभृतम् । अब्बुद्धसिरी मनोरथाधिकफलप्राप्तिः, अबुद्धश्रीः । प्रमुक्तादिपाठाद् द्वित्वम् । बहुजाणो चोरो धूर्तश्च बहुज्ञानः ।

परेओ परेतः पिशाचः । उज्जल्लो बहुबलवान् । दैवादिपाठाद् द्वित्वम् । जोई विद्युत् ज्योतिर्वा । भिंगं कृष्णं, भृङ्गवन्नीलत्वात् । भिंगं संस्कृत इत्येके । णिअद्धणं परिधानं, निबध्यत इति निबन्धनम् । जहणूसअं चल्लणकं, जघनांशुकम् । आतो बिन्दुना सह ऊत्वम् । पाउरणं कवचः, प्रावरणकत्वात् । आदेरत उः । ओअल्लो अपसारः कम्पश्च । अपचारे ओअल्लो । तैलादित्वाद् द्वित्वम् । चवेडी करसम्पुटाघातः । रइलक्खं रतिलक्ष्यं जघनम् । वावडो कुटुम्बी व्यापृतः । पुरिल्ला देवाः, दैत्याः । पुरा भवाः । गोसंणो मूर्खः गोसंज्ञः, पशुप्रायत्वात् । परभत्तो भीरुः, निष्पीडश्च । परः शत्रुस्तद्भक्तश्च । चच्चिक्को स्थासकः चर्चिका । को द्वित्वं पुंस्त्वं च । कालं तमिस्रम्, नीलत्वात् । भट्टिओ, विष्णुः भर्तृकः, जगत्पोषकत्वात् । ऋत इत् । इदग्गिद्धूमं तुहिनम्, इन्द्राग्निधूमः । पत्थरं पादताडनम् । प्रस्तरवत् पत्थरं दुःसहत्वात् । ओवाअओ अस्तकालः, अपातपः । पिउच्छा, माउआ सखी । पितृष्वसेव मातृकेव हितकारित्वात् । पोरत्थो मत्सरी, पौलस्त्यवत् । दोसो कोपः, आत्मदोषत्वात् । चच्चा चर्चा तलाहतिः । पम्हलो केसरः, पद्मलवत् । खन्धलट्ठी, खन्धमसो भुजस्कन्धस्य यष्टिः । स्कन्धं प्रमृशतीति । अग्गिआयो, तंबकिमी इन्द्रगोपः । अग्निवत्कायोऽस्येति अग्निकायः । ताम्रकृमिः । विहडणो अनर्थः, विघाटनम् । जोइओ ज्योतिरिङ्गणः, खद्योतः । सिंजिरो ध्वनिः, शिञ्जनमेव । जोइओ, जोअणो, जोअडो, खज्जओ खद्योते । तारका ज्योतिषं जोइसं । द्योतना जोअणा । द्योतः जोडो । तस्य डः । खे द्योतत इति खद्योतः खज्जओ । दूरवल्लहो कातरः । दरो भयं तत्र वल्लभः, दरवल्लभो, वियोगभीरुत्वात् । पंडरंगो महेश्वरः, धवलाङ्गत्वात् । भोइओ ग्रामेशः । भोगं चरतीति भोगिकः । सग्गहो मुक्तः । सुष्ठु अग्रहः स्वग्रहः । संकरो रथ्या । सङ्कीर्यते अत्रेति सङ्करः । पअरो प्रवरः अर्थदरः । प्रकर्षेण वरः । मइमोहिणी सुरा मतिमोहिनी । धारावासो दर्दुरः प्रावृषेण्यत्वात् । कमलं आस्यं कलहश्च । कमलवत्कमलम् । कं मस्तकं मलतीति । वेणुसाओ, धुअराओ भ्रमरः । वेणु शब्दवच्छब्दो यस्य स वेणुसाओ । संयुक्तस्य लुक् । ध्रुवरागः, सदा सुस्वरत्वात् । इत्यादि । अस्मिन् गणे लिङ्गव्यत्ययः प्रयोगाधीनः ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥

इति प्रथमाध्यायः ।

द्वितीयोऽध्यायः ।

मन्तमणवन्तमाआलुआलइरइल्लउल्लइन्ता मतुपः ॥ १ ॥

मतुप्प्रत्ययस्य मन्त मण वन्त मा आलु आल इर इल्ल उल्ल इन्त इत्येते दशादेशा यथाप्रयोगं भवन्ति । मन्त–सिरिमन्तो श्रीमान् । पुण्णमन्तो पुण्यवान् । मण–धनवान् धणमणो । वन्त–धणवन्तो । भक्तिमान् भक्तिवन्तो । मा–हनुमान् हणुमा । पटवान् पडमा । आलु–णेहालू स्नेहालुः । दआलू दयालुः । ईसालू ईर्ष्यालुः । आल–शब्दवान् सद्दालो । जटावान् जडालो । पटवान् पडालो । रसवान् रसालो । ज्योत्स्नावान् जोण्हालो । इर–ग्रहवान् गहिरो । इल्ल–शोभावान् सोहिल्लो । छायावान्–छाइल्लो । धामवान् जामिल्लो । उल्ल–विकारवान् विआरुल्लो । मांसवान्–मंसुल्लो । दर्पवान् दप्पुल्लो । इन्त–कहइन्तो कथावान् । माणइन्तो मानवान् । मतुप इति किम्? धणी । अत्थी ॥

वतुपो (१)डित्तिअमेतल्लुक्चैतद्यत्तदः ॥ २ ॥

एतद् यद् तद् इत्येतेभ्यः परस्य परिमाणार्थस्य वतुप्प्रत्ययस्य डित् इत्तिअं इत्यादेशो भवति, एतदो लुक् च । एतावत् एत्तिअं । यावत् जित्तिअं । तावत् तित्तिअं ॥

किमिदमश्च डेत्तिअडित्तिलएद्दहम् ॥ ३ ॥

किमिदंभ्यां चादेतद्यत्तद्भ्यश्च परस्य वतुप्प्रत्ययस्य डानुबन्धा एत्तिअ इत्तिल एद्दह इत्येते आदेशा भवन्ति । एतावत् एत्तिअं इत्तिलं एद्दहं । यावत् जेत्तिअं जित्तिलं जेद्दहं । तावत् तेत्तिअं तित्तिलं तेद्दहं ॥

इकः पथो णस्य ॥ ४ ॥

'पथो ण नित्य'मिति यः पथिन्शब्दात् णप्रत्ययो विहितः तस्य इक इत्यादेशो भवति । पान्थः पहिओ ॥

---

(१) वतुपो डित्तिअमिदमेतल्लुक्चैतद्यत्तदः—ख ।

खस्य सर्वाङ्गात् ॥ ५ ॥

सर्वाङ्गाद् व्यापिन्यर्थे विहितस्य खप्रत्ययस्य इको भवति । सर्वाङ्गीणः सव्वंगिओ ॥

छस्यात्मनो णअः ॥ ६ ॥

आत्मनः परस्य छप्रत्ययस्य णअ इत्यादेशो भवति । आत्मीयम् अप्पणअं ॥

हित्थहास्त्रलः ॥ ७ ॥

सप्तम्यन्तात् सर्वनाम्नो विहितस्य त्रल्प्रत्ययस्य हि त्थ ह इति त्रय आदेशा भवन्ति । यत्र जहि जेत्थ जह । तत्र तहि तत्थ तह । कुत्र कहि कत्थ कह । अन्यत्र अण्णहि अण्णत्थ अण्णह ॥

केर इदमर्थे ॥ ८ ॥

इदमर्थे विहितस्य छप्रत्ययस्य केर इत्यादेशो भवति । युष्मदीयः तुम्हकेरो । अस्मदीयः अम्हकेरो । कचिन्न भवति—मदीयपक्षः मइज्जपक्खो । पाणिनीयं पाणिणीअं ॥

राजपराड्डिक्कडक्कौ च ॥ ९ ॥

राजन् पर इत्येताभ्यां परस्य इदमर्थे विहितस्य प्रत्ययस्य डितौ इक्क अक्क इत्येतौ भवतः, चकारात्केरश्च । राजकीयं राइक्कं राअक्कं राअकेरं । परकीयं परिक्कं परक्कं परकेरं ॥

डेच्चओ (१)युष्मदस्मदोऽणः ॥ १० ॥

युष्मदस्मद्भ्यां परस्य इदमर्थस्याऽण्प्रत्ययस्य डित् एच्चअ इत्यादेशो भवति । यौष्माकं तुम्हेच्चअं । आस्माकं अम्हेच्चअं ॥

वर्वतेः(२) ॥ ११ ॥

उपमानार्थे विहितस्य वतिप्रत्ययस्य वरा इत्यादेशो भवति । रित्त्वाद् द्वित्वम् । महुरव्व पाडलीउत्ते पासाआ । मधुरावत्पाटलीपुत्रे प्रासादाः ॥

(१) एच्चओ—क । (२) वतेर्वः—क ।

तैलस्याऽनङ्कोलाड्डेल्लः ॥ १२ ॥

अङ्कोलवर्जिताच्छब्दात्परस्य तैलस्य डित् एल्ल इत्यादेशो भवति । सुरहि-जलेण कडेल्लं सुरभिजलेन कटुतैलम् । अनङ्कोलादिति किम् ? अंकोलतेल्लं ॥

त्वस्य तु डिमात्तणौ ॥ १३ ॥

भावार्थे विहितस्य त्वप्रत्ययस्य डित् इमा त्तण इत्यादेशौ तु भवतः । पीनत्वं पीणिमा पीणत्तणं । पुष्पत्वं पुप्फिमा पुप्फत्तणं । पक्षे–पीणत्तं । पुप्फत्तं । त्वस्येति किम् ? पीणआ पीणदा पीनता ॥

दोत्तो तसः ॥ १४ ॥

त्विवत्यनुवर्तते । पञ्चम्यन्तात्सर्वनाम्नः परस्य तसिल्प्रत्ययस्य दो त्तो इत्येतौ तु भवतः । सव्वदो सव्वत्तो । एअदो एअत्तो । अण्णदो अण्णत्तो । कदो कत्तो । तदो तत्तो । जदो जत्तो । इदो इत्तो । पक्षे–सव्वओ इत्यादि ॥

एकाद्दः सिसिआइआ ॥ १५ ॥

एकशब्दात्परस्य दाप्रत्ययस्य सि सिआ इआ इति त्रय आदेशा भवन्ति तु । एकदा एक्कसि एक्कसिआ एक्कइआ एकआ ॥

ल्हुत्तः कृत्वसुचः ॥ १६ ॥

'वारे कृत्वसुच्' इति विहितस्य कृत्वसुच्प्रत्ययस्य हुत्त इत्यादेशो भवति । लित्वान्नित्यम् । सअहुत्तो । सहासहुत्तो । चुम्बिज्जइ सअहुत्तो । उपगूहिज्जइ सहासहुत्तो । रमिआ वि पुणो रमज्जइ णिवत्तणे णत्थि तुणंति विअहुंतं-इति तु अभिमुखार्थेन हुंतशब्देन भविष्यति ॥

भवे डिल्लोल्लडौ ॥ १७ ॥

भवार्थे नाम्नः परौ इल्ल उल्ल इत्यतौ डितौ भवतः । मातुलानी मामी तत्र भवा मामिल्लिआ । पुरे भवं पुरिल्लं । अधो भवं हेट्ठिल्लं । उपरि भवम् उवरिल्लं । उल्ल–आत्मभवम् अप्पुल्लं । अल्ललावपीच्छन्त्यन्ये ॥

स्वार्थे तु कश्च ॥ १८ ॥

स्वार्थे नाम्नः परं कप्रत्ययो भवति तु । चकारात् डिल्लोल्लडौ च । चन्द्रः

चंदओ । हृदयं हिअअं । इह इहअ । आश्लिष्टम् आलिद्धं । द्वित्वेपि–बहुबहुलअं । ककारोच्चारणं पैशाचीभाषार्थम्—वदनं वतनकं । डिल्ल–णिज्जिआसोअ-पल्लविल्लेण निर्जिताशोकपल्लवेन । पुरिल्लो पुरा पुरो वा । उल्लड्–पिउल्लो प्रियः । मुहुल्लं मुखम् । हत्थुल्लो हस्तः । पक्षे–चंदो इत्यादि । कुत्सादिविशिष्टे तु संस्कृतवदेव कः सिद्धः ॥

उपरेः संव्याने ल्लल् ॥ १९ ॥

स्वार्थ इत्यनुवर्तते । संव्यानार्थे उपरिशब्दात् द्विरुक्तो लो भवति । लित्वा-न्नित्यम् । उवरिल्लो । संव्यान इति किम् ? उवरिं ॥

नवैकाद्वा ॥ २० ॥

नव एक इत्येताभ्यां परं स्वार्थे द्विरुक्तो लो वा भवति । णवल्लो णवो । एक्कल्लो एक्को ॥

मिश्राल्लिअश् ॥ २१ ॥

मिश्रशब्दात् स्वार्थे लिअ इत्यादेशो वा भवति । शित्वात्पूर्वस्य दीर्घः । मीसालिअं मिस्सं ॥

शनैसो ल्डिअं ॥ २२ ॥

शनैःशब्दात् स्वार्थे लित् डिअ इअं इत्यादेशो भवति । सणिअं ॥

मनाको डअं च वा ॥ २३ ॥

मनाक्शब्दात् स्वार्थे डित् अअं इअं च प्रत्ययौ वा भवतः । मणअं मणिअं । पक्षे–मणा ॥

रो दीर्घात् ॥ २४ ॥

वेत्यनुवर्तते । दीर्घशब्दात् स्वार्थे रो वा भवति । दीहरं दीहं दिग्घं ॥

डुमअडमऔल् भ्रुवः ॥ २५ ॥

भ्रूशब्दात् स्वार्थे उमअ अमअ इत्येतौ डितौ लितौ भवतः । लित्वा-न्नित्यम् । भुमआ भमआ ॥

लो वा विद्युत्पत्रपीताऽन्धात् ॥ २६ ॥

एभ्यः परं स्वार्थे लो वा भवति । विज्जुला विज्जू । पत्तलं पत्तं । पीअलं पीअं । अंधलो अंधो ॥

त्वादेः सः ॥ २७ ॥

'तस्य भावस्त्वतलौ' इत्यादिना विहितत्वादेः परं स्वार्थे स एव त्वादिर्वा भवति । मुदुत्वेन मउत्तआइ । मृदुतया मउत्तआए । ज्येष्ठतरः जेट्ठअरो । कनिष्ठतरः कणिट्ठअरो ॥

इरः शीलाद्यर्थस्य ॥ २८ ॥

शीलधर्मसाध्वर्थेषु विहितस्य प्रत्ययस्य स्थाने इर इत्यादेशो भवति । हसनशीलः हसिरो । रोदनशीलः रोइरो । लज्जाशीलः लज्जिरो । जल्पशीलः जम्पिरो । वेदनशीलः वेइरो । उच्छ्वसनशीलः ऊसिरो । केचिदिरं तृन एवाहुः, तेषां नमिरकमिरादयो न सिध्यन्ति, तृनोत्तरादिना बाधितत्वात् ॥

तुमत्तुआणतूणाः क्त्वः ॥ २९ ॥

क्त्वाप्रत्ययस्य तुं अत् तुआण तूण इति चत्वार आदेशा भवन्ति । तुम्-दट्ठुं । मोत्तुं । भोत्तुं । अत्-भमिअ । रमिअ । तुआण-घेत्तुआण । साउ-आण । 'क्त्वासुपोस्तु सुणा'दित्यनुस्वारे कृते घेत्तुआणं । सोउआणं । तूण-घेत्तूण । सोऊण । काऊण । अनुस्वारे-घेत्तूणं । सोऊणं । काऊणं । वंदित्ता इति तु सिद्धावस्थायां वलोपे ॥

वरइत्तगास्तृनाद्यैः ॥ ३० ॥

वरइत्त इत्यादयः तृनादिप्रत्ययैः सहिताः स्वराद्यादेशविशेषिता बहुलं निपात्यन्ते । वरइत्तो वरयितृकः । नूतनवरः । ऋतोऽत् , तो द्वित्वं च । कण-इल्लो, वाअडो शुकः । कणइल्लो । कणई लतावाची देश्यः, ततो भवार्थेऽस्त्यर्थे वा डिल्लः । वाअडो । वाचाटे द्वितीयस्यातोऽत् । मइलपुत्ती पुष्पवती । मलिन-शब्दस्य मइलादेशः, तस्मात् पुत्ती । दुग्घोट्टो दोग्घोट्टो दूणो द्विपः । पिबते-र्घोट्टः । द्वाभ्यां पिबतीति । द्विपाने पकारेण सह इत ऊत् , दूणो । विरिचरो धाराविरेचनशीलः । सूरल्ली मध्याह्नः । सूरादस्त्यर्थे ल्लिः । वेल्लहल्लो

कोमलो विलासी च। वल्लभात् लः, आदेरत एच्च। सद्दालं नूपुरम्। शब्दादालोऽस्त्यर्थे। अलिल्लो, पुल्लंधओ, रसाओ भ्रमरः। एषां क्रमात् अलेः स्वार्थे डिल्लः, लो द्वित्वं च। पुष्पन्धयः, ष्पस्य लः। रसमत्तीति रसाओ। लअणी, लअणा, कणई लतायाम्। लतायाः स्वार्थे डणी डणा च। कनतेर्धातोः स्त्रियां डई। शोभावहत्वात् बहुज्जा कनीयसी श्वश्रूः। वध्वा उक्तेर्थे ज्जा। भाउज्जा भ्रातृवधूः। भ्रातुर्जायार्थे ज्जा। मेहुणिआ मातुलात्मजा स्याली च। मैथुनिका। मिथुनादुक्तेऽर्थे इकण् डाच्च। रिमिणो रोदनशीलः। रुदेः शीले डिमिणः। पुणणाली, छिच्छई, अडअणा असती। पुंश्चल्यां श्चस्य णा। धिक् धिक् छि छि। धिग्धिगिति गर्हणा यस्याः सा। अस्त्यर्थे डई। अटेः शीले अणा। अडअणा अटनशीला। चप्पलओ मिथ्याबहुभाषी। चपलात्कः, पस्य च द्विरुक्तः पः। पिब्बं जलम्। पिबतेर्द्विबः। मघोणो मघवा। स्वार्थे णः, अवा इत्यस्य ओकारः। सङ्लासिओ मयूरः। सद्दालासिकः नृत्यशीलत्वात्। 'इत्तु सदादौ'। वाउल्लो प्रलपिता। वाचो डुल्लः। पलहिअओ मूर्खः। उपलहृदयः। उकारस्य लोपः। चंडिक्को कोपः। चण्डात् कोपे डिक्कः। चंडिज्जो पिशुनः कोपश्च। चण्डादुक्तेऽर्थे डिज्जः। कुंमणो म्लानः। म्लायतेः कुंमादेशे णः। अच्छिहरुल्लो द्वेष्यः। अक्ष्णोर्हरः, अदर्शनीयत्वात्। अच्छिहरात् स्वार्थे डुल्लः। छाइल्लो रूपवान्। छायाया डिल्लोऽस्त्यर्थे। कान्तिमानित्यर्थः। कुडुङ्गो कुङ्गो कुडुक्को लतागृहम्। कुडादुक्तेऽर्थे डुङ्गः डङ्गः डुक्कश्च। जरंडो वृद्धः। जरतेरंडः। अच्छिविअच्छी परस्पराकृष्टिः। आकर्षति व्याकर्षतीत्यत्र कृषेः स्थाने अच्छिविअच्छी। धूमरी तुहिनम्। धूमवत् धूमरी, उपमाऽर्थे री। सोत्ती तरङ्गिणी। स्रोतसोऽस्त्यर्थे डी, तस्य द्वित्वम्। अहिसिओ ग्रहशङ्कया रुदितः। अभिसीदतेः उक्तेऽर्थे डिकः। गावी गौः। गोः स्त्रियां डावी। पार्श्वयुगापवृत्तिः उत्थल्लपत्थल्ला। उत्स्थलप्रस्थलात् पार्श्वद्वयापवृत्त्यर्थे डा, लो द्वित्वं च। गज्जिलिओ स्पृष्टेऽङ्गे हासः पुलकश्च। अङ्गे स्पृष्टे यो हासो जायते तस्मिन् पुलकार्थे च गर्जतेरिलिअः। चित्तलं रम्यम्। चित्तं लातीति। पाडहुओ प्रतिभूः। प्रतिभुवः स्वार्थे डुकण्, इतोऽत्वं च। पासणिओ, पासाणिओ साक्षी। साक्षात् पार्श्वे नीयतेऽनेनेति पार्श्वात् नीयतेर्डिकः।

अवरिज्जं अद्वितीयम् । अवरात् भावार्थे डिज्जः । लाहिल्लो लम्पटः । लाभादुक्तेऽर्थे डिल्लः । कडिल्लं गहनं, दौवारिकः, कटिवस्त्रम्, निर्विवरं, विपक्षः, आशीश्च । कटिशब्दाद् गहनादिष्वर्थेषु डिल्लः । रूवसिणी रूपवती । रूपादस्त्यर्थे स्त्रियां सिणी । कुडुंबिअं सुरतम् । कुटुम्बादुक्तेऽर्थे डिकः । अन्तरिज्जं दशनाः कटिसूत्रं । अन्तरादुक्तेऽर्थे डिज्जः । अवडुक्किअं निपतितं कूपाद्यवटेषु । अवटादुक्तेऽर्थे डुक्किअः । बुड्डिरो महिषः । मज्जतेरादेशात् बुड्डात् इरः शीले । पिप्पिडिअं यत्किंचित्पठितम् । पिडिपिडीत्यनुकरणात् कः, आदेर्डिकारस्य लुक्, पो द्वित्वं च । सरिसाहुलो सदृशः । सदृशात् स्वार्थे हुलश् । गुमिलो मूढः । मुहेरादेशाद् गुमेरिलः । कच्चं कार्यम् । कृञो डच्चः । घडिआ, घडा घडी गोष्ठी । घटिता घटा घटना यस्याः सा । कमणी निःश्रेणी । किरिकिरिआ कर्णोपकर्णिका कुतुकं च । कर्णोपकर्ण कर्णपरम्पराप्राप्तकटुजल्पनं तस्मिन्नर्थे कौतुके च किरिकिरीत्यनुकरणात् का । अण्णइओ सर्वत्रार्थे तृप्तः । अर्णवादुपमानार्थे डिकः । साहुली शाखा । स्वार्थे डुलिः । जंपेक्खिरमग्गिरओ यद्दृष्टं याचते । यद् दृष्टमित्यर्थे जंपेक्खिरमिति निपातितात् परो याचनशीले मग्गिरओ कप्रत्ययान्तः । गअसाउल्लो विरक्तः । गतस्वादनुरक्तेऽर्थे डुल्लः । सिहंडहिल्लो बालः । शिखण्डादुक्तेऽर्थे हिल्लः । शिखावानित्यर्थः । अलवलवसहो धूर्तो दुष्टः पृष्टवाची बलीवर्दः । अलमत्यर्थं बलमस्य वृषभस्येति । बिन्दोर्लुक् । खुरहखुडी प्रणयकोपः । क्षुरवद्भाति तोदयतीति तुदेरादेशात् खुडात् डी । सीउल्ली, सीउग्गं हिमकाले दुर्दिनम् । शीतात् डुल्लिडुग्गौ, तस्य लोपः । वरंडो वरणः, प्राकारः । वृञो रंडः । तत्ती तत्परता । तात् परस्य तात्पर्ये डत्ती । हीरणा त्रपा । त्रपार्थे णा हीरादेशश्च । गामरेडो । (१)योऽन्तर्भुक्त्वा ग्रामे भुङ्क्ते । ग्रामादुक्तेऽर्थे रेडः । लडहा, वेल्लरी विलासवती । लसतेर्डहा सलोपश्च । वेष्ट्यन्ते विटा अनयेति वेष्टेः परो री, ष्टो ल्लश्च । दुम्मइणी कलहपरा । दुर्मतेः स्वार्थे स्त्रियां णी । लज्जालुणी लज्जावती । लज्जालोः स्वार्थे णी । तण्णाअं आर्द्रम् । तिम्यतेर्डण्णाअं । चिक्खअणो असहनः । नञ्पूर्वात् सहतेर्यणः, चिक्खादेशश्च । वेणिअं वचनीयम् । वचे-

---

(१) योन्तर्भित्त्वा ग्रामं भुङ्क्ते—ख ।

रुक्तेऽर्थे डेरिअः । सुहसिओ निद्रालुः । स्वप्नात् शीले सियः, प्नस्य च हः, आदेरत उः । यद्वा सास्ना संस्कृते निद्रा । 'स्तावकसास्ने' इत्युत्वे सति ततः शीलार्थे डसिअः । वप्पिओ केदारः । उप्यन्तेऽत्रेति वपेः पिअः । बंधोल्लो मेलकः । बन्धेर्डोल्लः । वारिज्जो विवाहः । वृञ्‌ इज्जाणा । 'अचोञ्णिति' इति वृद्धिः । साउल्लो, हडहडं अनुरागः । स्वादेरुक्तेऽर्थे ल्लः । हडत् हडदिति हृदयं स्फुरति यत्रेति तस्य लुक् । माणंसी मायावी मनस्वी च । कोडिल्लो, कोडिओ पिशुनः । कुडेर्धातोरिल्लइकौ, उत ओच्च । अट्टण्णो आर्तज्ञः । आर्तं जानातीति । गंजोलो । गञ्जतेः परिभवार्थे देश्याद् धातोर्डोल । वंदिणो बिन्दी । स्वार्थे णः । तत्तिल्लो तच्छीलः । तत्ती तत्परता, ततोऽस्त्यर्थे लः, लो द्वित्वम् । उसुंभिअं रुद्धगलरोदनम् । उत्पूर्वस्य सुम्भतेरुक्तेऽर्थे डिकः । णिउक्को तूष्णीकः मूकः । निर्मुक्तः । मस्य लुक्, दैवादिपाठाद् द्वित्वं च । बंहलो अपस्मारः । ब्रह्मण उक्तेऽर्थे लः । ठाणिज्जं गौरवम् । स्थानादुक्तेऽर्थे । डिज्जः । उवउज्जो उपकारी । उपकुञो डुज्जः । एक्कलो प्रबलः । एकादुक्तेऽर्थे, लः । माउसिआ माउच्छा मातृष्वसा । मातुः परस्य स्वसुः सिआच्चौ । महल्लो मुखरः । महतो डल्लः । कुच्छिमई गर्भवती । कुक्षेरस्त्यर्थे मई । रिंछोली ऋक्षालिः नक्षत्रमाला, तद्वत् रिंछोली । ऋतो बिन्दुः । धोरणी पङ्क्तिः । धारावद्धोरणी । आत ओ, उपमार्थे डणी च । पडमा दूष्यपटम् । पटादस्त्यर्थे मा । जुअणो युवा । स्वार्थे णः । करमरी हठहृता स्त्री बन्दी । करेण मृद्यमानादाकृष्यत इत्यस्मिन्नर्थे करोपपदान्मृद्नातेर्डरी । दड्ढाली दववर्त्म दवाग्निमार्गः । दग्धात् डाली । कूडङ्गो, कूडओ लतागृहम् । कूटशब्दादुक्तेऽर्थे डङ्गडकौ । कारिमं कृत्रिमम् । कृञो डारिमः । जंघालुओ, जंघामओ दूतः । जंघायाः शीघ्रेऽर्थे लुअमऔ । बलामाडी बलात्कारः । बलात् मुड्यते यत्रेति । चक्कलं परिवर्तुलम् । चक्राल्लः । वाउल्ली पुत्रिका, कुमारीक्रीडोचिता सालभञ्जिका । कुमारीर्व्यापारयतीति व्याप्रेर्डुलिः । मत्तवालो मत्तः । स्वार्थे वालः । बहुणिआ ज्येष्ठभ्रातृवधूः । वध्वा उक्तेऽर्थे णिआ । जंभणंभणो स्वैरभाषणः । यद्वा तद्वा भणत्यधिकमिति । आदितृतीयाभ्यामनुस्वारः, तलोपश्च । भाइरो भेज्जलो भेज्जो ओज्जरो भीरुः । भियः शील इत्यर्थे डाइरडेज्जलडेज्जाः, त्रसेरादेशात् ओज्जाच्च रः । आहडं सीत्कारः । आहरति आदत्ते प्रियहृदय-

मिति । आहूओ डः । काअपिउला कोकिला । काकः पितृवत् पोषको यस्या इत्यर्थे काकपितृशब्दात् ला । मुहलं मुखम् । स्वार्थे लः । गत्तडी गायिका । गात्रीशब्दात् स्वार्थे डडी । दुद्दोलणा । दुग्धापि या दुह्यते गौरित्यत्रार्थे दुग्धात् दोलणा । माभाइ अभयम् । भियो भादेशात् मापूर्वात् इः । तोमरिओ शस्त्रीप्रमार्जकः । तोमरादुक्तेऽर्थे डिकः । बहुहाडिणी । वध्वा उपरि परिणीयत इति वध्वा उक्तेऽर्थे हाडिणी । रूअरूइआ उत्कलिका । रूहरूहिकाशब्दे हकारयोर्लुक् । पिउसिआ, पिउच्चा पितृष्वसा । पितुः परस्य स्वसुः सिआच्चौ । पुफ्फी । पितुः परस्य स्वसुः फी च । अणुसूआ आसन्नप्रसवा । अनुसूतेरासन्नप्रसवार्थे डा । भच्चो भगिनीसुतः । भगिन्या सुतेऽर्थे च्चः, भादेशश्च । ओहल्ली अपसृतिः । सृतेर्हल्ली । मम्मक्को गर्वः । मर्मण उक्तेऽर्थे कः । मउप्परा मधुपरः । उतोऽत्, धो डश्च । इत्यादि । कृष्टाऽनुपसर्गघृष्टवाक्यविद्वस्वाचस्पतिविष्टरश्रवःप्रचेतःप्रोक्तादीनां क्विबादिप्रत्ययान्तानां च अग्निचित्सोमसुदित्यादीनां सुग्लौसुम्लौ-इत्यादीनां च पूर्वविद्वद्भिरप्रयुक्तानां प्रतीतिवैषम्यकरः प्रयोगो न कर्तव्यः, शब्दान्तरैरेव तदर्थोऽभिधेयः । यथा—कृष्टः कुशलः । वाचस्पतिः गुरुः । विष्टरश्रवाः हरिः । इत्यादि । घृष्टशब्दस्य सोपसर्गस्य प्रयोग इष्यत एव । मंदरअडपरिघट्टं मन्दरतटपरिघृष्टम् । तं दिअसणिघट्टाणं । इत्यादि ॥

अव्ययम्(१) ॥ ३१ ॥

अधिकारोऽयम्, आपादपरिसमाप्तेः । इतः परं ये वक्ष्यन्ते ते अव्ययसंज्ञका ज्ञातव्याः ॥

आम अभ्युपगमे ॥ ३२ ॥

आम इत्यव्ययमभ्युपगमे प्रयोज्यम् । आम बहुला वणाली । आम संस्कृतेऽपीति केचित् ॥

तं वाक्योपन्यासे ॥ ३३ ॥

तं इत्यव्ययं वाक्योपन्यासे प्रयोज्यम् । तं दिअसवंदिमेक्खं ॥

णइ चेअ चिअ च्च एवार्थे ॥ ३४ ॥

---

(१) अथाव्ययानि—ख ।

णइ चेअ चिअ च्च इत्येते अवधारणार्थे प्रयोज्याः । गइओ णइ गदित एव । जं चेअ मुउलणं लोअणाणं अणुबंधं तं चिअ कामिणीणं यदेव मुकुलनं लोचनानामनुबन्धं तदेव कामिनीनाम् । दैवादिपाठात् द्वित्वम्—ते च्चिअ धण्णा, ते च्चिअ सुउरिसा त एव धन्यास्त एव सुपुरुषाः । सो च्च वअरूपेण स एव वयोरूपेण । सो च्च सीले । स एव शीले ॥

हद्धि निर्वेदे ॥ ३५ ॥

हद्धि इति निर्वेदे प्रयोज्यम् । हाधिक्छब्दवत्–हद्धि । हद्धि णो धामह हा धिक् नो धावतः ॥

दर अर्द्धेऽल्पे वा ॥ ३६ ॥

दर इत्यव्ययमर्धार्थे ईषदर्थे वा प्रयोज्यम् । दर विअसिअं अर्धमीषद्वा विकसितम् ॥

किणो प्रश्ने ॥ ३७ ॥

किणो इत्यव्ययं प्रश्ने वा प्रयोज्यम् । किणो धुवसि किं धुवसि किं धूनोषि ॥

मिव पिव विव विअ व व्व इवार्थे ॥ ३८ ॥

मिव पिव विव विअ व व्व इति षडेते इवार्थे वा प्रयोज्याः । कमलं मिव । चंदणं पिव । हंसो विव । जीवो विअ । उअअस्स व ताविअसीलस्स उदकस्येव तापितशीलस्य । साअरो व्व गहिरो सागर इव गभीरः । साअरो व्व खारओ सागर इव क्षारः । पक्षे—णीलुप्पलमाला इव नीलोत्पलमालेव ॥

किर इर हिर किलार्थे ॥ ३९ ॥

किर इर हिर इति त्रयः किलार्थे वा प्रयोज्याः । काल्लं किर खलहिअओ । तस्स इर पिअवअस्सो । वाहित्ता हिर देवी । पक्षे–एव्वं किल तेण सिविणए भणिअं ॥

अह्मो आश्चर्ये ॥ ४० ॥

आश्चर्ये अह्मो इति प्रयोज्यम् । अह्मो देवस्स गई । अम्हो परिणिज्ज खु ॥

अब्भो पश्चात्तापसूचनादुःखसम्भाषणापराधानन्दादरखेदविस्मयाविषादभये ॥ ४१ ॥

अब्भो इति पश्चात्तापादिषु प्रयोज्यम् । पश्चात्तापे—अब्भो तह तेण कआ अहसज्जअकस्स साहमि । सूचनायाम्-अब्भो दुक्खअर अब्भो आरद्धो । दुःखे-अब्भो दलइ हिअअं । सम्भाषणे-अब्भो किमिणं । अपराधे-अब्भो हरंति हिअअं कह वि न वा होन्ति जुबईणं । आनन्दे-अब्भो सुप्पहाअमिणं । आदरे-अब्भो मह सफलं जीवं । खेदे-अब्भो ण जाणामि च्छेत्तं(१) । विस्मये-अब्भो किं वि रहस्सं जाणंति धुत्ता जणब्भहिआ किमपि रहस्यं जानन्ति धूर्ता जनाभ्यधिकाः । विषादे-अब्भो णासेंति धिअं पुलिअं पत्थेंति देंति रणरणअं नाशयन्ति धृतिं पुलकं वर्तयन्ते ददति रणरणकम् । भये—अब्भो गइअंहि तुमेण वरज्जइसाण जोरिहइ ॥

हुं पृच्छादाननिवारणे ॥ ४२ ॥

हुं इति पृच्छादिषु प्रयोज्यम् । पृच्छायाम्-हुं साह सब्भावं । दाने-हुं गेह्णिअं पप्णविआ । निवारणे-हुं णिल्लज्ज समोसरा ॥

वणे निश्चयानुकम्प्यविकल्पे ॥ ४३ ॥

वणे इति निश्चयादौ प्रयोज्यम् । निश्चये—वणे देमि निश्चयं ददामि । विकल्पे-वणे ण होइ भवति वा न भवति । अनुकम्प्ये—होइ दासो वणे ण मुंचइ भवति दासोऽनुकम्प्यो न मुच्यते ॥

सम्भावने अइ च ॥ ४४ ॥

अइ इति चकारात् वणे इति च सम्भावने प्रयोज्यम् । अइ दिअर किं ण पेच्छसि । णह्नि वणे जं ण देइ विपरिणामो ॥

आनन्तर्ये णवरिअ ॥ ४५ ॥

णवरिअ इत्यानन्तर्ये प्रयोज्यम् । णवरिअ से रघुवइणो अनन्तरमस्य रघुपतेः ॥

(१) चित्तं—ख० ।

केवले णवर ॥ ४६ ॥

केवलेऽर्थे णवर इति प्रयोज्यम् । णवर पिआइ चिअ णिव्वतंति केवलं प्रियाण्येव निष्पतन्ति, पृथग्भवन्ति । केचित्तु—'केवलानन्तर्ययोर्णवरणवरिअ' इत्येकमेव सूत्रमाहुः, तन्मते उभावप्युभयार्थौ ॥

भंद ग्रहणार्थे ॥ ४७ ॥

भंद इति ग्रहणार्थे प्रयोज्यम् । भंद आलोएसुमं । गृहाणेत्यर्थः ॥

भंदि विकल्पविषादसत्यनिश्चयपश्चात्तापेषु च ॥ ४८ ॥

भंदि इति विकल्पादिषु ग्रहणार्थे च प्रयोज्यम् । विकल्पे—भंदि भोज्ज एत्ताहे भवेदिदानीम् । विषादे—भंदि चरणे तं ओसंमाणिओ चरणौ ततः सम्मानितौ । सत्ये-भंदि तुह भणिमो । निश्चये-साहिज्जइ भंदि तुह कज्जम् । पश्चात्तापे-भंदि सहेहि घरिणि । ग्रहणार्थे—भंदि आलोएसुमं ॥

सम्भाषणरतिकलहे रे अरे ॥ ४९ ॥

सम्भाषणरतिकलहयोर्यथासंख्यं रे अरे इत्येतौ प्रयोज्यौ । सम्भाषणे—रे रे हिअअ मउअसरिसा । रतिकलहे—अरे बहुवल्लह मए समं मा कारेसु भवभासि ॥

हरे क्षेपे च ॥ ५० ॥

क्षेपे चकारात् संभाषणरतिकलहयोश्च हरे इति प्रयोज्यम् । क्षेपे-हरे णिल्लज्ज । संभाषणे-हरे पुरिसा । रतिकलहे-हरे बहुवल्लह ॥

धू कुत्सायाम् ॥ ५१ ॥

कुत्सायां धू इति प्रयोज्यम् । धू णिल्लज्जो लोओ ॥

ऊ गर्हाविस्मयसूचनाक्षेपे ॥ ५२ ॥

गर्हादिषु ऊ इति प्रयोज्यम् । गर्हायाम्-ऊ णिल्लज्ज । विस्मये-ऊ कहं मुणिआअहं । सूचने-ऊ केण वि ण विण्णाअं । प्रक्रान्तवाक्यस्य विपर्यासशङ्कया विनिवर्तनलक्षण आक्षेपः, तत्र-ऊ किं मए भणिअं ॥

पुणरुत्तं कृतकरणे ॥ ५३ ॥

पुणरुत्तं इति कृतकरणे प्रयोज्यम् । अइ सुव्वइ पंसुलि मणि सहेहि पुणरुत्तं अयि सुव्रते पांसुले सहस्व कृतकरणम् ॥

हु खु निश्चयविस्मयवितर्के ॥ ५४ ॥

हु खु इत्येतौ निश्चयादिषु प्रयोज्यौ । निश्चये—तं विसुअं छिएणसिरं । तं खु सिरिए रभस्सि । विस्मये—को खु सहासिरो । वितर्क ऊहः संशयो वा । ऊहे—न हु नवरसग्गहिआ एअं खु हसइ । संशये—जलहरो खु धूमो खु । संभावने चेष्यते—तरि उण हु ण वरउ मं । एअं खु तुम हसइ । बहुलाधिकारादनुस्वारात् परो हुं न प्रयोक्तव्यः ॥

णवि वैपरीत्ये ॥ ५५ ॥

णवि इति वैपरीत्ये प्रयोज्यम् । णवि लोअणो ॥

बेब्बे विषादभयवारणे ॥ ५६ ॥

वेब्वे इति विषादादौ प्रयोज्यम् । वेब्वे तुए भणिअं ण विम्हरामो । किमुल्लापयन्त्या उत खिद्यमानया त्वया बेब्वे इति भणितं न विस्मरामः । भये—बेब्बे पलाइदं देण । वारणे—जूरणे अ बेब्वे इति । उल्लावरीइवि तु भं वेब्वेत्ति मअच्चिअं किणेदं । उल्लावरीइवि इति स्वप्नायातम् ॥

आमन्त्रणे बेब्बे च ॥ ५७ ॥

बेब्बे इति चामन्त्रणे प्रयोज्यम् । बेब्बे गोलो । बेब्बे मुकुरं रेहसि पाणी क्लीबा (?) ॥

वा सख्या मामि हला हले ॥ ५८ ॥

आमन्त्रण इति वर्तते । सख्या आमन्त्रणेऽर्थे मामि हला हले इति प्रयोज्याः । मामि सरिसक्खराणि पणमहमाणं सहला । हला सउंदले । हले हआसे । पक्षे—सहि एरिस च्चिअ गई ॥

दे संमुखीकरणे च ॥ ५९ ॥

संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोज्यम् । दे पसिअ णिवत्तइ सुंदरि यावत्प्रसीद निवर्तस्व सुन्दरि । दे सहि ॥

ओ पश्चात्तापसूचने ॥ ६० ॥

पश्चात्तापे सूचनायां च ओ इति प्रयोज्यम् । पश्चात्तापे-ओ पच्चाअन्ति आए । सूचनायाम्-ओ अवि अराात्तिल्लो । परिकल्पार्थ उतादेशेन ओकारेणैव सिद्धम् । ओ विरएमिण हृअले ॥

अण णाइं नञर्थे ॥ ६१ ॥

नञर्थे अण णाइं इत्येतौ प्रयोज्यौ । अण चिंतिअं मुणंति न चिन्तितं जानन्ति । णाइं करेमि रोसं न करोमि रोषम् ॥

निश्चयनिर्धारणे वले ॥ ६० ॥

निश्चये निर्धारणे च वले इति प्रयोज्यम् । निश्चये—वले सीहो सिंह एवायम् । निर्धारणे-वले पुरिसो धणंजओ खत्तिआणं पुरुषो धनञ्जय एव क्षत्रियाणाम् ॥

मणे विमर्शे ॥ ६३ ॥

विमर्शे मणे इति प्रयोक्तव्यम् । मणे सूरो किंस्वित् सूरः । इत्थमपीच्छन्त्यन्ये ॥

माइ मार्थे ॥ ६४ ॥

माइ इति मार्थे प्रयोज्यम् । माइ कहिअ रोसं मा कार्षीद्रोषम् ॥

अलाहि निवारणे ॥ ६५ ॥

अलाहीति निवारणे प्रयोज्यम् । अलाहि विसाएण अलं विषादेन ॥

लक्षणे जेण तेण ॥ ६६ ॥

लक्षणे जेण तेण इत्येतौ प्रयोज्यौ । भमररुअं जेण कमलवणं । भमरभीसणमअं तेण कमलवणं ॥

त्वोद्वापोताः ॥ ६७ ॥

अप अप इत्येतौ उपसर्गौ उत इति विकल्पार्थो निपातश्च ओ इति तु प्रयोक्तव्याः । ओआरो । अवतारः अपकारो वा । ओ विरएमि णहत्थले उत वेरचयामि नभःस्थले । पक्षे-अवआरो इत्यादि ॥

उ ओ उपेः ॥ ६८ ॥

उप इत्युपसर्गं उ ओ इति द्विधा प्रयोक्तव्यः । उआरो, ओआरो उपकारः ॥

प्रत्येकमः पाडिएक्कं पाडिक्कं ॥ ६९ ॥

प्रत्येकमित्यस्यार्थे पाडिएक्कं पाडिक्कं इति तु प्रयोक्तव्यम् । पाडिएक्कं पाडिक्कं । पक्षे–पत्तेअं ॥

स्वयमो (?) अप्पणा ॥ ७० ॥

स्वयमित्यस्यार्थे अप्पणा इति तु प्रयोक्तव्यम् । विसअं विसअंति अप्पणा कमलवणा(१) । पक्षे–सअं चिअ मुणसि करणिज्जं स्वयमेव जानासि करणीयम् ॥

एक्कसरिअं झटिति सम्प्रति ॥ ७१ ॥

झटित्यथ संप्रत्यर्थे च एक्कसरिअं इति तु प्रयोज्यम् । एक्कसरिअं झटिति संप्रति वा । पक्षे–झत्ति । संपइ ॥

इहरा इतरथा ॥ ७२ ॥

इहरा इति इतरथार्थे प्रयोज्यम् । इहरा णिसामतेहि । पक्षे–इअरहा ॥

मुधा मोरउल्ला ॥ ७३ ॥

मुधार्थे मोरउल्ला इति तु प्रयोज्यम् । मोरउल्ला । पक्षे–मुहा ॥

अयि ऐ ॥ ७४ ॥

अयि इत्यर्थे ऐ इति तु प्रयोज्यम् । ऐ बिहेइ । ऐ उम्मत्तिए । अतएव वचनादैकारस्यापि प्राकृते प्रयोगः ॥

उअ पश्य ॥ ७५ ॥

पश्य इत्यर्थे उअ इति प्रयोज्यम् । उअ णिच्चलनिप्फन्दा । पक्षे–ओअच्छादयः पश्यत इत्यर्थे । उवह इति च दृश्यते । उवह गोट्ठअमज्झम्मि ॥

इजेराः पादपूरणे ॥ ७६ ॥

(१) कमसरो—ख. ।

इ जे र इत्येते पादपूरणे प्रयोज्याः । णअणा इ । अच्छी इ । अणेक इ । रूवं तु जे गब्भइ । कमलगोवी र । अहो अंहो हा नाम हे इत्यादयः संस्कृतसमत्वेन सिद्धाः ॥

प्याद्याः ॥ ७७ ॥

प्यादयो नियतार्थवृत्तयः प्राकृते प्रयोज्याः । पि । अपीत्यर्थे ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ द्वितीयाध्यायस्य प्रथमः पादः ॥

वीप्सार्थात्तदचि सुपो मस्तु ॥ १ ॥

वीप्सार्थात् पदात्परस्य सुपः स्थाने तदचि तस्य वीप्सार्थस्य सम्बन्धिन्यचि परे मो वा भवति । एकैकम् एक्कमेक्कं । एकैकेन एक्कमेक्केण । अग्गे अग्गे अग्गमग्गम्मि । पक्षे–एक्केक्कं इत्यादि ॥

अमः ॥ २ ॥

सुप इत्यनुवर्तते । नाम्नः परस्य सुपः सम्बन्धिनोऽमः द्वितीयैकवचनस्य स्थाने मकारो भवति । वच्छं । मालं । गिरिं । गोरिं । गामणिं । तरुं । बहुं ॥

श्लुग्जश्शसोः ॥ ३ ॥

नाम्नः परयोर्जस् शस् इत्येतयोर्लुक् । शित्वात् पूर्वस्याऽचो दीर्घः । वच्छा । माला । गिरी । गोरी । गामणी । तरू । बहू । चिट्ठंति पेच्छ वा ॥

णशामः ॥ ४ ॥

नाम्नः परस्य षष्ठीबहुवचनस्य णश् इत्यादेशो भवति । शित्वात्पूर्वस्य दीर्घः । वच्छाण । वणाण । मालाण । गङ्गाण । गिरीण । दहीण । बुद्धीण । गामणीण । सुधीण । गोरीण । तरूण । महूण । वहूण । 'क्त्वासुपोस्तु सुणात्' इति वाऽनुस्वारे–वच्छाणं गिरीणं, इत्यादि ॥

हिं हिँ हि भिसः ॥ ५ ॥

नाम्नः परस्य भिसः सबिन्दुः सानुनासिकः केवलश्च हिर्भवति । वच्छेहिं

वच्छेहिँ वच्छेहि। धणेहिं धणेहिँ धणेहि। मालाहिं मालाहिँ मालाहि। गिरीहिं गिरीहिँ गिरीहि। बुद्धीहिं बुद्धीहिँ बुद्धीहि। दहीहिं दहीहिँ दहीहि। गामणीहिं गामणीहिँ गामणीहि। गोरीहिं गोरीहिँ गोरीहि। तरूहिं तरूहिँ तरूहि। धेणूहिं धेणूहिँ धेणूहि। बहूहिं बहूहिँ बहूहि। महूहिं महूहिँ महूहि॥

हिंतोत्तोदोदु ङसिस् ॥ ६ ॥

नाम्नः परो ङसिस् पञ्चमीविभक्तिः हिंतो द्विरुक्तस्तो दो दु इति चतुर आदेशानापद्यते। वच्छाहिंतो 'भिस्भ्यस्सुपी'त्येत्वे वच्छेहिंतो वच्छत्तो वच्छादो वच्छादु। वृक्षात् वृक्षेभ्यो वा। दहिहिंतो दहिहित्तो दहिदो दहीदु। गोरीहिंतो गोरित्तो गोरीदो गोरीदु। तरूहिंतो तरुत्तो तरूदो तरूदु। महूहिंतो महुत्तो महूदो महूदु। धेणूहिंतो धेणुत्तो धेणूदो धेणूदु। दो दु इत्यत्र दकारो भाषान्तरार्थः, तेन शौरसेनीमागध्योः मलअकेदूदो मलअकेदूदु मलयकेतोः। पैशाच्यां 'तल् तदोः' इति तकारार्थम्-गिरीतो। एवं धनमाला-गिरिबुद्धिग्रामणीतरुवधूप्रभृतयः॥

सुंतो भ्यसः ॥ ७ ॥

पञ्चमीबहुवचनस्य सुंतो इत्यादेशो भवति। वच्छासुंतो वच्छेसुंतो। धणासुंतो धणेसुंतो। मालासुंतो। गिरीसुंतो। दहीसुंतो। बुद्धीसुंतो। गामणीसुंतो इत्यादि॥

दिर्दोत्तोदु ङसौ ॥ ८ ॥

पञ्चम्यादेशेषु दो त्तो दु इत्येषु ङसि पञ्चम्येकवचने च परे पूर्वस्याचो दीर्घो भवति। वच्छाओ वच्छत्तो। 'संयोग' इति दीर्घेऽपि ह्रस्वः, तथापि तद्ग्रहणं भ्यसि एत्वबाधनार्थम्। ङसिनैव सिद्धे दोदुग्रहणमप्येत्वापवादायैव। वच्छाउ वच्छाहिंतो वच्छाहि। धणाओ धणत्तो धणाउ धणाहिंतो धणाहि। गिरीओ गिरित्तो गिरीउ गिरीहिंतो गिरीहि। गोरीओ गोरित्तो गोरीउ गोरीहिंतो गोरीहि। दहीओ दहित्तो दहीउ दहीहि दहीहिंतो। बुद्धीओ बुद्धीउ बुद्धीहिंतो बुद्धित्तो बुद्धीहि। गामणीओ गामणीउ गामणित्तो गामणीहिंतो। तरूओ तरूउ तरुत्तो तरूहिंतो। महूओ महूउ महुत्तो महूहिंतो। धेणूओ धेणूउ धेणुत्तो धेणूहिंतो। बहूओ बहूउ बहूहिंतो बहुत्तो॥

सोर्लुक् ॥ ९ ॥

नाम्नः परस्य सोः प्रथमैकवचनस्य लुग्भवति । हे देव । हे गंगे । हे गोरि । हे लच्छि । हे गामणि । हे बहु ॥

ङसोऽस्त्रियां सर् ॥ १० ॥

ङसः षष्ठ्येकवचनस्य स इत्यादेशो भवति, अस्त्रियां स्त्रीलिङ्गे न भवति । रित्वात् द्वित्वम् । वच्छस्स । धणस्स । गिरिस्स । दहिस्स । गामणिस्स । तरुस्स । महुस्स । अस्त्रियामिति किम् ? गंगाए । गोरीए । धेणूए । बहूए ॥

ङेर्म्मिर् ॥ ११ ॥

नाम्नः परस्य सप्तम्येकवचनस्याऽस्त्रियां म्मिर् इत्यादेशो भवति । रित्वाद् द्वित्वम् । वच्छम्मि । धणम्मि । गिरिम्मि । दहिम्मि । तरुम्मि । बहुम्मि । अस्त्रियामित्येव–मलाए । बुद्धीए । धेणूए । बहूए ॥

अतो डो विसर्गः ॥ १२ ॥

अकारान्तात् परो विसर्गः डिदोकारो भवति । सर्वतः सव्वओ । पुरतः पुरओ । अग्रतः अग्गओ । एवं सिद्धावस्थापेक्षया । भवतः भवओ । भवन्तः भवंतो । सन्तः संतो । कुतः कुओ ॥

सोः ॥ १३ ॥

अत इत्यनुवर्तते । अतः परस्य सोः स्थाने डो भवति । वच्छो । देव्वो ॥

वैतत्तदः ॥ १४ ॥

अदन्ताभ्यामेतत्तद्भ्यां परस्य सोः डो वा भवति । एसो एस । सो स ॥

ङसेः श्लुक् ॥ १५ ॥

वेत्यनुवर्तते । अतः परस्य ङसेः श्लुग्वा भवति । शित्वात् पूर्वस्य दीर्घः । वच्छा । धणा । पक्षे–वच्छाहिंतो वच्छत्तो वच्छाओ वच्छाउ ॥

ङेर्डे ॥ १६ ॥

अतः परस्य सप्तम्येकवचनस्य डिदेत्वं वा भवति । वच्छे । धणे ।

पक्षे—वच्छम्मि । धणम्मि ॥

ङसिसो हि ॥ १७ ॥

अत परस्य ङसिसः पञ्चम्या हि इति वा भवति । वच्छाहि । धणाहि । भ्यस्येत्वे—वच्छेहि । धणेहि । पक्षे-हिंतोत्तोदोदु-इत्येते च ॥

टो डेणल् ॥ १८ ॥

अतः परस्य टावचनस्य डिदेण इत्यादेशो भवति । लित्वान्नित्यम् । वच्छेण । धणेण । अनुस्वारे-वच्छेणं । धणेणं ॥

दिर्वा भ्यसि ॥ १९ ॥

अत इति पञ्चम्यन्तस्य षष्ठ्यन्तविभक्तिविपरिणामः । अतो भ्यसादेशे सति दिः दीर्घो वा भवति । वच्छाहिंतो वच्छेहिंतो । वच्छासुंतो वच्छेसुंतो । वच्छाहि वच्छेहि । तोदोदुषु दीर्घ एव ॥

शस्येत् ॥ २० ॥

अतः शसि परे एद्वा भवति । वच्छे वच्छा पेच्छ ॥

भिस्भ्यस्सुपि ॥ २१ ॥

भिस्-भ्यस्-सुप्-इत्येतेषु परेष्वत एत्वं भवति । पृथग्योगान्नित्यम् । भिसि-वच्छेहिं । भ्यसि-वच्छेहिंतो वच्छेसुंतो वच्छेहि । तोदोदुषु दीर्घ एव । सुपि-वच्छेसु ।

इदुतोर्दिः ॥ २२ ॥

भिस्-भ्यस्-सुपि परे इदुतोः दिः दीर्घो भवति । भिसि-गिरीहिं गिरीहि । एवं-बुद्धीहिं । तरूहिं । धेणूहिं । महूहिं । भ्यसि-गिरीहिंतो गिरीओ गिरीउ गिरीसुंतो । एवं-बुद्धीओ । गामणीओ । तरूओ । महूओ आअअं । सुपि-गिरीसु । दहीसु । गामणीसु । तरूसु ठिअं । क्वचिन्न भवति-दिअभूमिसु दाणजलद्दिआइं द्विजभूमिषु दानजलार्द्रितानि । इदुतोरिति किम् ? वच्छेहि । वच्छेसुंतो । वच्छेसु ॥

चतुरो वा ॥ २३ ॥

चतुःशब्दस्य उदन्तस्य भिस्-भ्यस्-सुपि परे दीर्घो वा भवति । चउहि चऊहि । चउहिंतो चऊहिंतो । चउसु चऊसु ॥

पुंसो जसो डउडओ ॥ २४ ॥

इदुत इत्यस्य पञ्चम्यन्तपरिणामः । पुंलिङ्गादिदुतः परस्य जसः अउ अओ इत्येतौ डितौ वा भवतः । अग्गउ अग्गओ । वाअउ वाअओ । पक्षे-अग्गी अग्गिणो । वाऊ वाउणो । पुंसीति किम् ? बुद्धीइ । दहीइ । इदुत इत्येव-वच्छा ॥

डवो उतः ॥ २५ ॥

पुंस इति वर्तते, जस इति च । पुंलिङ्गादुतः परस्य जसः डित् अवो इति वा भवति । वाअवो । पक्षे-वाअओ वाऊ वाउणो । उत इति किम् ? वच्छा । पुंस इति किम् ? धेणूउ । बहूउ ॥

णो शसश्च ॥ २६ ॥

योगविभागादिदुतौ गृह्येते । इदुतः परस्य जसः शसश्च णो इत्यादेशो भवति । गिरिणो । तरुणो चिट्ठन्ति पेच्छ वा । पक्षे—गिरी । तरू । पुंस इत्येव-बुद्धी । धेणू । दहीइं । महूइं ॥

नृनपि ङसिङसोः ॥ २७ ॥

पुंल्लिङ्गे नपुंसकलिङ्गे च वर्तमानादिदुतः परयोर्ङसिङसोर्णो इत्यादेशो वा भवति । गिरिणो । तरुणो आगओ विआरो वा । पक्षे ङसि-गिरीओ । तरूओ । दहीओ । महूओ । ङस्—गिरिस्स । तरुस्स । दहिस्स । महुस्स । नृनपीति किम् ? बुद्धीए । धेणूए । ङसिङसोरिति किम् ? रिद्धी । समिद्धी । दिट्ठं । इदुत इत्येव-कमले । कमलस्स ॥

टो णा ॥ २८ ॥

पुंनपुंसके वर्तमानादिदुतः परस्य टावचनस्य णा भवति । गिरिणा । दहिणा । गामणिणा । तरुणा । महुणा । खलपुणा । नृनपीत्येव—बुद्धीए । धेणूए । इदुत इत्येव-कमलेण ॥

श्नुगनपि सोः ॥ २९ ॥

इदुतः परस्य सोः शानुबन्धो लुग्भवति, अनपि नपुंसकलिङ्गे न भवति। गिरी । बुद्धी । तरू । धेणू । अनपीति किम् ? दहिं । महुं ॥

मङ् लुगसम्बुद्धेर्नपः ॥ ३० ॥

इदुत इति निवृत्तम् । नपो नपुंसकलिङ्गात्परस्य सोर्मकारो ङानुबन्धो लुक् च भवति, असम्बुद्धेः आमन्त्रणार्थस्य न भवति । वणं । दहिं दहि । महुं महु इति तु सिद्धावस्थापेक्षया । बहुलाधिकारादकारान्तान्न लुक् ॥

श्निशिंशिङ् जश्शसोः ॥ ३१ ॥

नप इत्यनुवर्तते । नपुंसकात्परौ जस् शस् इत्येतौ श्नि शिं शिङ् इति त्रीनादेशानापद्येते शानुबन्धान् । शकारो दीर्घार्थः । ङकारः सानुनासिकोच्चारणार्थः । वणाणि वणाइं वणाइँ । गुणाणि गुणाइं गुणाइँ चिट्ठन्ति पेच्छ वा । एवं दहिमहुबिंद्वादि । नप इत्येव—वच्छा ॥

शोशु स्त्रियां तु ॥ ३२ ॥

जस्शसाविति वर्तते । स्त्रियां वर्तमानान्नाम्नः परौ जस्शसौ ओत्वमुत्वं च शितावापद्येते तु । मालाओ मालाउ । बुद्धीओ बुद्धीउ । एवम्—सहीधेणूबहूप्रभृतयः । पक्षे–माला । बुद्धी । सही । धेणू । बहू । स्त्रियामिति किम् ? वच्छा । जस्शसाविति किम् ? मालाए कअं ॥

आदीतः सोश्च ॥ ३३ ॥

स्त्रियामित्यनुवर्तते । स्त्रियामीकारान्तान्नाम्नः परस्य सोश्चकाराज्जस्शसोश्च आत्वं तु भवति । एसा हसंतीआ । जस् शस्—गोरीआ राहंति पेच्छ वा । पक्षे—हसंतीओ । गोरीओ ॥

ङसेः शशाशिशे ॥ ३४ ॥

स्त्रियां वर्तमानान्नाम्नः परस्य ङसेः अ आ इ ए इति चत्वार आदेशाः शितो भवन्ति तु । मालाअ मालाआ मालाइ मालाए । गोरीअ गोरीआ गोरीइ गोरीए । एवम्—धेणू । बहू । पक्षे—मालाहिंतो मालत्तो मालाओ

मालाउ । एवं—बुद्धीहिंतो इत्यादि ॥

टाङिङसाम् ॥ ३५ ॥

शशाशिशे इत्यनुवर्तते । स्त्रियां नाम्नः परेषां टा ङि ङस् इत्येतेषां स्थाने अ आ इ ए इत्येते आदेशाः शितो भवन्ति । योगविभागान्नित्यम् । जाआअ जाआआ जाआइ जाआए कअं, ठिअं, मुहं वा । कप्रत्यये–जाइआअ जाइ–आआ जाइआइ जाइआए । बुद्धीआअ बुद्धीआआ बुद्धीआइ बुद्धी-आए । कप्रत्ययाभावे–बुद्धीअ बुद्धीआ बुद्धीइ बुद्धीए कअं, ठिअं, अवणं वा । स्त्रियामिति किम् ? वच्छेण । वच्छम्मि । वच्छस्स ॥

नातः शा ॥ ३६ ॥

स्त्रियां वर्तमानानां नाम्नः परेषां टा ङि ङस् इत्येतेषां प्राप्तः शा इति शिदा-कार आकारान्तान्न भवति । मालाअ मालाइ मालाए कअं, ठिअं मुहं वा ॥

पुंसोऽजातेर्ङीब्वा ॥ ३७ ॥

अजातिवाचिनः पुंलिङ्गात् स्त्रियां वर्तमानात् ङीप्प्रत्ययो वा भवति । नीली नीला । काली काला । सहमाणी सहमाणा । सुप्पणही सुप्पणहा । इमीए इमाए । इमीणं इमाणं । एईए एआए । एईणं एआणं । अजातेरिति किम् ? अआआ अआई अआए । अप्राप्ते विभाषाविधिरयम् , तेन गौरी, कुमारी इत्यादौ संस्कृतवदेव नित्यम् ॥

ङीप्(१) प्रत्यये ॥ ३८ ॥

वेत्यनुवर्तते । 'टिड्ढाणञ्' इत्यादिसूत्रेण प्रत्ययनिमित्तो यो ङीप्प्रत्ययो विहितः स स्त्रियां वर्तमानान्नाम्नो वा भवति । सहमाणी । कुरुअरी । पक्षे विकल्पसामर्थ्यादेव टाप् । सहमाणा । कुरुअरा ॥

हरिद्राच्छाये ॥ ३९ ॥

अनयोः ङीप् वा भवति । हलदी हलद्दा । छाही छाहा ॥

किंयत्तदोऽस्वमामि सुपि ॥ ४० ॥

(१) ङीप्-इति नास्ति ख. ।

सु-अम्-आम्-वर्जिते सुपि परे किंयत्तद्भ्यः स्त्रियां ङीप् वा भवति। कीओ काओ। कीए काए। कीसु कासु। जीओ जाओ। जीए जाए। जीसु जासु। तीओ ताओ। तीए ताए। तीसु तासु। अस्वमामीति किम्? का। जा। सा। कं। जं। तं। काणं। जाणं। ताणं॥

स्वसृगात् डाल्॥ ४१॥

स्वस्रादेः स्त्रियां वर्तमानात् आप्रत्ययो डिद्भवति। लित्वान्नित्यम्। ससा। णणंदा। दुहिआ। दुहिआहि। दुहिआसु॥

डोश्लुकौ तु सम्बुद्धेः॥ ४२॥

'सोः' इति यः प्राप्तो डो, यश्च 'श्लुगनपि सोः' इति श्लुक् विहितौ तौ सम्बुद्धेरामन्त्रणार्थस्य सोः तु भवतः। हे देव हे देवो। हे अज्ज हे अज्जो। श्लुक्–हे हरि हे हरी। हे गुरु हे गुरू। हे बुद्धि हे बुद्धी। हे बहु हे बहू। जाइविसुद्धेण पहू जातिविशुद्धेन प्रभो। सम्बुद्धेरिति किम्? दे कासवा। दे गोअरा। रेरे पिलिआ। रेरे णिग्घणिआ॥

ऋदन्ताड्डः॥ ४३॥

सम्बुद्धेरित्यनुवर्तते। ऋदन्तान्नाम्नः परस्य सम्बुद्धेः डित् अत्वं तु भवति। हे पितः हे पिअ। हे दातः हे दाअ॥

नाम्नि डरम्॥ ४४॥

नाम्नि संज्ञायाम् ऋदन्तात्परस्य सम्बुद्धेर्डित् अरमिति तु भवति। हे पिअरं हे पिअ। नाम्नीति किम? हे कत्तार॥

टापो डे॥ ४५॥

टाबन्तात्परस्य सम्बुद्धेर्डित् एत्वं तु भवति। हे माले। हे अज्जे। पक्षे–हे माला। हे अज्जु। इत्यादि। टाप इति किम्? हे पिउच्छा। हे माउच्छा। बहुलाधिकारात् क्वचिदोत्वमपि। अम्मो भणामि भूणिए॥

ह्रस्वलीदूतः॥ ४६॥

सम्बुद्धिनिमित्तयोरीदूतोर्ह्रस्वो लिद्भवति। हे णइ। हे लच्छि। हे बहु॥

क्विपः ॥ ४७ ॥

सम्बुद्धेरिति निवृत्तम् । क्विबन्तयोरीदूतोर्ह्रस्वो भवति । गामणिणा । खलपुणा । गामणिसुंतो । खलपुहिं ॥

उद्दतां त्वस्वमामि ॥ ४८ ॥

ऋदन्तानामुत्वं भवति तु, अस्वमामि सु-अम् आम्-वर्जिते अर्थात् सुपि परे । जसि-भत्तू भत्तुणो भत्तओ भत्तउ । पक्षे-भत्तारा । शसि-भत्तू भत्तुणो । पक्षे-भत्तारा । टा-भत्तुणा भत्तारेण । भिस्-भत्तूहिं । पक्षे-भत्तारेहिं । ङसि-भत्तूहिंतो भत्तुत्तो भत्तूओ भत्तूउ भत्तुणो । पक्षे-भत्ताराहिंतो भत्तारत्तो भत्ताराओ भत्ताराउ भत्तारा भत्ताराहि । ङस्-भत्तुणो भत्तुस्स । पक्षे-भत्तारस्स । ङौ-भत्तुम्मि । पक्षे-भत्तारो । सुप्-भत्तुसु । पक्षे-भत्तारेसु । बहुवचनं व्याप्त्यर्थं, तेन यथादर्शनं नाम्नि उत्वं वा भवति । जस्शस्ङसिङस्सु-पिउणो । जामाउणो । टा-भाउणा । भिस्-पिऊहिं । सुप्-पिऊसु । पक्षे-पिअार इत्यादि । अस्वमामीति किम् ? सु-पिआ । अम्-पिअरं । आम्-पिअराणं ॥

आरः सुपि ४९ ॥

ऋदन्तस्य सुपि परे आर इत्यादेशो वा भवति । भत्तारो । भत्तारा । भत्तारं । भत्तारे । भत्तारेण । भत्तारेहिं । एवमन्यत्राप्युदाहार्यम् । लुप्तविभक्त्यपेक्षया-भत्तारविहिअं ॥

मातुरा अरा ॥ ५० ॥

मातृशब्दस्य आ अरा इत्यादेशौ भवतः । माआ माअरा । माआओ माअराओ । माआइ माअराइ । माअं माअरं । बहुलाधिकाराज्जनन्यर्थस्य आ, देवतार्थस्य अरा । माआए । कुच्छिआए । णमो माअराणं । 'इदुन्मातु-' रित्युत्वे, माउणि । उद्दतां त्वस्वमामीत्युत्वे तु-माउण माउए । समेत्तिअं वंदे । सुपीत्येव-माइदेवो । माइगणो ॥

संज्ञायामरः ॥ ५१ ॥

ऋतन्तस्य संज्ञायां सुपि परे अर इत्यादेशो भवति । पिअरा । पिअरा ।

पिअरं । पिअरे । पिअरेण । पिअरेहिं । जामाअरो । जामाअरा । जामाअरं । जामाअरे । जामाअरेण । जामाअरेहिं ॥

आ सौ वा ॥ ५२ ॥

ऋदन्तस्य सौ परे आत्वं वा भवति । पिआ । माआ । जामाआ । भाआ । भत्ता । कत्ता । पक्षे–पिअरो । माअरो । जामाअरो । भाअरो । भत्तारो । कत्तारो ॥

राज्ञः ॥ ५३ ॥

वेत्यनुवर्तते । राजन्शब्दस्य नलोपे सति अन्त्यस्य सौ परे आत्वं वा भवति । राआ । हे राआ । पक्षे आणादेशे–राआणो । हे राआणो । हे राअं–इति शौरसेन्याम् ॥

टो णा ॥ ५४ ॥

राज्ञ इत्यनुवर्तते । राजनशब्दात् परस्य टावचनस्य णा इत्यादेशो वा भवति । राइणा रण्णा । पक्षे राएण कअं ॥

जश्शस्ङसिङसां णोश् ॥ ५५ ॥

राज्ञः परेषां जस्शस्ङसिङस्–इत्येतेषां णो इत्यादेशः शिद्भवति वा । जस्–राआणो चिट्ठन्ति । पक्षे–राआ । शस्–राआणो पेच्छ । पक्षे–राआ । ङसि–राइणो रण्णो आअओ । पक्षे–राआहिंतो राअत्तो राआओ राआउ राआ राआहिं । ङस्–राणो रण्णो धणं । पक्षे–राअस्स ॥

णोणाङिष्विदना जः ॥ ५६ ॥

राजन्शब्दसम्बन्धिनो जकारस्य अनासहितस्य णो णा इत्यादेशयोः ङिद्वचने च परे इकारो वा भवति । राइणो चिट्ठन्ति पेच्छ आअओ धणं वा । राइणा कअं । राइम्मि ठिअं । पक्षे–राआणो । रण्णा । राएण । राअम्मि ॥

इणममामा ॥ ५७ ॥

अना ज इत्यनुवर्तते । राजन्शब्दसम्बन्धिनो जकारस्य अनासहितस्य अम आम् इत्येताभ्यां सह इणं इत्यादेशो वा भवति । राइणं पेच्छ, राणं वा । पक्षे–राअं राआणं ॥

भिस्भ्यसाम्सुप्स्वीत् ॥ ५८ ॥

राजन्शब्दस्य अनासहितस्य जस्य भिस्भ्यस्आम्सुप्-इत्येतेषु परेषु ईकारो वा भवति । भिस्-राईहिं । भ्यस्-राईहिंतो राईसुंतो राईहि । आम्-राइणं । सुप्-राईसु । पत्ते-राएहिं-इत्यादि ॥

ङस्ङसिटां णोणोर्ङण् ॥ ५९ ॥

राजन्शब्दस्य अनासहितस्य जस्य ङस्ङसिटावचनानां यौ णो णा इत्यादेशौ तयोः परयोः डित् अण इत्यादेशो वा भवति । रण्णो राइणो धणं आअओ वा । रण्णा राइणा कअं । ङस्ङसिटामिति किम् ? राआणो चिट्ठंति पेच्छंति वा । णोणोरिति किम् ? राअस्स । राअओ । राएण ॥

पुंस्याणो राजवच्चानः ॥ ६० ॥

पुंलिङ्गे वर्तमानस्य अन्-इत्यस्य स्थाने आण इत्यादेशो वा भवति । पक्षे यथादर्शनं राजवत् कार्यं च भवति । आणादेशे च 'सोः' इत्यादयः प्रवर्तन्ते । पत्ते तु राजवत् 'टोणा, जस्शस्ङसिङसां णोश्, इणमामा' इति प्रवर्तन्ते । अप्पाणो । अप्पाण । अप्पाणं । अप्पाणे । अप्पाणेण । अप्पाणेहिं । अप्पाणाओ । अप्पाणासुंतो । अप्पाणस्स । अप्पाणाणं । अप्पाणम्मि । अप्पाणेसु । पत्ते राजवत् । अप्पा अप्पो । दे अप्पा दे अप्पो । अप्पाणो चिट्ठन्ति पेच्छ वा । अप्पणा । अप्पेहिं । अप्पाहिंतो । अप्पत्तो । अप्पाओ । अप्पाउ । अप्पा । अप्पाहि । अप्पासुंतो आअओ । अप्पाणो । अप्पाणं । अप्पम्मि । अप्पेसु । राआणो । राआणा राआणं । राआणे । राआणेण । राआणाहिं । राआणाहिन्तो । राआणासुंतो । राआणस्स । राआणाणं । राआणम्मि । राआणेसु । पत्ते-राआ इत्यादि । एवं-जुवाणो । जुवाणा । जुवा । ब्रह्मन्-बंह्मणो बंह्मा । अध्वन्-अद्धाणो अद्धा । उक्षन्-उच्छाणो उच्छा । ग्रावन्-गावाणो गावा । पूषन्-पूसाणो पूसा । तक्षन्-तक्खाणो तक्खा । मूर्धन्-मुद्धाणो मुद्धा । श्वन्-साणो सा । सुकर्मन्-सुकम्माणो सुकम्मा । पेच्छइ स कहं सुकम्माणो । पश्यति स कथं सुकर्मा । पुंसीति किम् ? शर्मन्-सम्मं ॥

टो वात्मनो णिआणइआ ॥ ६१ ॥

आत्मनः परस्य टावचनस्य णिआ णइआ इत्यादेशौ वा भवतः । पुनर्वाग्रहणादुत्तरत्र न विकल्पः । अप्पणिआ अप्पणइआ । पक्षे-अप्पाणेण । अप्पेण ॥

सर्वादेर्जसोऽतो डे ॥ ६२ ॥

सर्वादेरदन्तात्परस्य जस एत्वं डिद्भवति । सव्वे । अण्णे । जे । ते । के । इअरे । अवरे । एए । अत इति किम् ? सव्वाओ ॥

ङेस्त्थस्सिम्मि ॥ ६३ ॥

सर्वादेरित्यनुवर्तते, अत इति च । सर्वादेरदन्तात्परस्य ङेः स्थाने त्थ स्सि म्मि इति त्रय आदेशा भवन्ति । सव्वत्थ सव्वस्सि सव्वम्मि । अण्णत्थ अण्णस्सि अण्णम्मि । एवं सर्वत्र । अत इत्येव—अमुम्मि ॥

अनिदमेतदस्तु कियत्तदः स्त्रियां च हिं ॥ ६४ ॥

इदमेतद्वर्जितात् सर्वादेः परस्य ङेः हिं-इत्यादेशो भवति तु कियत्तद्भ्यः स्त्रियामपि । सव्वहिं । अण्णहिं । जहिं । तहिं । कहिं । पक्षे-सव्वत्थ सव्वस्सि सव्वम्मि-इत्यादि । स्त्रियां किम् ? कियत्तदः-काहिं । जाहिं । ताहिं । बाहुलकादेव कियत्तदोऽस्वमामि, सुपीति ङीब् वा भवति । काए कीए । इत्यादि । अनिदमेतद इति किम् ? इमस्सि । अस्सि ॥

आमो डेसिं ॥ ६५ ॥

त्वित्यनुवर्तते । सर्वादेः परस्यामः डित् एसिं-इत्यादेशो भवति तु । सव्वेसिं । अण्णेसिं । इमेसिं । एसिं । एएसिं । जेसिं । तेसिं । केसिं । पक्षे-सव्वाणं । अण्णाणं । इत्यादि । आमामिति बहुवचनात् स्त्रीविषयस्यापि सर्वासां सव्वेसिं । एवम्-अण्णेसिं । जेसिं । तेसिं ॥

कितद्भ्यां सश् ॥ ६६ ॥

कितद्भ्यां परस्यामः शित् सकारो वा भवति । कास । तास । पक्षे-केसिं । तेसिं ॥

कियत्तद्भ्यो ङस् ॥ ६७ ॥

सश् इत्यनुवर्तते। किंयत्तद्भ्यः परो ङस् (तस्य) सश् इत्यादेशो वा भवति। कास। जास। तास। पक्षे–कस्स। जस्स। तस्स। बहुलाधिकारात् किंयत्तद्भ्यः स्त्रियामपि। कस्याः कास। यस्याः जास। तस्याः तास। पक्षे—काए। जाए। ताए॥

ईतः सेसार् ॥ ६८ ॥

ङसिति वर्तते। ईकारान्तेभ्यः किंयत्तद्भ्यः परस्य ङसः से सा इति वा भवतः। सा इत्यस्य रित्वात् द्वित्वम्। कीसे। किस्सा। पक्षे–कीअ। कीआ। कीइ। कीए। जीसे। जिस्सा। जीअ। जीआ। जीइ। जीए। तीसे। तिस्सा। तीअ। तीआ। तीइ। तीए॥

ङिरिआडाहेडाला काले ॥ ६९ ॥

कालेऽभिधेये किंयत्तद्भ्यः परो ङिः इआ इत्यादेशम्, आहे आला इत्येतौ च डितावापद्यते वा। कइआ काहे काला। जइआ जाहे जाला। तइआ ताहे ताला। ताला जाअंति गुणा, जाला ते सहिअएहि घेप्पंति। तदा जायन्ते गुणाः, यदा ते सहृदयैर्गृह्यन्ते। पक्षे—कहिं कत्थ कस्सिं कम्मि इत्यादि॥

म्हा ङसेः ॥ ७० ॥

किंयत्तद्भ्यः परस्य ङसेः म्हा इत्यादेशो भवति तु। कम्हा। जम्हा। तम्हा। पक्षे—काओ। जाओ। ताओ॥

किमो डीसडिणो ॥ ७१ ॥

किमः परस्य ङसेः ईस इणो इत्यादेशौ डितौ भवतः। कीस किणो। पक्षे—कम्हा काओ॥

डो तदस्तु ॥ ७२ ॥

तदः परस्य ङसेः डिदोत्वं तु भवति। तो तम्हा तस्मात्॥

इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥ ७३ ॥

एभ्यः सर्वादिभ्योऽदन्तेभ्यः परस्य टावचनस्य इणा इति डिद्भवति तु। इमिणा इमेण। एदिणा एदेण। किणा केण। जिणा जेण। तिणा तेण॥

क्वचित्सुपि तदो णः ॥ ७४ ॥

सुपि परे तच्छब्दे णो भवति तु, क्वचित्-लक्ष्यानुसारेण । णं पेच्छ तं पश्य । स्त्रियामपि-हत्था णमिअमुही भणइ णं तिअडा । हस्तात् नमितमुखी भणति तां त्रिजटा । णेण भणिअं तेन भणितम् । णीए तया । णेहि कअं तैः कृतम् । णाहि कअं ताभिः कृतम् ॥

त्रतसि च किमो ल्कः ॥ ७५ ॥

सुपीत्यनुवर्तते । किंशब्दस्य त्रतसोः सुपि च परे लित् को भवति । को । के । कं । के । केण । केहिं । त्र-कत्थ कस्सिं । तस्—कत्तो कदो ॥

इदम इमः ॥ ७६ ॥

इदमः सुपि परे इम इत्यादेशो भवति । इमो । इमे । इमं । इमे । इमेण । इमेहिं । स्त्रियामपि—इमा ॥

पुंसि सुना त्वयं स्त्रियामिमिआ ॥ ७७ ॥

इदमः सुना सहितस्य पुंल्लिङ्गे अयमिति स्त्रियाम्-इमिआ इति तु भवति । अयं कअकज्जो । इमिआ सणिअमाआ । पक्षे—इमो । इमा ॥

अत्सुस्सिंहिस्से ॥ ७८ ॥

इदमः सुप्ङिभिस्ङस्-इत्येतेषु सु स्सिं हि स्स इत्यादेशेष्वापन्नेषु अत्त्वं तु भवति । एसु । अस्सिं । एहि । अस्स । पक्षे-इमेसु । इमस्सिं । इमेहिं । इमाहिं । इमस्स ॥

टासासि णः ॥ ७९ ॥

टासति तृतीयाविभक्तिः, अस्-इति द्वितीया विभक्तिः, तयोः परयोरिदमः स्थाने ण इत्यादेशो भवति तु । णेण णेहि कअं । णं णे पेच्छ । पक्षे—इमेण । इमेहिं । इमं । इमे ॥

इहणं ङ्यमः ॥ ८० ॥

ङि अम्-इत्याभ्यां सहितस्य इदमः स्थाने इह इणं इत्येतौ क्रमेण तु भवतः । ङि—इह । अम्—इणं । पक्षे—इमस्सिं इमम्मि । इमं ॥

न त्थः ॥ ८१ ॥

इदमः परस्य ङिद्वचनस्य 'ङेस्त्थस्सिंम्मि' इति प्राप्तः त्थो न भवति इमस्सिं इमम्मि ॥

क्लीबे स्वमेदमिणमिणमो ॥ ८२ ॥

नपुंसके वर्तमानस्य इदमः सु अम् इत्याभ्यां सहितस्य इदं इणं इ इति त्रय आदेशा भवन्ति । इदं इणं इणमो चिट्ठंति पेच्छ वा ॥

किं किं ॥ ८३ ॥

क्लीबे, स्वमेति च वर्तते । क्लीबे वर्तमानः किम्शब्दः स्वमा सहितः मेव भवति । किं कुलं । किं भणासि ॥

तदिदमेतदां सेसिं तु ङसामा ॥ ८४ ॥

तद् इदम् एतद्–इत्येतेषां स्थाने ङस् आम् इत्याभ्यां सह यथासंख्यं इत्यादेशौ तु भवतः । तद्–से गुणा । तस्य गुणाः, तस्या वा । सिं उच्छ तेषामुत्साहः, तासां वा । इदम्—से सिलं । अस्य शीलम्, अस्या वा गुणा । एषां गुणाः, आसां वा । एतद्–से हिअअं । एतस्य हृदयम्, एतस्य सिं गुणा । एषां गुणाः, एतासां वा । पक्षे–तस्स । तेसिं । ताण । इ इमस्सिं । इमाण । एअस्स । एअस्सिं । एआण । तदेतदोरमा सह से सि आदेशं केचिदिच्छन्ति ॥

एत्तोएत्ताहे ङसिनैतदः ॥ ८५ ॥

त्वित्यनुवर्तते । एतदो ङसिना सह एत्तो एत्ताहे इत्यादेशौ तु भ एत्तो एत्ताहे आगओ । पक्षे–एआहिंतो एअत्तो एआओ एआहि एआउ

थे डेल् ॥ ८६ ॥

एतदः स्थाने रानुबन्धे थकारे परे डानुबन्धो लानुबन्धश्च एत् भवति ।

एतो म्मावदितौ वा ॥ ८७ ॥

सप्तम्येकवचनादेशे म्मौ परे एतद एकारस्य अ इ इत्यादेशौ वा भ अअम्मि, इइम्मि । पक्षे—एअम्मि ॥

सुनैसइणमोइणं ॥ ८८ ॥

एतदः सुना सह एस इणमो इणं इत्यादेशा वा भवन्ति । एस सहाओ च्चिअ ससहरस्स । एष स्वभाव एव शशधरस्य । एस गई । एषा गतिः । सव्वस्स वि एस गई । सर्वस्याप्येषा गतिः । एस सरं । एतच्छिरः । इणमो । इणं । पक्षे—एसा । एओ । एअं ॥

तस्सौ सोऽक्लीबे तदश्च ॥ ८९ ॥

तदश्चकारादेतदश्च तकारस्य सौ परे सकारो भवति, अक्लीबे अनपुंसके । सो पुरिसो । सा महिला । एसो पिओ । एसा पिआ । एसा मुद्धा । सौ इत्येव-ते, एए चिट्ठंति । ताओ, एआओ महिलाओ । अक्लीब इति किम् ? तं, एअं वणं ॥

सुप्यदसोऽमुः ॥ ९० ॥

अदसः स्थाने सुपि परे अमु इत्यादेशो भवति । अमू पुरिसो । अमुणो पुरिसा । अमुं वणं । अमूइं वणाइं । अमू महिला । अमूओ महिलाओ । टा—अमुणा । अमूहिं । ङसि—अमूहिंतो अमूओ अमूहि अमूउ अमुत्तो । भ्यस्—अमूहिंतो अमूसुंतो । ङस्—अमुणो अमुस्स । आम्—अमूणं । ङि—अमुम्मि । सुप्—अमूसु ॥

अहद्दा सुना ॥ ९१ ॥

अदसः सुना सह अहदित्यादेशो भवति तु । तकारस्तावन्मात्रदर्शनार्थः, तेन स्त्रियामात्वं न भवति । अह पुरिसो । अह महिला । अह वणं । अह णे हसइ हिअएण मारुअतणओ । असावस्मान् हसति हृदयेन मारुततनयः । पक्षे—अमू पुरिसो । अमू महिला । अमुं वणं ॥

इआओ म्मौ ॥ ९२ ॥

अदसो ङिद्वचनादेशे म्मौ परे इअ अअ इत्यादेशौ तु भवतः । इअम्मि । अअम्मि ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः ॥

युष्मत्सुना तुवंतुंतुमंतुह ॥ १ ॥

युष्मच्छब्दः सुना सहितः तुवं तुं तुमं तुह इत्यादेशांश्चतुरः प्राप्नोति। तुवं तुं तुमं तुह दिट्ठोसि। तं-इति तु त्वामित्यस्य सिद्धावस्थायां वलोपे ह्रस्वे च ॥

अमा तुमेतुए च ॥ २ ॥

युष्मदित्यनुवर्तते। युष्मच्छब्दोऽमा सह तुमे तुए इत्येतौ चकारात्तवमादि-चतुष्टयं चापद्यते। तुमे तुए। पक्षे-तुवं तुं तुमं तुह वंदामि ॥

जसा भेतुब्भेतुय्हेउय्हेतुब्भ ॥ ३ ॥

युष्मच्छब्दो जसा सह भे तुब्भे तुय्हे उय्हे तुब्भ इति पञ्चदेशानापद्यते। भे तुब्भे तुय्हे उय्हे तुब्भ चिट्ठ वा भोम्ह। 'वा ब्भो म्हज्झा'विति वचनात् तुम्हे तुज्झे तुम्ह तुज्झ इति नव रूपाणि ॥

शसा वो च ॥ ४ ॥

युष्मच्छब्दः शसा सह वो इति चकारात् भे इत्यादींश्चादेशानापद्यते। वो भे तुब्भे तुय्हे उय्हे तुब्भ तुम्हे तुज्झे तुम्ह तुज्झ इति दश रूपाणि ॥

टा भेतेदेदितुमंतुमइ ॥ ५ ॥

युष्मत् टावचनेन सह भे ते दे दि तुमं तुमइ इति षडादेशानापद्यते। भे ते दे दि तुमं तुमइ कअं ॥

ङिटाभ्यां तुमएतुइतुएतुमाइतुमे ॥ ६ ॥

युष्मद् ङिटाभ्यां सह तुमए तुइ तुए तुमाइ तुमे इति पञ्च रूपाण्याप्नोति। तुमए तुइ तुए तुमाइ तुमे ठिअं कअं वा ॥

तुब्भतुहिंतोतुय्ह ङसिना ॥ ७ ॥

युष्मत् ङसिना सह तुब्भ तुहिंतो तुय्ह इति त्रीणि रूपाण्यापद्यते। तुब्भ तुहिंतो तुय्ह आगओ वा। 'वा ब्भो म्हज्झा'विति वचनात् तुम्ह तुज्झ इति पञ्च रूपाणि ॥

तुतुइ ङिप्ङसौ ॥ ८ ॥

ङिप् सप्तमीविभक्तिः, ङसिः पञ्चम्येकवचनम्, तयोः परयार्युष्मच्छब्दो यथासंख्यं तु तुइ इत्येतावादेशौ वापद्यते । सप्तमीङस्योर्यथाप्राप्तमेव । सप्तम्यां-तु तुम्मि तुसु । ङसौ—तुइ तुइत्तो तुईहिंतो तुईओ तुईउ आगओ ॥

तुवतुमतुहतुब्भ ॥ ९ ॥

ङिप्ङसावित्यनुवर्तते । ङिपि ङसौ च परे युष्मद् तुव तुम तुह तुब्भ इति चत्वारि रूपाण्यापद्यते । ङिप्ङस्योर्यथाप्राप्तमेव । ङि—तुवम्मि तुमम्मि तुहम्मि तुब्भम्मि । 'वा ब्भो म्हज्झा'विति वचनात् तुम्हम्मि तुज्झम्मि । सुपि—तुवेसु तुमेसु तुहेसु तुब्भेसु तुम्हेसु तुज्झेसु ठिअं । 'क्त्वासुपोस्तु सुणा'दित्यनुस्वारे तुवेसुं इत्यादि । ङसौ—तुवाहिंतो तुमाहिंता तुहाहिंतो तुब्भाहिंतो । 'वा ब्भो म्हज्झा'विति वचनात् तुम्हाहिंतो तुज्झाहिंतो । एवं तुवत्तो तुमत्तो तुहत्तो तुब्भत्तो तुम्हत्तो तुज्झत्तो इति । दोदुहिंतसुंतेष्वप्युदाहार्यम् । तत्तो इति तु त्वत्त इत्यस्य वलोपे ॥

भिसा भेतुब्भेह्युब्भेह्युय्हेहितुय्हेहि ॥ १० ॥

युष्मद् भिसा सह भे तुब्भेहि उब्भेहि उय्हेहि तुय्हेहि इति पञ्च रूपाण्यापद्यते । भे तुब्भेहि उब्भेहि उय्हेहि तुय्हेहि कअं । 'वा ब्भो म्हज्झा'विति वचनात् तुम्हेहि तुज्झेहि उम्हेहि उज्झेहि । एवं नव रूपाणि ॥

उम्होय्हतुय्हतुब्भ भ्यसि ॥ ११ ॥

भ्यसि परे युष्मद् उम्ह उय्ह तुय्ह तुब्भ इति चत्वारि रूपाण्यापद्यते । भ्यसस्तु यथाप्राप्तमेव । उम्हाहिंतो उय्हाहिंतो तुय्हाहिंतो तुब्भाहिंतो आगओ । 'वा ब्भो म्हज्झा'विति वचनात् तुम्हाहिंतो तुज्झाहिंतो । उम्हत्तो उय्हत्तो तुय्हत्तो तुब्भत्तो तुम्हत्तो तुज्झत्तो इत्यादि । एवं दोदुहिंतसुंतेष्वप्युदाहार्यम् ॥

तुब्भोब्भोय्हतइतुहंतुहतुम्हंतुवतुमतुमेतुमाइतुमोदे-तेदितुइए ङसा ॥ १२ ॥

युष्मद् ङसा सह तुब्भ उब्भ उय्ह तइ तुहं तुह तुम्हं तुव तुम तुमे तुमाइ

तुभो दे ते दि तु इ ए इत्यष्टादशादेशानापद्यते । 'वा भो म्हज्झा'विति वचनात् तुम्ह तुज्झ उम्ह उज्झ इति द्वाविंशतिरूपाणि ॥

तुम्हाणतुब्भंतुब्भाणतुमाणतुवाणतुहाण-
तुब्भवोभेत्वाऽऽमा ॥ १३ ॥

युष्मद् आमा सह तुम्हाण तुब्भं तुब्भाण तुमाण तुवाण तुहाण तुब्भ वो भे त्वा इति दशादेशानापद्यते । तुम्हाण तुब्भं 'वा भो म्हज्झा'विति वचनात् तुम्हं तुज्झं तुब्भाण तुम्हाण तुज्झाण तुब्भ तुम्ह तुज्झ । 'क्त्वासुपोस्तु सुणा'दित्यनुस्वारे तुम्हाणं तुब्भाणं तुम्हाणं तुज्झाणं तुमाणं तुवाणं तुहाणं । एवं त्रयोविंशतिरूपाणि ॥

वा भो म्हज्झौ ॥ १४ ॥

युष्मदादेशसम्बन्धिनो द्विरुक्तस्य भकारस्य ह्म ज्झ इत्यादेशौ वा भवतः । तच्च यथास्थानमुदाहृतमेव ॥

अस्मत्सुना अम्हिहमहअमहमहम्म्यम्मि ॥ १५ ॥

अस्मच्छब्दः सुना प्रथमैकवचनेन सह अम्हि हं अहअं अहं अहम्मि अम्मि इति षडादेशानाप्नोति । अम्हि करेमि अहं करोमि । तेण हं दिट्ठो तेनाहं दृष्टः । अहअं जप्पामि अहं कथयामि । अहं गमिस्सं अहं गमिष्यामि । अज्ज अहम्मि हासिआ अद्याहं हासिता । न अम्मि कुविआ नाहं कुपिता ॥

मोभेवअं जसा ॥ १६ ॥

अस्मदित्यनुवर्तते । जसा सहाऽस्मच्छब्दः मो भे वअं इति त्रीनादेशानापद्यते । मो भणामो इत्यादि ॥

अम्हेअम्होअम्ह ॥ १७ ॥

अस्मत् जसा सह अम्हे अम्हो अम्ह इति त्रीनादेशानापद्यते । योगविभाग उत्तरार्थः । अम्हे इत्यादि ॥

णे च शसा ॥ १८ ॥

शसा सहाऽस्मच्छब्दः णे इति चकारात् अम्हे इत्यादि त्रीनादेशांश्चा-पद्यते । णे अम्हे पेच्छ इत्यादि ॥

मंणेणंमिमिमंममअम्मियहंमम्हाम्ह अमा ॥ १९ ॥

अस्मदमा सह मं णे णं मि मिमं ममं अम्मि अहं मम्ह अम्ह इति दशादेशानापद्यते । मं पेच्छ इत्यादि ॥

मिमइममाइमएमे ङिटा ॥ २० ॥

ङिवचनेन टावचनेन सहाऽस्मद् मि मइ ममाइ मए मे इति पञ्चादेशा-नापद्यते । मि ठिअं कअं वा इत्यादि ॥

ममंणेमआइममए टा ॥ २१ ॥

टावचनेन सहाऽस्मद् ममं णे मआइ ममए इति चतुर आदेशानापद्यते । ममं कअं इत्यादि ॥

णेऽम्हेह्यम्हाह्यम्हेऽम्ह भिसा ॥ २२ ॥

भिसा सहाऽस्मद् णे अम्हेहि अम्हाहि अम्हे अम्ह इति पञ्चादेशानापद्यते । णे कअं इत्यादि ॥

मइममहमज्झ ङसौ ॥ २३ ॥

ङसौ पञ्चम्येकवचने परेऽस्मद् मइ मम मह मज्झ इति चतुर आदेशा-नापद्यते । ङसेस्तु यथाप्राप्तमेव । मईहिंतो मइत्तो मईओ मईउ । एवं ममा-हिंतो ममत्तो ममाओ ममाउ ममाहि ममा । एवं महाहिंतो महत्तो मज्झा-हिंतो मज्झत्तो । इत्यादि ॥

अह्ममम भ्यसि ॥ २४ ॥

भ्यसि पञ्चमीबहुवचने परेऽस्मद् अह्म मम इत्यादेशावापद्यते । अम्हा-हिंतो अम्हेहिंतो अम्हत्तो अम्हाओ अम्हाउ अम्हासुंतो अम्हेसुंतो अम्हाहि अम्हेहिं ममाहिंतो ममेहिंतो ममत्तो ममाओ ममाउ ममासुंतो ममाहिं ॥

अम्हंमज्झंमज्झमइमहमहंमे च ङसा ॥ २५ ॥

ङसा सह अस्मच्छब्दः अम्हं मज्झं मज्झ मइ मह महं मे इति सप्तादेशान्

चकारात् अम्हममौ चापद्यते । अम्हं इत्यादि ॥

अम्हेअम्होअम्हाणममाणमहाणमज्झाण-
मज्झाह्माह्मंणेणो आमा ॥ २६ ॥

आमा सह अस्मत् अम्हे अम्हो अम्हाण ममाण महाण मज्झाण मज्झा अम्ह अम्हं णे णो इति एकादशादेशानाप्नोति । अम्हे धणं इत्यादि । 'क्त्वा-सुपोस्तु सुणा'दित्यनुस्वारे-अम्हाणं । एवं पञ्चदश रूपाणि ॥

अम्हममज्झमह ङिपि ॥ २७ ॥

सप्तमीविभक्तौ परतः अस्मद् अम्ह मम मज्झ मह इति चतुर आदेशानापद्यते । ङिपो यथाप्राप्तमेव । ङि-अम्हम्मि ममम्मि मज्झम्मि महम्मि । सुप्-अम्हेसु ममेसु मज्झेसु महेसु । एत्वविकल्पमते-अम्हसु ममसु मज्झसु महसु । आत्वमपीच्छन्त्यन्ये-अम्हासु ममासु मज्झासु महासु । 'क्त्वासुपोस्तु सुणा'-दित्यनुस्वारे-अम्हेसुं ममेसुं मज्झेसुं महेसुं । अम्हसुं ममसुं मज्झसुं महसुं अह्मासुं ममासुं मज्झासुं महासुं । एवमष्टादशरूपाणि ॥

चतुरो जश्शस्भ्यां चउरोचत्तारोचत्तारि ॥ २८ ॥

चतुःशब्दस्य जस्शस्भ्यां सह चउरो चत्तारो चत्तारि इति त्रय आदेशा भवन्ति । चउरो चत्तारो चत्तारि चिट्ठन्ति पेच्छ वा ॥

तिण्णि त्रेः ॥ २९ ॥

जश्शस्भ्यामिति वर्तते । त्रिशब्दस्य जस्शस्भ्यां सह तिण्णि इत्यादेशो भवति । तिण्णि पुरिसा माहिला वणाणि वा चिट्ठन्ति पेच्छ वा ॥

दोण्णिदुवेवेण्णि द्वेः ॥ ३० ॥

द्विशब्दस्य जस्शस्भ्यां सह दोण्णि दुवे वेण्णि इति त्रय आदेशा भवन्ति । दोण्णि दुवे वेण्णि महिला चिट्ठंति पेच्छ वा । 'संयोग'इति ह्रस्वे-दुण्णि विण्णि ॥

दोवे टादौ च ॥ ३१ ॥

द्वेरिति वर्तते । द्विशब्दस्य टादौ तृतीयादौ विभक्तौ परतः दो वे इत्यादेशौ

भवतः, चकारात् जस्शस्भ्यां सहितस्य च । दोहिं वेहिं कअं । दोहिंतो वेहिंतो आगओ । दोराणं वेराणं धणं । दोसु वेसु ठिअं । जस्शस्भ्यां दो वे ठिआ पेच्छ वा ॥

ति त्रेः ॥ ३२ ॥

टादावित्यनुवर्तते । त्रिशब्दस्य टादौ परे ति इत्यादेशो भवति । ति कअं त्रिभिः कृतं तिसृभिर्वा । तिहिंतो आअओ त्रिभ्यः तिसभ्यो वा आगतः । तेणं धणं त्रयाणां तिसृणां वा धनम् । तिसु ठिअं त्रिषु तिसृषु वा स्थितम् ॥

ह्ल ह्लं संख्याया आमोऽविंशतिगे ॥ ३३ ॥

संख्याशब्दात्परस्यामः ह्ल ह्लं इत्यादेशौ भवतः, अविंशतिगे विंशत्यादीन् वर्जयित्वा । दोह्ल तिह्ल दोह्लं तिह्लं । चउह्ल चउह्लं । पंचह्ल पंचह्लं । छह्ल, छह्लं । सत्तह्ल सत्तह्लं । अठह्ल अठह्लं । णवह्ल णवह्लं । दसह्लं दसह्लं । पण्हारह्ल पण्हारह्लं । अठ्ठारह्ल अठ्ठारह्लं । कइह्ल कइह्लं कतीनाम् । अविंशतिगे इति किम् ? विसाणं । तिसाणं ॥

द्विवचनस्य बहुवचनम् ॥ ३४ ॥

सर्वासां विभक्तीनां स्वादीनां तिङादीनां च द्विवचनस्य स्थाने बहुवचनं भवति । दोण्णि कुणंति द्वौ कुरुतः । दोहिं । दोसुंतो । दोह्लं । दोसु । दो पाआ द्वौ पादौ । दोण्णि हत्था द्वौ हस्तौ । दुवे णअणा द्वे नयने । वेण्णि कण्णा द्वौ कर्णौ ॥

ङसो ङम् ॥ ३५ ॥

ङस् चतुर्थीविभक्तिः, ङम् षष्ठीविभक्तिः । ङसः स्थाने ङम् भवति । मुणिस्स, मुणीणं भोअणं देहि । णमो देवस्स, देवाणं ॥

तादर्थ्ये ङेस्तु ॥ ३६ ॥

तादर्थ्ये विहितस्य ङेः चतुर्थ्येकवचनस्य स्थाने ङम् षष्ठी तु भवति । देवस्स देवाअ देवार्थमित्यर्थः । ङेरिति किम् ? देवाणं ॥

वधात् डाइ च ॥ ३७ ॥

त्वित्यनुवर्तते । वधशब्दात् परस्य ङेः स्थाने डित् आइ इत्यादेशः षष्ठी चतुर्थी च भवति । वहाइ वहस्स वधाय । वधार्थमित्यर्थः ॥

क्वचिदसादेः ॥ ३८ ॥

अस् द्वितीयाविभक्तिः । असादीनां विभक्तीनां स्थाने षष्ठीविभक्तिः क्वचिद्भवति । सिरिमंधरस्स वंदे श्रीमन्धरं वन्दे । तेस्स मुहस्स सरिमो तस्या मुखं स्मरामः । अत्र द्वितीयायाः । धणस्स लद्धं धनेन लब्धम् । तेहि एस आइण्णं तैरेतदाचीर्णम् । अत्र तृतीयायाः । चोरस्स भिहइ चोराद्विभेति । इमाण पाअंतसहिआण इअराइ लहुअक्खराइंति । एभ्यः पादान्तसहितेभ्य इतराणि लघ्वक्षराणीति । अत्र पञ्चम्याः । वणसिरिवट्ठिए कबरीव्व वनश्रीपृष्ठे कबरीव । अत्र सप्तम्याः ॥

असूटासोर्ङिप् ॥ ३९ ॥

अस् द्वितीया, टास् तृतीया, तयोः स्थाने ङिप् सप्तमी क्वचिद्भवति तु । गामे वहामि । णअरे णजामि । ग्रामं वहामि । नगरं नयामि । अत्र द्वितीयायाः । तेसुं अलंकआ पुहवी । तैरलङ्कृता पृथिवी । अत्र तृतीयायाः ॥

ङसिसष्टाश्च ॥ ४० ॥

ङसिसः पञ्चम्याः स्थाने टास् तृतीया चकारात् सप्तमी च क्वचिद्भवति । चोरेण भिहइ चोराद्विभेति । अंतेउरे रमिअ आगओ अन्तःपुराद्रन्त्वागतः ॥

ङिपोऽस् ॥ ४१ ॥

ङिपः सप्तम्याः स्थाने अस् द्वितीया क्वचिद्भवति । विज्जुज्जोअं भरइ रइं विद्युद्द्योते स्मरति रतिम् ॥

लुक् क्यङोर्यस्य तु ॥ ४२ ॥

क्यङन्तस्य द्विवचनात् षष्ठ्यन्तस्य च सम्बन्धिनो यस्य लुग् भवति तु । गुरूअइ गुरूइ । अगुरुर्गुरुर्भवति, गुरुरिवाचरति वा क्यङ् । धमधमाअइ धमधमाइ । लोहिआअइ लोहिआइ ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥

लटस्तिताविजेच् ॥ १ ॥

लट् वर्तमानं तत्सम्बन्धिनः प्रथमपुरुषस्य एकत्वे वर्तमानौ यौ परस्मैपदात्मनेपदत्वेन विहितौ तिप् तङ् इत्येतौ प्रत्येकम् इच् एच् च इत्येतौ भवतः । चकारौ 'हुरचिति' इति विशेषणार्थौ । हसइ हसए । रमइ रमए ॥

सिप्थास्सेसि ॥ २ ॥

लट इत्यनुवर्तते । परस्मैपदात्मनेपदयोर्मध्यमपुरुषस्य एकत्वे वर्तमानौ सिप् थास् इत्येतौ प्रत्येकं से सि इत्येतौ तु भवतः । हससे हससि । रमसे रमसि ॥

मिर्मिबिटौ ॥ ३ ॥

लटः परस्मैपदात्मनेपदोत्तमपुरुषैकवचनत्वे वर्तमानौ मिप् इट् इत्येतौ प्रत्येकं मि इति भवतः । हसामि । रमामि । बहुलाधिकारात् मिबिटोरादेशस्य मेरिकारस्य लोपश्च । बहु वरिणउं ण सक्कं बहु वर्णितुं न शक्नोमि । ण मरं न म्रिये ॥

झिझौ न्तिन्तेइरे ॥ ४ ॥

लटः प्रथमपुरुषस्य बहुत्वे वर्तमानौ झि झ इत्येतौ प्रत्येकं न्ति न्ते इरे इति त्रीनादेशानापद्येते । हसन्ति हसन्ते । रमन्ति रमन्ते । हसिज्जन्ति हसिज्जन्ते । रमिज्जन्ति रमिज्जन्ते । गज्जन्ते सो मेहा, उव्वज्जन्ते कइ हिअअसांअरे कव्वरअणाइ । हुप्पिरे बाहू प्रभवतो बाहू । क्वचिदेकत्वे इरे—सूसइरे ताण तारिसो कंठो शुष्यति तासां तादृशः कण्ठः ॥

थध्वमित्थाहचौ ॥ ५ ॥

लटो मध्यमपुरुषबहुत्वे वर्तमानौ थ ध्वम् इत्येतौ प्रत्येकम् इत्था हच् इत्यादेशावापद्येते । हसित्था हसह । रमित्था रमह । बहुलाधिकारादित्थाऽन्यत्रापि–जं ते रोइत्था यत्ते रोचते । हजिति चकारः 'इह हचो'रिति विशेषणार्थः ॥

मोममु मस्महिङ् ॥ ६ ॥

लट उत्तमपुरुषबहुत्वे वर्तमानौ मस् महिङ् इत्येतौ प्रत्येकं मो म मु इति त्रीनादेशानापद्येते । हसामो हसाम हसामु । रमामो रमाम रमामु ॥

अत एवैच्से ॥ ७ ॥

लटः प्रथमपुरुषस्य एकत्वे य एच् , यश्च मध्यमपुरुषैकत्वे विहितः से तौ अकारान्तादेव भवतः, नान्यस्मात् । हसए हससे । तुवरए तुवरसे । करए करसे । अत इति किम् ? ठाइ ठासि । वसुआइ वसुआसि । होइ होसि ॥

त्वस्तेर्म्हम्होम्हि ममोमिना ॥ ८ ॥

अस्तेर्धातोः स्थाने म मो मि इत्येतैः सह यथासंख्यं म्ह म्हो म्हि इत्यादेशा भवन्ति तु । गअम्ह गअम्हो गअम्हि गताःस्म । एसम्हि एषोऽस्मि । मुकारस्याग्रहणादप्रयोग एव तस्येत्यवसीयते । पक्षे—अत्थि अम्हे । अत्थि अहं ॥

सिना ल्सि ॥ ९ ॥

अस्तेरित्यनुवर्तते । अस्तेर्धातोः सिना मध्यमपुरुषैकवचनादेशेन सह सि इत्यादेशो लिद्भवति । णिट्ठुरो जं सि निष्ठुरो यदसि । सिनेति किम् ? से-आदेशे सति—अत्थि तुमं ॥

तिङात्थि ॥ १० ॥

अस्तेस्तिङा तिबादिना सह अत्थि इत्यादेशो भवति । अत्थि सो । अत्थि ते । अत्थि तुमं । अत्थि तुम्हे । अत्थि अहं । अत्थि अम्हे ॥

णिजदेदावावे ॥ ११ ॥

धातोः प्रेरणार्थे विहितो यो णिच्प्रत्ययः स अत् एत् आव आवे इति चतुर आदेशानाप्नोति । तकारस्तावन्मात्रत्वदर्शनार्थः । अत्—दरिसइ । एत्—कारेइ । आव—कारावइ । आवे-कारावेइ । हासावइ हासाइ हासावेइ हासेइ । उवसमावइ उवसमेइ । बहुलाधिकारात् क्वचिन्नास्ति—जाणइ जाणावइ जाणावेइ । क्वचिदावेर्नास्ति—यावइ यावेइ यावाइ ॥

शुष्यादेरविर्वा ॥ १२ ॥

णिजित्यनुवर्तते । शुष्यादिणिचः अविः इति वा भवति । शोषितं सोसाविअं सोसिअं । तोषितं तोसाविअं तोसिअं ॥

भ्रमेराडः ॥ १३ ॥

भ्रमेर्धातोः परो णिच आड इति वा भवति । भमाडइ । पक्षे—भमावइ भमावेइ भामइ भामेइ ॥

लुगाविल् भावकर्मक्ते ॥ १४ ॥

भावकर्मविहिते प्रत्यये क्तप्रत्यये च परे णिच् लुक् आवि इत्यादेशावाप्नोति । लित्वान्न विकल्पः । भावकर्मणोः—कारिअइ काराविअइ कारिज्जइ काराविज्जइ । हासिअइ हासाविअइ हासिज्जइ हासाविज्जइ । क्ते—कारिअं काराविअं । हासिअं हासाविअं । खामिअं खामाविअं ॥

अदेल्लुक्यात्खोरतः ॥ १५ ॥

अत एत् लुक् इत्येतेषु णिचः स्थाने विहितेषु खोरादेरतः अकारस्य आत् आत्वं भवति । अत्—पाडइ । मारइ । एत्—कारेइ । मारेइ। खामेइ । लुक्—कारिअइ कारिज्जइ । खामिअइ खामिज्जइ । अदेल्लुगिति किम् ? काराविअं कारिअं । काराविअइ काराविज्जइ । खोरिति किम् ? स गामइ, इह व्यवहितस्य मा भूत् । कारिअं, इहान्त्यस्य मा भूत् । अत इति किम् ? आसेइ । केचित्तु आवे आवि इत्येतयोरपि आदेरत आत्वमिच्छन्ति—कारवेइ । हासाविओ जणो सामलंगीए ॥

तु मौ ॥ १६ ॥

अत इत्यनुवर्तते, अदिति च । अदन्ताद्धातोः मौ लडुत्तमपुरुषैकवचनादेशे परे सति आद्भवति तु । हसामि हसमि । जाणामि जाणमि । लिहामि लिहमि । अत इत्येव—होमि ॥

मोममुष्विच्च ॥ १७ ॥

त्वित्यनुवर्तते । अकारान्ताद्धातोः मो म मु इत्येतेषु परेषु अत इत्वं चकारादात्वं च भवति तु । भणिमो भणामो । भणिम भणाम । भणिमु भणामु । पक्षे—भणमो भणम भणमु । 'वा लड्लोट्छतृषु' इत्येत्वे तु—भणेमो भणेम भणेमु । अत इत्येव—मिअं । होमो ॥

क्ते ॥ १८ ॥

इदित्यनुवर्तते। क्तप्रत्यये परे अत इत्वं भवति। हसिअं। पसिअं। नमिअं। हासिअं। पासिअं। नामिअं। नअअं, इत्यादि तु सिद्धावस्थापेक्षया। अत इत्येव—लूअं। हूअं॥

एच्च क्त्वातुंतव्यभविष्यति ॥ १९ ॥

क्त्वातुंतव्येषु भविष्यत्कालविहिते च प्रत्यये परतः अत एत्वं चकारादित्वं च भवति। क्त्वा-हसेऊण हसिऊण। तुम्-हसेउं हसिउं। तव्य-हसेअव्वं हसिअव्वं। भविष्यत्-हसेहिइ हसिहिइ। अत इत्येव-जाऊण। काऊण॥

वा लड्लोट्छतृषु ॥ २० ॥

एदित्यनुवर्तते। लड् वर्तमानं लोट् पञ्चमी तयोः शतृप्रत्यये च परतः अत एत्वं वा भवति। हसेइ हसिइ। हसेम हसिम। लोट्-हसेउ हसिउ। सुणेउ सुणउ। शतृ-हसेंतो हसंतो। क्वचिन्न भवति-जअइ। क्वचिदात्वमपि-सुणाइ॥

ज्जाज्जे ॥ २१ ॥

ज्जाज्ज इत्येतयोः परयोरत एत्वं भवति। हसेज्जा हसेज्ज। अत इत्येव-होज्जा होज्ज॥

भूतार्थस्य सिहिअहि ॥ २२ ॥

भूतार्थे विहितो योऽनद्यतनादिः प्रत्ययः स भूतार्थः लुङ् लङ् लिट् तस्य स्थाने सि हिअ हि इति त्रय आदेशा भवन्ति। उत्तरत्र 'हल ईअ' इति विधानात् स्वरान्तादेवायं विधिः। कासि काहिअ काहि। अकार्षीत् अकरोत् चकार। एवं-ठासि ठाहिअ ठाहि॥

हल ईअ ॥ २३ ॥

भूतार्थस्येत्यनुवर्तते। हलन्ताद्धातोः परस्य भूतार्थस्य लुङादिप्रत्ययस्य ईअ इत्यादेशो भवति। हुईअ। अभूत्, अभवत्, बभूव वा। एवम्-आसीअ। आसिष्ट, आस्त, आसांचक्रे वा। गहीअ। अग्रहीत्, अगृह्णात्, जग्राह वा॥

अहेस्यासी तेनास्तेः ॥ २४ ॥

अस्तेर्धातोः तेन भूतार्थेन प्रत्ययेन सह अहेसि आसि इत्यादेशौ भवतः । अहेसि सो तुम अह वा । जे अहेसि, ये आसन् । एवम्-आसि ॥

भविष्यति हिरादिः ॥ २५ ॥

भविष्यदर्थविहितप्रत्यये परतः तस्यैवादिः हि इति प्रयोक्तव्यः । होहिइ । भविष्यति भविता वा । होहिंति । होहिसि । होहित्था । होहिमा । हसिहिइ । काहिइ ॥

हास्सा मिमोमुमे वा ॥ २६ ॥

भविष्यतीत्यनुवर्तते, आदिरिति च । भविष्यत्यर्थे उत्तमपुरुषादेशेषु मि मो मु म-इत्येतेषु परेषु तेषामेवादिः हा स्सा इत्येतौ वा प्रयोक्तव्यौ । पक्षे-हिरपि । होहामि होस्सामि । होहामो होस्सामो । होहामु होस्सामु । होहाम होस्साम । होहिमो होहिमि होहिमु होहिम । क्वचित्तु हा न भवति । हसिहिमो हसिस्सामो । हसिहिमु हसिस्सामु । हसिहम हसिस्साम ॥

हिस्साहित्था मुमोमस्य ॥ २७ ॥

वेत्यनुवर्तते । भविष्यति काले मु मो म-इत्येतेषां स्थाने हिस्सा हित्था इत्येतौ धातोः परतो वा प्रयोक्तव्यौ । होहिस्सा होहित्था । पक्षे-होहिमु होहिमो होहिम । क्वचित्तथा न भवति-होस्सामो । इत्यादि ॥

डच्छ दृशिगम इजादौ हिलुक्च वा ॥ २८ ॥

दृश् गम् इत्याभ्यां धातुभ्यां भविष्यदादिषु इच् इत्यादिषु परेषु डित् अच्छ इत्ययं वा भवति, हेश्च लुग्वा भवति । डित्वादन्त्याजादेर्लुक् । दच्छिइ दच्छिहिइ । दच्छिंति दच्छिहिंति । दच्छिसि दच्छिहिसि । दच्छित्था दच्छिहित्था । दच्छिह दच्छिहिह । दच्छिमि दच्छिहिमि । दच्छिहामि दच्छिस्सामि । दच्छिस्सं दच्छिहिस्सं । दच्छिमो दच्छिहिमो दच्छिहामो दच्छिस्सामो । दच्छिहिस्सा दच्छिहित्था । दच्छिम दच्छिहिम । दच्छिहाम दच्छिस्साम । दच्छिमु दच्छिहिमु । दच्छिहामु दच्छिस्सामु । एवं-गच्छिइ गच्छिहिइ । गच्छिंति गच्छिहिंति । गच्छिसि गच्छिहिसि । गच्छित्था गच्छिहित्था । गच्छिह गच्छिहिह । गच्छिमि गच्छिहिमि । गच्छिहामि गच्छिस्सामि । गच्छिस्सं

गच्छिहिस्सं। गच्छिमो गच्छिहिमो। गच्छिहामो गच्छिस्सामो। गच्छिहिस्सा गच्छिहित्था। गच्छिम गच्छिहिम। गच्छिहाम गच्छिस्साम। गच्छिमु गच्छिहिमु। गच्छिहामु गच्छिस्सामु॥

भिदिविदिच्छिदो डेच्छ ॥ २९ ॥

हिलुक्च वेत्यनुवर्तते, इजादाविति च। भिद् विद् छद्-इत्येतेभ्यो धातुभ्यो भविष्यदर्थेषु तिप्राद्यादेशेषु इजादिषु परेषु डित् एच्छ इत्ययं वा भवति, हिलुक्च वा। भेच्छिइ भेच्छिहिइ। भेच्छिंति भेच्छिहिंति। भेच्छिसि भेच्छिहिसि। भेच्छित्था भेच्छिहित्था। भेच्छिह भेच्छिहिह। भेच्छिम भेच्छिहिम। भेच्छिमि भेच्छिहिमि। भेच्छिहामि भेच्छिस्सामि। भेच्छिस्सं भेच्छिहिस्सं। भेच्छिमो भेच्छिहिमो। भेच्छिहामो भेच्छिस्सामो। भेच्छिहिस्सा भेच्छिहित्था। एवं मम्वोरपि। विदि-वेच्छिइ वेच्छिहिइ। वेच्छिंति वेच्छिहिंति। वेच्छिसि वेच्छिहिसि। वेच्छित्था वेच्छिहित्था। वेच्छिह वेच्छिहिह। वेच्छिमि वेच्छिहिमि। वेच्छिहामि वेच्छिस्सामि। वेच्छिस्सं वेच्छिहिस्सं। वेच्छिमो वेच्छिहिमो। वेच्छिहामा वेच्छिस्सामो। वेच्छिहिस्सा वेच्छिहित्था। एवं मम्वोरपि। छिदिर्-छेच्छिइ छेच्छिहिइ। छेच्छिंति छेच्छिहिंति। छेच्छिसि-छेच्छिहिसि। छेच्छित्था छेच्छिहित्था। छेच्छिह छेच्छिहिह। छेच्छिम चेच्छिहिम। छेच्छिमि छेच्छिहिमि। छेच्छिहामि छेच्छिस्सामि। छेच्छिस्सं छेच्छिहिस्सं। छेच्छिमो छेच्छिहिमो। छेच्छिहामो छेच्छिस्सामो। छेच्छिहिस्सा छेच्छिहित्था। एवं मम्वोरपि॥

डोच्छ वचिमुचिरुदिश्रुभुजः ॥ ३० ॥

वचि मुचि रुदि श्रु भुजि-इत्येतेभ्यो धातुभ्यो भविष्यदर्थेषु तिब्राद्यादेशेषु इजादिषु परेषु डित् ओच्छ इति वा भवति, हिलुक्च वा। वचि-वोच्छिइ वोच्छिहिइ। वोच्छिंति वोच्छिहंति। वोच्छिसि वोच्छिहिसि। वोच्छित्था वोच्छिहित्था। वोच्छिह वोच्छिहिह। वोच्छिमि वोच्छिहिमि। वोच्छिहामि वोच्छिस्सामि। वोच्छिस्सं वोच्छिहिस्सं। वोच्छिमो वोच्छिहिमो। वोच्छिहामा वोच्छिस्सामो। वोच्छित्था वोच्छिहित्था। एवं मम्वोरपि। मुचि-मोच्छिइ मोच्छिहिइ। मोच्छिंति मोच्छिहिति। मोच्छिसि मोच्छिहिसि। मोच्छित्था मोच्छिहित्था।

मोच्छिह मोच्छिहिह। मोच्छिमि मोच्छिहिमि। मोच्छिहामि मोच्छिस्सामि। मोच्छिस्सं मोच्छिहिस्सं। मोच्छिमो मोच्छिहिमो। मोच्छिहामो मोच्छिस्सामो। मोच्छित्था मोच्छिहित्था। एवं मम्वोरपि। रुदि-रोच्छिइ रोच्छिहिइ। रोच्छिंति रोच्छिहिंति। एवं स्यादिष्वपि। श्रु-सोच्छिइ सोच्छिहिइ। सोच्छिंति सोच्छिहिंति। सोच्छिसि सोच्छिहिसि। एवमिडादिष्वपि। भुजि-भोच्छिइ भोच्छिहिइ। भोच्छिंति भोच्छिहिंति। भोच्छिसि भोच्छिहिसि। एवमिडादिष्वपि॥

ङं मेश्छात्ततः॥ ३१॥

भविष्यति दृशादिभ्यो धातुभ्यः परतः पूर्वसूत्रैस्त्रिभिरुक्तानां डच्छडेच्छडोच्छानां यश्छकारस्ततः परस्य मेः उत्तमपुरुषैकवचनादेशस्य स्थाने ङित् अं इत्यादेशस्तु भवति। दच्छं द्रक्ष्यामि। गच्छं गमिष्यामि। संगच्छं सङ्गंस्ये। भेच्छं भेत्स्यामि। वेच्छं वेदिष्यामि। छेच्छं छेत्स्यामि। वोच्छं वक्ष्यामि। मोच्छं मोक्ष्यामि। रोच्छं रोदिष्यामि। सोच्छं श्रोष्यामि। भोच्छं भोक्ष्ये। पक्षे—दच्छिमि दच्छिहिमि दच्छिहामि दच्छिस्सामि दच्छिस्सं। एवं गमादिष्वप्युदाहार्यम्। छात्तत इति किम्? हिहास्सा इत्येतेभ्यः परो मा भूत्। गच्छिहिमि, गच्छिहामि, गच्छिस्सामि॥

कृदो हं॥ ३२॥

मेरित्यनुवर्तते। करोतेर्ददातेश्च परतो भविष्यति विहितस्य मेः स्थाने हं इति वा प्रयोक्तव्यः। काहं। दाहं। पक्षे-काहिमि। दाहिमि। इत्यादि॥

र्सं॥ ३३॥

धातोः परो भविष्यति काले मेः स्थाने र्सं इति वा भवति। रित्वाद् द्वित्वम्। होस्सं हविस्सं।। पक्षे-होहिमि। होहामि। होस्सामि। इत्यादि॥

त्विज्जाल्लिङः॥ ३४॥

लिङः सप्तम्यादेशात् जा इत्यस्मात्पर इकारस्तु प्रयोक्तव्यः। होज्जा होज्जाइ। भवेत्। वाधिकारे पुनस्तुग्रहणादुत्तरत्र विकल्पः॥

एकस्मिन् प्रथमादेर्विध्यादिषु दुसुमु ॥ ३५ ॥

विध्यादिषु विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु वर्तमानानां प्रथमादेः प्रथमादिपुरुषाणामेकत्वे वर्तमानानां प्रत्ययानां स्थाने यथासंख्यं दु सु मु-इत्यादेशाः स्युः। हसउ सा। हससु तुमं। हसामु अहं। पेच्छउ। पेच्छसु। पेच्छामु। दकारोच्चारणं भाषान्तरार्थम्॥

बहौ न्तुहमो ॥ ३६ ॥

विध्यादिष्वर्थेषु विहितानां प्रथममध्यमोत्तमपुरुषाणां बहुत्वे वर्तमानानां प्रत्ययानां स्थाने यथासंख्यं न्तु ह मो इत्यादेशा भवन्ति। हसन्तु। हसन्तु हसेयुर्वा। हसह। हसत हसेत वा। हसामो। हसाम हसेम वा। एवं तुवरन्तु तुवरह तुवरामो। एवं सर्वधातुष्वप्युदाहार्यम्॥

सोस्तु हि ॥ ३७ ॥

विध्यादिष्वर्थेषु सोर्मध्यमपुरुषैकवचनस्य स्थाने हि-इत्यादेशः स्यात् तु। देहि देसु। होइ होसु॥

लुगिज्जहीज्जस्विज्जेऽतः ॥ ३८ ॥

सोरित्यनुवर्तते, त्विति च। अतः अकारात्परस्य सेः स्थाने लुक् इज्जहि इज्जसु इज्जे इति त्रयश्चादेशा भवन्ति तु। हस हसिज्जइ हसिज्जसु हसिज्जे। पक्षे-हससु। अत इति किम्? होसु। ठाइ॥

लड्लृटोश्च जर्जारौ ॥ ३९ ॥

लड्लृटोर्वर्तमानभविष्यतोश्चकाराद्विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज जा इत्येतौ रितौ तु भवतः। रित्वाद् द्वित्वम्। लट्-हसेज्ज हसेज्जा। पडेज्ज पडेज्जा। सुणेज्ज सुणेज्जा। पक्षे-हसइ। पडइ। सुणइ। लृट्-पडेज्ज पडेज्जा। सुणेज्ज सुणेज्जा। पक्षे-पडिहि। सुणिहि। विध्यादिषु-हसेज्ज हसेज्जा। हसतु हसेद्वा। पक्षे-हसउ। एवं सर्वत्र पुरुषेषु वचनेषु च अन्येषामपि लकाराणामिच्छन्ति। होज्ज होज्जा। भवति, भवेत्, भवतु, अभवत्, अभूत्, बभूव, भूयात्, भविता, भविष्यति, अभविष्यत् वेत्यर्थः॥

मध्ये चाजन्तात् ॥ ४० ॥

जर्जारावित्यनुवर्तते। अजन्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकारात् प्रत्ययानां च स्थाने जर् जार् इत्येतौ भवतः, लड्लृटोर्विध्यादिषु च । होज्जइ होज्जाइ । होज्ज होज्जा । होज्जहिमि होज्जाहिमि । विध्यादिषु–होज्जइ होज्जाइ । होज्ज होज्जा । भवतु भवेद्वा । पक्षे–होइ । अजन्तादिति किम् ? हसेज्ज हसेज्जा । तुवरिज्ज तुवरिज्जा ॥

माणन्तौल् च लृङः ॥ ४१ ॥

लृङः क्रियादिवृत्तेः यौ तिप्तौ तत्स्थाने माण न्त इत्येतौ चकारात् जर्जारौ च भवतः । लित्वान्न विकल्पः । होमाणो होन्तो होज्ज होज्जा । अभविष्यदित्यर्थः ॥

शतृशानचोः ॥ ४२ ॥

माणन्तौ–इत्यनुवर्तते । शतृ शानच्–इत्येतयोः प्रत्यययोः स्थाने माण न्त इत्येतौ प्रत्येकं भवतः । शतृ–हसमाणो हसन्तो । शानच्–सहमाणो सहन्तो ॥

स्त्रियामी च ॥ ४३ ॥

स्त्रियां वर्तमानयोः शतृशानचोः स्थाने ईत्वं चकारान्माणन्तौ च भवतः । हसई हसमाणा हसन्ती । वेवई वेवमाणा वेवन्ती ॥

घेत्तुंतव्यक्त्वासु ग्रहेः ॥ ४४ ॥

तुंतव्यक्त्वाप्रत्ययेषु परतो ग्रहेर्धातोर्घेत् इति भवति तुम्–घेत्तुं । तव्य–घेत्तव्वं । क्त्वा–घेत्तुआण घेत्तूण । कचिन्न भवति–गहिउं । गेण्हिअ ॥

अन्त्यस्य वचिमुचिरुदिश्रुभुजां डोत् ॥ ४५ ॥

तुंतव्यक्त्वास्वित्यनुवर्तते। वचि मुचि रुदि श्रु भुजि इत्येतेषां धातूनामन्त्यस्य तुंतव्यक्त्वाप्रत्ययेषु ओत् इत्यादेशो डिद्भवति । वचि–वोत्तुं। वोत्तव्वं। वोत्तुआण वोत्तूण । मुचि–मोत्तुं । मोत्तव्वं । मोत्तुआण मोत्तूण । रुदि–रोत्तुं रोत्तव्वं । रोत्तुआण रोत्तूण । भुजि–भोत्तुं । भोत्तव्वं । भोत्तुआण भोत्तूण ॥

ता द्वो दृशः ॥ ४६ ॥

अन्त्यस्येत्यनुवर्तते। दृशो धातोरन्त्यस्य तुंतव्यक्त्वासु परतः तेषामेव प्रत्ययानामादिना तकारेण सह द्विरुक्तठकारो भवति। दट्ठुं। दट्ठव्वं। दट्ठुआण दट्ठूण॥

आ भूतभविष्यति च कृञः॥ ४७॥

कृञोऽन्त्यस्य आ इत्यादेशो भवति, भूतभविष्यत्प्रत्यये चकारात् तुंतव्यक्त्वासु च परतः। काहिअ। अकार्षीत्, अकरोत्, चकार वा। काहिइ। करिष्यति कर्ता वा। तुम्—काउं। तव्य—काअव्वं। क्त्वा—काउआण काऊण॥

नमोद्विजरुदां वः॥ ४८॥

नमतेः उद्विजतेः रुदितेश्चाऽन्त्यस्य वकारो भवति। णवइ। उव्विवइ उव्वेइ। रुवइ रोवइ॥

चर्नृतिमदिव्रजाम्॥ ४९॥

नृत मद् व्रज–इत्येतेषां धातूनामन्त्यस्य चकारो भवति। रित्वाद् द्वित्वम्। णच्चइ। मच्चइ। वच्चइ॥

छर्गमिष्यमासाम्॥ ५०॥

गम् इष् यम् आस्–इत्येतेषामन्त्यस्य छो भवति। रित्वाद् द्वित्वम्। गच्छइ। इच्छइ। जच्छइ। अच्छइ॥

रुधो न्धम्भौ॥ ५१॥

रुधेरन्त्यस्य न्ध म्भ इत्येतौ भवतः। रुन्धइ रुम्भइ॥

युधबुधगृधक्रुधसिधमुहां च ज्झः॥ ५२॥

युधबुधगृधक्रुधसिधमुह्–इत्येतेषां चकाराद्रुधेश्चान्त्यस्य द्विरुक्तो झकारो भवति। जुज्झइ। बुज्झइ। गिज्झइ। कुज्झइ। सिज्झइ। मुज्झइ। रुज्झइ॥

जर् स्विदाम्॥ ५३॥

स्विदिप्रकाराणां धातूनामन्त्यस्य जो भवति। रित्वाद् द्वित्वम्। सिज्जइ। सव्वंगसिरिए संपज्जइ सर्वाङ्गश्रिया संपद्यते। खिज्जइ। बहुवचनं प्रयोगानुसरणार्थम्॥

छिदिभिदो न्दः ॥ ५४ ॥

छिदिभिदोरन्त्यस्य न्द इत्यादेशो भवति । छिन्दइ । भिन्दइ ॥

ढः कथिवर्धाम् ॥ ५५ ॥

कथतेर्वर्धतेश्चान्त्यस्य ढत्वं भवति । कढई । वड्ढइ । बहुवचनाद् वृधेः कृतगुणस्य वर्धेश्चाऽविशेषेण ग्रहणम् ॥

वेष्टः ॥ ५६ ॥

ढ इति वर्तते । वेष्ट वेष्टन इत्यस्य धातोः 'कगटडे'त्यादिना षलोपे टस्य ढो भवति । वेढइ । वेढिज्जइ ॥

समुदो लर् ॥ ५७ ॥

सम् उद् इत्युपसर्गाभ्यां परस्य वेष्टेरन्त्यस्य लकारो रिद्भवति । संवेल्लइ । उव्वेल्लइ । बहुलाधिकरादुतः परस्यापि वा ढः—उव्वेल्लइ । उव्वेढइ ॥

खादधावि लुक् ॥ ५८ ॥

खादतौ धावतौ चान्त्यस्य लुग्भवति । खाइ, खाअइ । खाओ, खाइओ । धाइ, धाअइ । धाओ, धाइओ । बहुलाधिकाराद्वर्तमानभविष्यद्विध्याद्येकवचन एव भवति, तेनेह न भवति–खादन्ति । धावन्ति । क्वचित्—धावइ पुरओ इति च दृश्यते ॥

रः सृजि ॥ ५९ ॥

सृजिधातावन्त्यस्य रत्वं भवति । विसरइ, ओसरइ । ओसरामि ॥

डः सीदपति ॥ ६० ॥

सीदतौ पततौ चान्त्यस्य डत्वं भवति । सडइ । पडइ ॥

मीलेः प्रादेर्द्वे तु ॥ ६१ ॥

प्रादेरुपसर्गात्परस्य मीलेरन्त्यस्य द्वे रूपे तु भवतः । पमिल्लइ, पमीलइ । निमिल्लइ, निमीलइ । संमिल्लइ, संम्मीलइ । उम्मिल्लइ, उम्मीलइ । प्रादेरिति किम् ? मीलइ ॥

चलस्फुटे ॥ ६२ ॥

द्वे इत्युनुवर्तते। चलतौ स्फुटितौ चान्त्यस्य द्वे रूपे तु भवतः। चल्लइ, चलइ। फुड्डइ, फुडइ॥

शाकगे ॥ ६३ ॥

शाकादिषु धातुष्वन्त्यस्य द्वे रूपे भवतः। योगविभागान्नित्यम्। शक-सक्कइ। मृग-मग्गइ। लग-लग्गइ। षिच-सिच्चइ। अट-अट्टइ। लुट-लुट्टइ। त्रुट-तुट्टइ। कुप-कुप्पइ। जिम-जिम्मइ। णश-णस्सइ। इत्यादि॥

उवर्णस्यावः ॥ ६४ ॥

धातोरन्त्यस्य उवर्णस्य अव इत्यादेशो भवति। न्हुङ्-निन्हवइ। च्यु-चवइ। रु-रवइ। क्नू-कवइ। सु-सवइ। पसवइ॥

योरेङ् ॥ ६५ ॥

इश्च उश्च युः तस्य, तयोर्धात्वोरिवर्णोवर्णयोः एङ् एदोतौ यथासंख्यं भवतः। इवर्णस्य एकारः, उवर्णस्य ओकारः। जेऊण। जित्वा। नेऊण। नीत्वा। नेइ। नयति। उड्डेइ। उड्डेति। सोऊण। क्वचिन्न भवति-नीओ। उड्डीणो॥

अर उः ॥ ६६ ॥

ऋवर्णस्य धातारन्त्यस्य अर इत्यादेशो भवति। करइ। धरइ। वरइ। सरइ। भरइ। मरइ। तरइ। जरइ॥

अरि वृषाम् ॥ ६७ ॥

वृषप्रकाराणां धातूनामृवर्णस्याऽरि इत्यादेशो भवति। वृष्—वरिसइ। मृष्-मरिसइ। कृष्-करिसइ। हृष्-हरिसइ। बहुवचनं प्रयोगानुसरणार्थम्॥

रुषगेऽचो दिः ॥ ६८ ॥

रुषादिधातुष्वचो दीर्घो भवति। रुष-रूसइ। शुष-सूसइ। दुष-दूसइ। तुष—तूसइ। पुष-पूसइ। शिष-सीसइ। इत्यादि॥

हलोऽक् ॥ ६९ ॥

हलन्ताद्धातोः परः अगागमो भवति । ककारोऽन्तविध्यर्थः । हसइ । भमइ । रमइ । गच्छइ । भुञ्जइ । उवसमइ । पावइ । सिंचइ । रुन्धइ । मुसइ । वहइ । सहइ । शस्प्रभृतीनां प्रायः प्रयोगो न भवति ॥

त्वनतः ॥ ७० ॥

अगिति वर्तते । अकारान्तवर्जिताद्धातोः परः अगागमो भवति तु । पाअइ, पाइ । ठाअइ, ठाइ । वाअइ, वाइ । धाअइ, धाइ । जाअइ, जाइ । झाअइ, झाइ । भाअइ, भाइ । बिभेति, भाति वा । जंभाअइ, जंभाइ । जृम्भते । उव्वाअइ, उव्वाइ । उद्वाति । मिलाअइ, मिलाइ । म्लायते । विक्केअइ, विक्केइ । विक्रीणीते । अनत इति किम् ? चिइच्छइ । चिकित्सते ॥

अचोऽचाम् ॥ ७१ ॥

धातुषु अचां स्थाने अचो बहुलं भवन्ति । हवइ, हिवइ । चिणइ, चुणइ । सद्दहणं, सद्दहाणं । धवइ, धुवइ । रुवइ, रोवइ । क्विचिन्नित्यम्—जेइ । चेइ । देइ । लेइ । विहेइ । नासइ ॥

णो ह्रस्व चिजिपूश्रुधूस्तुहुलूभ्यः ॥ ७२ ॥

चिजिपूश्रुधूस्तुहुलू इत्येतेभ्यः परो ण इत्यागमो भवति, तत्संनियोगेन ह्रस्व, दीर्घस्य च ह्रस्वः । चिणइ । जिणइ । पुणइ । सुणइ । धुणइ । थुणइ । हुणइ । लुणइ । बहुलाधिकारात् क्वचिद्विकल्पः । उच्चेणइ, ऊच्चेइ । जिणिऊण, जेऊण । जिणइ, जेणइ । सुणिऊण, साऊण ॥

भावकर्मणि तु वर्यग्लुक् च ॥ ७३ ॥

भावे कर्मणि च वर्तमानेभ्यः चिजिपूश्रुधूस्तुहुलूभ्यः परो वकारागमो भवति तु, तत्संनियोगेन यक्प्रत्ययस्य लुक् । रित्वात् द्वित्वम् । चिव्वइ, चिणिज्जइ । जिव्वइ, जिणिज्जइ । पुव्वइ, पुणिज्जइ । सुव्वइ, सुणिज्जइ । धुव्वइ, धुणिज्जइ । एवं भविष्यति—चिव्वहिइ, चिणिज्जहिइ । इत्यादि ॥

मर्चेः ॥ ७४ ॥

भावकर्मणीत्यनुवर्तते । चिनोतेः परो भावकर्मणि मागमो रिद्भवति, तत्संनियोगेन यग्लुक च । चिम्मइ । पक्षे—चिव्वइ, चिणिज्जइ । भविष्यति—

चिम्महिइ, चिव्वहिइ, चिणिज्जहिइ ॥

अन्त्यस्य हनखनोः ॥ ७५ ॥

मरिति वर्तते। हनखन इत्येतयोः अन्त्यस्य भावकर्मणि मागमो रिद्भवति तु, तत्संनियोगेन यग्लुक् च। हम्मइ, हणिज्जइ। खम्मइ, खणिज्जइ। भविष्यति—हम्मिहिइ, हणिज्जहिइ। खम्मिहिइ, खणिज्जहिइ। बहुलाधिकारात् हन्तेः कर्तर्यपि–हम्मइ। हन्तीत्यर्थः। क्वचिन्न भवति–हंतव्वं। हंतूण। हओ॥

दुहलिहवहरुहां भस्त उच्च ॥ ७६ ॥

दुहलिहवहरुह इत्येषामन्त्यस्य भकारो रिद्भवति तु, तत्संनियोगेन यग्लुक्च, वहेरतः उकारश्च। दुब्भहि, दुहिज्जइ। लुब्भइ, लिहिज्जइ। वब्भइ, वहिज्जइ। रुब्भइ, रुहिज्जइ। भविष्यति–दुब्भिहिइ, दुहिज्जहिइ॥ इत्यादि॥

दहेर्झर् ॥ ७७ ॥

अन्त्यस्येत्यनुवर्तते। दहेरन्त्यस्य भावकर्मणि झकारो रिद्भवति तु, तत्संनियोगेन यग्लुक् च। डज्झइ, डहिज्झइ। भविष्यति–डज्जिहिइ, डहिज्जहिइ॥

बन्धो न्धः ॥ ७८ ॥

झरित्यनुवर्तते। बन्धेर्धातोः न्ध इत्यस्य भावकर्मणि झरित्यादेशो भवति तु, तत्संनियोगेन यग्लुक् च। बज्झइ, बन्धिज्झइ। भविष्यति–बन्धिहिइ, बन्धिज्जहिइ॥

रुध उपसमनोः ॥ ७९ ॥

उप सम् अनु इत्येतेभ्यः परस्य रुन्धेरन्त्यस्य भावकर्मणि झर् भवति तु, तत्संनियोगेन यग्लुक् च। उवरुज्झइ। संरुज्झइ। अणुरुज्झइ। पक्षे–उवरुंधिज्जइ। संरुंधिज्जइ। अणुरुंधिज्जइ। भविष्यति–उवरुज्झहिइ। संरुज्झहिइ। इत्यादि॥

द्वे गमिगे ॥ ८० ॥

गमादौ धातोरन्त्यस्य भावकर्मणि द्वे रूपे भवतः, तत्संनियोगेन यक्प्रत्ययस्य लुक् च। गम्–गम्मइ, गमिज्जइ। हस्–हस्सइ, हसिज्जइ। भण्–भण्णइ, भणिज्जइ। लुभ्–लुब्भइ, लुभिज्जइ। कथ्–कत्थइ, कहिज्जइ। कुप्–कुप्पइ,

कुपिज्जइ। भुज्-भुज्जइ, भुजिज्जइ। रुद्-रुव्वइ, रुविज्जइ। 'नमोद्धिजरुदा'-मिति कृतवकारादेशो रुदिरत्र। भविष्यति-गम्मिहिइ, गच्छिज्जहिइ। इत्यादि ॥

ईर हृकृतृज्राम् ॥ ८१ ॥

हृञ् कृञ् तॄ जॄ इत्येतेषामन्त्यस्य भावकर्मणि ईर इत्यादेशो भवति तु, तत्संनियोगेन यग्लुक् च। हीरइ, हरिज्जइ। कीरइ, करिज्जइ। तीरइ, तरिज्जइ। जीरइ, जरिज्जइ ॥

अर्जेर्विढप्पः ॥ ८२ ॥

अन्त्यस्येति निवृत्तम्। अर्जेर्विढप्प इत्यादेशो भावकर्मणि भवति तु, तत्संनियोगेन यग्लुक् च। विढप्पइ। पक्षे-अज्जिज्जइ, विढप्पिज्जइ ॥

आरभ आढप्पः ॥ ८३ ॥

आरभतेर्भावकर्मणि आढप्प इत्यादेशो भवति तु, यग्लुक् च। आढप्पइ। पक्षे-आरभिज्जइ, आढप्पिज्जइ ॥

णप्पणज्जौ ज्ञः ॥ ८४ ॥

जानातेर्भावकर्मणि णप्प णज्ज इत्यादेशौ तु भवतः, यग्लुक् च। णप्पइ। णज्जइ। पक्षे-जाणिज्जइ। मुणिज्जइ। 'ज्ञम्नो'रिति णत्वे-णाइज्जइ। नञ्पूर्वस्य-अणाइज्जइ ॥

सिप्पः सिचस्निहोः ॥ ८५ ॥

सिञ्चतेः स्निह्यतेश्च भावकर्मणि सिप्प इत्यादेशो भवति तु, यग्लुक् च। सिप्पइ। सिच्यते, स्निह्यते वा। पक्षे-सिंचिज्जइ। णिहिज्जइ ॥

वाहिप्पो व्याहृः ॥ ८६ ॥

व्याहरतेर्भावकर्मणि वाहिप्प इत्यादेशो भवति तु, यग्लुक् च। वाहिप्पइ। पक्षे-वाहरिज्जइ ॥

ग्रहेर्घेप्पः ॥ ८७ ॥

ग्रहेर्भावकर्मणि घेप्प इत्यादेशो भवति तु, यग्लुक् च। घेप्पइ। पक्षे-गेण्हिज्जइ ॥

छिप्पः स्पृशतेः ॥ ८८ ॥

स्पृशतेर्भावकर्मणि छिप्प इत्यादेशो भवति तु, यग्लुक् च । छिप्पइ । पक्षे-छिविज्जइ ॥

दीसल् दृशेः ॥ ८९ ॥

दृशेर्भावकर्मणि दीस इत्यादेशो लिद्भवति, यग्लुक् च । दीसइ ॥

वचेरुंचः ॥ ९० ॥

वचेर्भावकर्मणि उंच इत्यादेशो भवति तु, यग्लुक् च । उंचइ । पक्षे-वइज्जइ ॥

ईअ(१)इज्जौ यक् ॥ ९१ ॥

अपवाद(२)निमित्तोऽयं विधिः । भावकर्मणि विहितो यो यक्प्रत्ययः स ईअ इज्ज इत्यादेशावापद्यते । हसीअइ, हसिज्जइ । हसीअन्तो, हसिज्जन्तो । हसीअमाणो, हसिज्जमाणा । पटीअइ, पटिज्जइ । होईअइ, होइज्जइ । बहुलाधिकारात् क्वचिद् यगपि विकल्पेन भवति । तेण लहिज्ज । तेण लहिज्जज्ज । मए नवेज्ज । मए नविज्जेज्ज । तेण अच्छिज्ज । तेण अच्छिज्जेज्ज । तेण अच्छीअइ ॥

स्पृहदू(३)ञोः सिहदूमौ णिचोः ॥ ९२ ॥

णिजन्तयोः स्पृहदूञोः धात्वोः सिह दूम इत्यादेशौ यथासंख्यं भवतः । सिहइ । दूमइ ॥

निवृपतोर्णिहोडो वा ॥ ९३ ॥

णिचोरित्यनुवर्तते । निपूर्वस्य वृञः पतेश्च धात्वोर्णिजन्तयोः स्थाने णिहोड इत्यादेशो वा भवति । णिहोडइ । निवारयति, पातयति वा । पक्षे-णिवारेइ । पाडेइ ॥

धवलोद्धटोर्दुमोग्गौ ॥ ९४ ॥

वेत्यनुवर्तते । धवलयतेरुत्पूर्वस्य घटयतेश्च णिजन्तयोर्दुम उग्ग इत्यादेशौ

---

(१) इअ-ख. । (२) अपवादनिर्मुक्तोऽयं विधिः-ख. पु. ।
(३) धूञोः-ख. ।

यथासंख्यं भवतो वा । दुमइ । उग्गइ । पक्षे-धवलेइ । उग्घाडेइ । 'अचोऽचा'-मिति दुमोऽत्वे-दुमिअं । धवलिअं ॥

भ्रमवेष्टयोस्तालिअंटपरिआलौ ॥ ९५ ॥

भ्रमयतिवेष्टयत्योर्णिजन्तयोः तालिअंट परिआल इत्येतौ यथासंख्यं वा भवतः । तालिअंटइ । पक्षे-भमाडइ । भमाडेइ । भामइ । भामावइ । भामावेइ । वेष्टेः-परिआलइ । पक्षे-वेडइ ॥

रावो रञ्जयतेः ॥ ९६ ॥

रञ्जयतेर्णिजन्तस्य राव इत्यादेशो वा भवति । रावेइ । पक्षे-रंजेइ ॥

तुलिडोल्योरोहामरक्खोलौ ॥ ९७ ॥

णिजन्तयोः तुलयतिदोलयत्योश्च नामधात्वोर्यथासंख्यम् ओहाम रक्खोल इत्येतौ वा भवतः । ओहामइ । रक्खोलइ । पक्षे—तुलइ । डोलइ ॥

आसंघः संभावेः ॥ ९८ ॥

संभावयतेर्णिजन्तस्य आसंघ इति वा भवति । आसंघइ । पक्षे-संभावेइ । संभावयति ॥

अर्पेरल्लिवपणामचच्चुप्पाः ॥ ९९ ॥

णिजन्तस्यार्पयतेः अल्लिव पणाम चच्चुप्प इति त्रय आदेशा वा भवन्ति । अल्लिवइ । पणामइ । चच्चुप्पइ । पक्षे—अप्पेइ । ओप्पेइ ॥

गुलुगुच्छोत्थंघोव्वेल्लोल्लाला उन्नमेः ॥ १०० ॥

णिजन्तस्य नशेरुत्पूर्वस्य गुलुगुच्छ उत्थंघ उव्वेल्ल उल्लाल इति चत्वार आदेशा भवन्ति तु । गुलुगुच्छइ । उत्थंघइ । उव्वेल्लइ । उल्लालइ । पक्षे—उण्णवेइ ॥

प्रकाशेर्णुव्वः ॥ १०१ ॥

णिजन्तस्य प्रकाशेर्णुव्व इति वा भवति । णुव्वइ । पक्षे-पआसेइ ॥

णिहुवः कमेः ॥ १०२ ॥

कमेः स्वार्थे णिजन्तस्य णिहुव इत्यादेशो वा भवति। णिहुवइ। पक्षे-कामेइ ॥

नशेर्विप्पगालनासवपलावहारवविउडाः ॥ १०३ ॥

नाशयतेर्णिजन्तस्य विप्पगाल नासव पलाव हारव विउड इति पञ्चादेशा वा भवन्ति। विप्पगालइ। नासवइ। पलावइ। हारवइ। विउडइ। पक्षे-णासेइ ॥

वल आरोपेः ॥ १०४ ॥

णिजन्तस्यारोपेर्वल इत्यादेशो वा भवति। वलइ। पक्षे-आरोवेइ ॥

विरेचेरोल्लुड्डोल्लुड्डपल्लत्थाः ॥ १०५ ॥

विरेचयतेर्णिजन्तस्य ओल्लुड्ड उल्लुड्ड पल्लत्थ इति त्रय आदेशा वा भवन्ति। ओल्लुड्डइ। उल्लुड्डइ। पल्लत्थइ। पक्षे-विरेचइ ॥

कम्पेर्विच्छोलः ॥ १०६ ॥

कम्पयतेर्णिजन्तस्य विच्छोल इति वा भवति। विच्छोलइ। पक्षे-कंपेइ ॥

रोमन्थेरोग्गालवग्गालौ ॥ १०७ ॥

रोमन्थेर्नामधातोर्णिजन्तस्य ओग्गाल वग्गाल इत्यादेशौ वा भवतः। ओग्गालइ। वग्गालइ। पक्षे-रोमंथेइ ॥

प्लावेरोव्वालपव्वालौ ॥ १०८ ॥

प्लावयतेर्णिजन्तस्य ओव्वाल पव्वाल इत्यादेशौ वा भवतः। ओव्वालइ। पव्वालइ। पक्षे-पावेइ ॥

मिश्रेर्मीसाल(१)मेलवौ ॥ १०९ ॥

मिश्रयतेर्णिजन्तस्य मीसाल मेलव इत्यादेशौ वा भवतः। मीसालइ। मेलवइ। पक्षे-मीसेइ ॥

छादेर्नूमनुमोव्वालडक्कपव्वालसन्तुमाः ॥ ११० ॥

---

(१) बिलास-ख.।

छादयतेर्णिजन्तस्य नूम नुम उव्वाल डक्क पव्वाल सन्तुम इति षडादेशा वा भवन्ति । नूमइ । नुमइ । णत्वे-णूमइ । णुमइ । उव्वालेइ । डक्केइ । पव्वालेइ । सन्तुमइ । पक्षे-छएइ ॥

अच्चुक्कवोक्कौ विज्ञापेः ॥ १११ ॥

विज्ञापेर्णिजन्तस्य अच्चुक्क वोक्क इत्यादेशौ वा भवतः । अच्चुक्कइ । वोक्कइ । पक्षे-विण्णावेइ ॥

परिवाडो घटेः ॥ ११२ ॥

घटयतेर्णिजन्तस्य परिवाड इत्यादेशो वा भवति । परिवाडेइ । पक्षे-घडेइ ॥

दृशोर्दावदक्खवदंसाः ॥ ११३ ॥

दर्शयतेर्णिजन्तस्य दाव दक्खव दंस इति त्रय आदेशा वा भवन्ति । दावइ । दक्खवइ । दंसइ । पक्षे-दरिसइ ॥

प्रस्थापेः पेट्ठवपेड्डवौ ॥ ११४ ॥

प्रस्थापयतेर्णिजन्तस्य पेट्ठव पेड्डव इत्यादेशौ वा भवतः । पेट्ठवइ । पेड्डवइ । पक्षे-पट्ठावेइ ॥

यापेर्जवः ॥ ११५ ॥

यापयतेर्णिजन्तस्य जव इत्यादेशो वा भवति । जवइ । पक्षे-जावेइ ॥

विकोशेः पक्खोडः ॥ ११६ ॥

विकोशयतेर्नामधातोर्णिजन्तस्य पक्खोड इत्यादेशो वा भवति । पक्खोडइ । पक्षे—विकोसेइ ॥

गुंठ उद्धूलेः ॥ ११७ ॥

उद्धूलयतेर्णिजन्तस्य गुंठ इत्यादेशो वा भवति । गुंठइ । पक्षे—उद्धूलेइ ॥

तडेराहोडविहोडौ ॥ ११८ ॥

ताडयतेर्णिजन्तस्य आहोड विहोड इत्यादेशौ वा भवतः । आहोडइ । विहोडइ । पक्षे—ताडेइ ॥

ल्हादेरवअच्छलाणिचश्च ॥ ११९ ॥

ल्हादयतेर्णिजन्तस्याऽणिजन्तस्य च अवअच्छ इत्यादेशो लिद्भवति। अवअच्छइ। ल्हादते, ल्हादयति वा॥

निर्मेर्निम्मवानिम्माणौ ॥ १२० ॥

निर्पूर्वस्य मिमीतेर्धातोर्निम्मव निम्माण इत्यादेशौ वा भवतः। निम्मवइ। निम्माणइ। 'आदेस्तु' इति णत्वे—णिम्मवइ। णिम्माणइ। पक्षे—णिम्मइ॥

आलीङोऽल्लिः ॥ १२१ ॥

आङ्पूर्वस्य लीयतेः अल्लि इत्यादेशो भवति। अल्लिइ। अल्लिअइ। अल्लिणो॥

क्रियः कीणः ॥ १२२ ॥

क्रीणातेः कीण इत्यादेशो भवति। कीणइ॥

केर्च वेः ॥ १२३ ॥

वीत्युपसर्गात् परस्य क्रीणातेः केर् इति भवति, चकारात् कीणश्च। रित्वात् द्वित्वम्। विक्केइ। विक्कीणइ॥

स्त्यस्समः खा ॥ १२४ ॥

स्त्यै ष्ट्यै शब्दसंघातयोः इत्यस्य स्त्यायतेः संपूर्वस्य खा इत्यादेशो भवति। संखाइ। संखाअइ। संखाअं॥

ध्मो धुमोदः ॥ १२५ ॥

ध्मा शब्दाग्निसंयोगयोः इत्यस्य धातोः उदः परस्य धुमा इत्यादेशो भवति। उद्धुमाइ॥

स्थष्ठकुकुरौ ॥ १२६ ॥

उदः परस्य ष्ठा गतिनिवृत्तावित्यस्य धातोः ठ कुकुर इत्यादेशौ भवतः। उट्ठइ। उक्कुकुरइ॥

निरप्पथक्कठाचिट्ठाः ॥ १२७ ॥

स्थ इत्यनुवर्तते । तिष्ठतेः निरप्प थक्क ठा चिट्ठा इति चत्वार आदेशा भवन्ति । निरप्पइ । णत्वे—णिरप्पइ । थक्कइ । ठाइ । चिट्ठाइ । ठाणं । पट्ठाओ । उट्ठीओ । पट्ठाविओ । उट्ठाविओ । चिट्ठिऊण । बहुलाधिकारात्—थिअं । थाणं । पत्थिओ । उत्थिओ । थाऊण ॥

विस्मरः पम्हसवीसरौ ॥ १२८ ॥

विस्मरतेः पम्हस वीसर इत्यादेशौ भवतः । पम्हसइ । वीसरइ । पक्षे—विम्हरइ । 'श्मष्म' इति स्मस्य म्हत्वे 'अर उः' इति ऋवर्णस्य रादेशे च सेत्स्यति ॥

कृपो णिजवहः ॥ १२९ ॥

कृप कृपायामित्यस्य धातोः अवह इत्यादेशो णिजन्तो भवति । अवहावेइ । कृपां करोतीत्यर्थः ॥

जाणमुणौ ज्ञः ॥ १३० ॥

ज्ञा अवबोधन इत्यस्य धातोः जाण मुण इत्यादेशौ भवतः । जाणइ । मुणइ । बहुलाधिकारात् क्वचिद्विकल्पः । जाणिअं । मुणिअं । णाअं । ज्ञातम् । जाणऊण । णाऊण । ज्ञात्वा । जाणणं । णाणं । ज्ञानम् । मणइ इति तु मन्यतेरेव ॥

धो दहश्रदः ॥ १३१ ॥

श्रदित्यव्ययात् परस्य डुधाञ् धारणपोषणयोः इत्यस्य धातोः दह इत्यादेशो भवति । सद्दहइ । सद्दहमाणो जीवो । सद्दहणं होइ । सम्मतम् ॥

स्पृशिश्छिवालुक्खफरिसफासफंसालिहच्छिहान् ॥ १३२ ॥

स्पृश स्पर्शने इत्ययं स्पृशतिः छिव आलुक्ख फरिस फास फंस आलिह छिह इति सप्तादेशानापद्यते । छिवइ । आलुक्खइ । फरिसइ । फासइ । फंसइ । आलिहइ ॥

फक्कस्थक्कः ॥ १३३ ॥

फक्कतेः थक्क इत्यादेशो भवति । थक्कइ ॥

श्लाघः सलाहः ॥ १३४ ॥

श्लाघृ कत्थन इत्यस्य धातोः सलाह इत्यादेशो भवति। सलाहइ ॥

थिप्प(१)स्तृपः ॥ १३५ ॥

तृप प्रीणन इत्यस्माद्धातोः थिप्प इत्यादेशो भवति। थिप्पइ ॥

भियो भाभिहौ ॥ १३६ ॥

ञिभी भय इत्यस्य धातोर्भा भिह इत्यादेशौ भवतः। भाइ, भाअइ। भाइअं। भिहइ। भिहिअं। भीअं इति तु सिद्धावस्थायाम् ॥

भुजिरण्णभुञ्जकम्मसमाणचमडचड्डजेमजिमान् ॥१३७॥

भुज पालनाभ्यवहारयोरित्ययं धातुः अण्ण भुञ्ज कम्म समाण चमड चड्ड जेम जिम इत्यष्टादेशानापद्यते। अण्णइ। भुञ्जइ। कम्मइ। समाणइ। चमडइ। चड्डइ। जेमइ। जिमइ ॥

जृम्भेऽवेर्जम्भा ॥ १३८ ॥

जृभी गात्रविनाम इत्यस्य धातोः जम्भा इत्यादेशो भवति, अवेः वि-इत्युपसर्गात् परस्य न भवति। जम्भाइ। जम्भाअइ। अवेरिति किम्? केलिपसरो विअंभइ ॥

जुंजजुञ्जजुप्पा युजेः ॥ १३९ ॥

युजिर्योग इत्यस्य धातोः जुंज जुञ्ज जुप्प इति त्रय आदेशा भवन्ति। जुंजइ। जुञ्जइ। जुप्पइ ॥

जनो जाजम्मौ ॥ १४० ॥

जनी प्रादुर्भाव इत्यस्य जा जम्म इत्यादेशौ भवतः। जाइ। जाअइ। जम्मइ ॥

उत्थल उच्छलेः ॥ १४१ ॥

उत्पूर्वस्य चल गताविात्यस्य धातोः उत्थल इत्यादेशो भवति। उत्थलइ ॥

---

(१) छिप्प—इति ख.।

घूर्णेर्घुम्मपहल्लघोलघुलाः ॥ १४२ ॥

घूर्ण भ्रमण इत्यस्य धातोः घुम्म पहल्ल घोल घुल इति चत्वार आदेशा भवन्ति । घुम्मइ । पहल्लइ । घोलइ । घुलइ ॥

लिंपो लिपः ॥ १४३ ॥

लिपेर्धातोर्लिंप इत्यादेशो भवति । लिंपइ ॥

शदेर्झडपक्खोडौ ॥ १४४ ॥

शद्लृ शातन इत्यस्य झड पक्खोड इत्यादेशौ भवतः । झडइ । पक्खोडइ ॥

नेः सदेर्मज्जः ॥ १४५ ॥

अएत्थ णुमज्जइ । अत्र निषीदति ॥

पुच्छः पृच्छेः(१) ॥ १४६ ॥

पृच्छतेः पुच्छ इत्यादेशो भवति । पुच्छइ ॥

गण्ठो ग्रन्थेः ॥ १४७ ॥

ग्रन्थेर्गण्ठ इत्यादेशो भवति । गण्ठइ ॥

तुवरजअडौ त्वरेः ॥ १४८ ॥

त्वरेस्तुवर जअड इत्यादेशौ भवतः । तुवरइ । जअडइ । तुवरन्तो । जअडन्तो ॥

अतिङि तुरः ॥ १४९ ॥

त्वरेरित्यनुवर्तते । तिङ्वर्जिते प्रत्यये परतः त्वरेस्तुर इत्यादेशो भवति । तुरिओ । तुरन्तो । अतिङीति किम् ? तुवरइ ॥

तूरः शतृतिङि ॥ १५० ॥

शतृप्रत्यये तिङि च परे त्वरतेस्तुर इत्यादेशो भवति । तूरन्तो । तूरइ ॥

पर्यसेः पल्लट्टपल्लोट्टपल्हत्थाः ॥ १५१ ॥

परिपूर्वः असु क्षेपण इत्ययं धातुः पल्लट्ट पल्लोट्ट पल्हत्थ इति त्रीनादेशा-

---

(१) प्रच्छः—ख.।

नापद्यते । पल्लट्टइ । पल्लोट्टइ । पल्लत्थइ ॥

मृद्नातेर्मलपरिहट्टखुड्डपन्नाडचड्डमड्डमडाः ॥ १५२ ॥

मृद्नातेर्मल परिहट्ट खुड्ड पन्नाड चड्ड मड्ड मड इति सप्तादेशा भवन्ति । मलइ । परिहट्टइ । खुड्डइ पन्नाडइ । चड्डइ । मड्डइ । मडइ ॥

दृशिरोअक्खणिअच्छावअच्छचज्जावअज्झपुलअपुलोअदेक्खावअक्खपेच्छावआसपासणिअसच्चवावक्खान् ॥ १५३ ॥

दृशिर् प्रेक्षणे इत्ययं धातुः ओअक्ख णिअच्छ अवअच्छ अवच्छ चज्ज अवअज्झ पुलअ पुलोअ देक्ख अवअक्ख पेच्छ अवआस पास णिअ सच्चव अवक्ख इति पञ्चदशादेशानापद्यते । ओअक्खइ । णिअच्छइ । अवअच्छइ । चज्जइ । अवज्झइ । पुलअइ । पुलोअइ । देक्खइ । अवअक्खइ । पेच्छइ । अवआसइ । पासइ । सच्चवइ । अवअक्खइ । णिज्झअइ इति तु निपूर्वस्य ध्यायतेर्दर्शनार्थस्य ॥

झरपज्झरपच्चड्डखिरणिड्डुअ(१)णिब्बलाः क्षरेः ॥ १५४ ॥

क्षरतेः झर पज्झर पच्चड्ड खिर णिड्डुअ णिब्बल इति षडादेशा भवन्ति । झरइ । पज्झरइ । पच्चड्डइ । खिरइ । णिड्डुअइ । णिब्बलइ ।

कासेरवाद्वासः ॥ १५५ ॥

अवात् परस्य कासेर्वास इत्यादेशो भवति । ओवासइ ॥

न्यसेर्णिमणुमौ ॥ १५६ ॥

अस्यतेर्निपूर्वस्य णिम णुम इत्यादेशौ भवतः । णिमइ । णुमइ ॥

ग्रहेर्णिरुवारगेण्हबलहरपग्गाहिपच्चुआः ॥ १५७ ॥

ग्रह उपादान इत्यस्य धातोः णिरुवार गेण्ह बल हर पग्ग अहिपच्चुअ इति षडादेशा भवन्ति । णिरुवारइ । गेण्हइ । बलइ । हरइ । पग्गइ । अहिपच्चुअइ ।

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ
द्वितीयाध्यायस्य चतुर्थः पादः ॥

---

(१) णिड्डअ—ख. ।

तृतीयोऽध्यायः।

होहुवहुवा भुवेस्तु ॥ १ ॥

भुवेर्धातोर्हो हुव हव इति त्रय आदेशा भवन्ति तु। होइ। होन्ति। हुवइ। हुवन्ति। हवइ। हवन्ति। पक्षे—भवइ। हरिहीणविभवो भविउं परभइ। परिभवइ। संभवइ। कचिदन्यदपि—उभइहत्तं॥

पृथक् स्पष्टे णिव्वडः ॥ २ ॥

भुवेरित्यनुवर्तते। पृथग्भूते स्पष्टे च कर्तरि भुवेर्णिव्वड इत्यादेशो भवति। णिव्वडइ। पृथक्, स्पष्टो वा भवतीत्यर्थः॥

प्रभौ हुप्पः ॥ ३ ॥

त्वित्यनुवर्तते। प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो भवति तु। अङ्गेवि अ न बहुप्पइ। पक्षे—पहवइ। प्रभवति॥

हु क्ते ॥ ४ ॥

भुवः क्तप्रत्यये परे हु इत्यादेशो भवति। हुअं॥

हुरचिति ॥ ५ ॥

चिद्वर्जिते प्रत्यये परे हु इत्यादेशो रिद्भवति तु। हुन्ति। होन्ते। हुओ। अचितीति किम्? होइ॥

आघ्राक्षिस्नामाइग्घणिज्झराव्वुत्ताः ॥ ६ ॥

आजिघ्रतिक्षयतिस्नातीनां धातूनाम् आइग्घ णिज्झर अव्वुत्त इत्यादेशा यथासंख्यं भवन्ति तु। आइग्घइ। आजिघ्रति। णिज्झरइ। क्षयति। अव्वुत्तइ। स्नाति। पक्षे-अग्घाइ। खअइ। ण्हाइ॥

रा वेर्लियः ॥ ७ ॥

लीङ् श्लेषणे इत्यस्य धातोः वीत्युपसर्गोत्परस्य रा इत्यादेशो भवति तु। विराइ। विराअइ। विलिज्जइ॥

निना ल्हिक्कणिलुक्कणिलिअलिक्कलुक्कणिरग्घाः ॥८॥

लिय इत्यनुवर्तते। नि-इत्युपसर्गेण सह लीयतेः ल्हिक्क णिलुक्क णिलिअ लिक्क लुक्क णिरग्घ इति षडादेशा भवन्ति तु। ल्हिक्कइ। णिलुक्कइ। णिलिअइ। लिक्कइ। लुक्कइ। णिरग्घइ। पक्षे—णिलिज्जइ॥

सारः प्रहुः ॥ ९ ॥

प्रहरतेः सारः इत्यादेशो भवति तु। सारइ। पक्षे—पहरइ॥

प्रसुरुवेल्लवअल्लौ ॥ १० ॥

प्रसरतेः उवेल्ल वअल्ल इत्यादेशौ भवतः। उवेल्लइ। वअल्लइ। पसरइ॥

महमहो गन्धे ॥ ११ ॥

प्रसरतेर्गन्धविषये महमह इत्यादेशो भवति तु। महमहइ मालईगन्धो। गन्ध इति किम्? पसरइ॥

झरझूर(१)सुमरविम्हरहरहललुढपअरपम्हुहाः स्मरतेः ॥ १२ ॥

स्मरतेः झर झूर सुमर विम्हर हर हल लुढ पअर पम्हुह इति नवादेशा भवन्ति तु। झरइ। झूरइ। सुमरइ। विम्हरइ। हरइ। हलइ। लुढइ। पअरइ। पम्हुहइ। पक्षे—सरइ॥

व्याप्रेराअड्डः ॥ १३ ॥

व्याप्रियतेः आअड्ड इत्यादेशो भवति तु। आअड्डइ। वाविरइ॥

निस्सुर्निहरनिलदाढवरहाढाः ॥ १४ ॥

निस्सरतेः निहर निल दाढ वरहाढ इति चत्वार आदेशा भवन्ति तु। निहरइ। निलइ। दाढइ। वरहाढइ। नीसरइ॥

---

(१) जूर—ख.।

जाग्रेर्जग्गः ॥ १५ ॥

जागृ निद्राक्षये इत्यस्य धातोः जग्ग इत्यादेशो भवति तु। जग्गइ। जागरइ॥

पट्टघोट्टडल्लपिज्जाः पिबेः ॥ १६ ॥

पिब इति विहितादेशस्य पा पान इत्यस्य धातोः पट्ट घोट्ट डल्ल पिज्ज इत्यादेशाश्चत्वारो भवन्ति तु। पट्टइ। घोट्टइ। डल्लइ। पिज्जइ। पक्षे-पिबइ॥

धुवो धूञः ॥ १७ ॥

धूञ् कम्पन इत्यस्य धातोः धुव इत्यादेशो भवति तु। धुवइ। धुणइ॥

हण शृणोतेः ॥ १८ ॥

श्रु श्रवण इत्यस्य हण इत्यादेशो भवति तु। हणइ। सुणइ॥

म्लैर्वापव्वाऔ ॥ १९ ॥

म्लै गात्रविनाम इत्ययं धातुः वा पव्वाअ इत्यादेशावापद्यते तु। वाइ। पव्वाअइ। मिलाइ॥

कृञः कुणः ॥ २० ॥

डुकृञ् करण इत्यस्य धातोः कुण इत्यादेशो भवति तु। कुणइ। करइ॥

काणेक्षिते णिआरः(१) ॥ २१ ॥

कृञ इत्यनुवर्तते। कृञः काणेक्षितविषये णिआर इत्यादेशो भवति तु। णिआरइ। काणेक्षितं करोतीत्यर्थः॥

निष्टम्भे णिट्ठुहः ॥ २२ ॥

निष्टम्भविषयस्य कृञः णिट्ठुह इत्यादेशो भवति तु। णिट्ठुहइ। णिष्टम्भं करोति॥

श्रमे वापंफः ॥ २३ ॥

श्रमविषयस्य कृञः वापंफ इत्यादेशो भवति तु। वापंफइ। श्रमं करोति॥

(१) णिअरः—ख.।

सद्दाणोऽवष्टम्भे ॥ २४ ॥

अवष्टम्भविषयस्य कृञः सद्दाण इत्यादेशो भवति तु । सद्दाणइ । अवष्टम्भं करोति ॥

णिव्वोलो मन्युनौष्ठमालिन्ये ॥ २५ ॥

मन्युना करणेन यदोष्ठमालिन्यं करोति तद्विषयस्य कृञो णिव्वोल इत्यादेशो भवति । णिव्वोलइ । मन्युना ओष्ठं मलिनं करोति ॥

गुललश्चाटौ ॥ २६ ॥

चाटुविषयस्य कृञो गुलल इत्यादेशो भवति । गुललइ । चाटु–करोतीत्यर्थः ॥

पअल्लो लम्बनशैथिल्ययोः ॥ २७ ॥

लम्बनशैथिल्यविषयस्य कृञः पअल्ल इत्यादेशो भवति । पअल्लइ । लम्बयति शैथिल्यं करोति वा ॥

क्षुरे कम्मः ॥ २८ ॥

क्षुरविषयस्य कृञः कम्म इत्यादेशो भवति तु । कम्मइ । क्षुरं करोतीत्यर्थः ॥

णिलुञ्छो निष्पाताच्छोटे ॥ २९ ॥

निष्पतनविषयस्याच्छोटनविषयस्य च कृञः णिलुञ्छ इत्यादेशो भवति तु । णिलुञ्छइ । निष्पतति, आच्छोटयति वा ॥

साहट्टसाहरौ संवृः ॥ ३० ॥

संपूर्वस्य वृणोतेः साहट्ट साहर इत्यादेशौ तु भवतः । साहट्टइ । सहरइ । संवरइ ॥

ओहिरोग्घौ निद्रः ॥ ३१ ॥

निपूर्वस्य द्रै स्वप्न इत्यस्य धातोः ओहिर उग्घ इत्यादेशौ तु भवतः । ओहिरइ । उग्घइ । णिद्दाइ ॥

उद्द ओरुम्मावसुऔ ॥ ३२ ॥

उत्पूर्वस्य वा गतिगन्धनयोरित्यस्य धातोः ओरुम्मा वसुआ इत्यादेशौ तु भवतः । ओरुम्माइ । वसुआइ । उव्वाइ ॥

रुवो रुंज(१)रुंटौ ॥ ३३ ॥

रु शब्दे इत्येतस्य रौतेर्धातोः रुंज रुंट इत्यादेशौ तु भवतः । रुंजइ । रुंटइ । रुवइ ॥

कोक्कवोक्कौ व्याहृः ॥ ३४ ॥

व्याहरतेः कोक्क वोक्क इत्यादेशौ तु भवतः । कोक्कइ । वोक्कइ । वाहरइ ॥

सन्नाम आदृङः ॥ ३५ ॥

आद्रियतेः सन्नाम इत्यादेशो भवति तु । सन्नामइ । आदरइ ॥

ओहरौसरावतरेस्तु ॥ ३६ ॥

अवपूर्वस्य तॄ प्लवनतरणयोरित्यस्य धातोः ओहर ओसर इत्यादेशौ तु भवतः । ओहरइ । ओसरइ । त्वधिकारे पुनस्तुग्रहणमधिकारस्याऽनुस्मरणार्थम्(२)॥

शकेस्तरतीरपारचआः ॥ ३७ ॥

शक्लृ शक्तावित्यस्य धातोः तर तीर पार चअ इति चत्वार आदेशा भवन्ति तु । तरइ । तीरइ । पारइ । चअइ । पक्षे–सक्कइ । तरतेरपि–तरइ । तीर पार कर्मसमाप्तावित्यनयोरपि—तीरइ । पारइ । त्यजेरपि—चअइ । 'त्योऽचैत्ये' इति त्यस्य चः, जलोपश्च ॥

सोल्लपउल्लौ पचेः ॥ ३८ ॥

डुपचष् पाक इत्यस्य धातोः सोल्ल पउल्ल इत्यादेशौ तु भवतः । सोल्लइ । पउल्लइ । पअइ ॥

वेअडः खचेः ॥ ३९ ॥

खचतेर्वेअड इत्यादेशो भवति तु । वेअडइ । खअइ ॥

णिव्वलो मुचेर्दुःखे ॥ ४० ॥

---

(१) रुज—ख. । (२) ऽनुकर्षणार्थम्—ख. ।

दुःखविषयस्य मुच्लृ मोक्षणे इत्यस्य धातोः णिव्वल इत्यादेशो भवति तु । णिव्वलइ । दुःखं मुञ्चतीत्यर्थः ॥

अवहेडमोल्लणिल्लुंछो(१)सिक्कादिसडरेअवछंडाः ॥४१॥

मुचेरित्यनुवर्तते । मुञ्चतेः अवहेड मोल्ल णिल्लुंछ उसिक्क दिसड रेअव छंड इति सप्तादेशा भवन्ति वा । अवहेडइ । मोल्लइ । णिल्लुंछइ । उसिक्कइ । दिसडइ । रेअवइ । छंडइ । पक्षे-मुअइ ॥

सिंचसिप्पौ सिचेः ॥ ४२ ॥

सिञ्चतेः सिंच सिप्प इत्यादेशौ तु भवतः । सिंचइ । सिप्पइ । सेअइ ॥

रचेर्विडविड्डावहोग्गहाः(२) ॥ ४३ ॥

रचि प्रतियत्न इत्यस्य धातोः विडविड्ड अवह उग्गह इति त्रय आदेशा भवन्ति तु । विडविड्डइ । अवहइ । उग्गहइ । रअइ ॥

केवलाअसारवसमारोवहत्थाः समारचेः ॥ ४४ ॥

समारचेः केवलाअ सारव समार उवहत्थ इति चत्वार आदेशा भवन्ति तु । केवलाअइ । सारवइ । समारइ । उवहत्थइ । समारअइ ॥

मस्जेराउड्डणिउड्डवुड्डखुप्पाः ॥ ४५ ॥

टुमस्जो शुद्धावित्यस्य धातोः आउड्ड णिउड्ड वुड्ड खुप्प इति चत्वार आदेशा भवन्ति तु । आउड्डइ । णिउड्डइ । वुड्डइ । खुप्पइ । मज्जइ ॥

अनुव्रजतेः पडिअग्गः ॥ ४६ ॥

व्रज गतावित्यस्य धातोरनुपूर्वस्य पडिअग्ग इत्यादेशो भवति तु । पडिअग्गइ । अणुवअइ ॥

वञ्चेर्वेहववेलवजूरवोम्मच्छाः ॥ ४७ ॥

वञ्चतेः वेहव वेलव जूरव उम्मच्छ इति चत्वार आदेशा भवन्ति । वेहवइ । वेलवइ । जूरवइ । उम्मच्छइ । वंचइ ॥

---

(१) णिलुच्छो—ख. । (२) होइहाः—ख. ।

रोसाणोबुसलुहलुच्छपुच्छफुसफुस्सघसहुला मार्ष्टेः ॥ ४८ ॥

मृजू शुद्धावित्यस्य धातोः रोसाण उबुस लुच्छ पुच्छ फुस फुस्स घस हुल इति नवादेशा भवन्ति । रोसाणइ । उबुसइ । लुहइ । लुच्छइ । पुच्छइ । फुसइ । फुस्सइ । घसइ । हुलइ । पक्षे–मज्जइ ॥

भञ्जेर्वेमअमुसुमूरमूरपविरज्जसूरसूडकरंजनिरंजविराः॥४९॥

भञ्जो आमर्दन इत्यस्य धातोः वेमअ मुसुमूर मूर पविरज्ज सूर सूड करंज निरंज विर इति नवादेशा भवन्ति तु । वेमअइ । मुसुमूरइ । मूरइ । पविरज्जइ । सूरइ । सूडइ । करंजइ । निरंजइ । विरइ । पक्षे–भंजइ ॥

गर्जेर्बुक्कः ॥ ५० ॥

गर्जुतेर्बुक्क इत्यादेशो वा भवति । बुक्कइ । गज्जइ ॥

डिक्को वृषे ॥ ५१ ॥

वृषकर्तृकस्य गर्जतेः डिक्क इत्यादेशो वा भवति । डिक्कइ । वृषा गर्जतीत्यर्थः ॥

तिजेरोसुक्कः ॥ ५२ ॥

तिज निशान(१) इत्यस्य धातोः ओसुक्क इत्यादेशो भवति तु । ओसुक्कइ । तेअइ । तेअणं ॥

आरोलवमालौ(२) पुञ्जेः ॥ ५३ ॥

पुञ्जेः आरोल वमाल इत्यादेशौ वा भवतः । आरोलइ । वमालइ । पुंजइ ॥

कम्मवमुपभुजिः ॥ ५४ ॥

उपपूर्वको भुजिः कम्मव इत्यादेशमापद्यते तु । कम्मवइ । उवभुंजइ ॥

पिडवमर्जिः ॥ ५५ ॥

अर्जिः पिडवमित्यादेशमापद्यते तु । पिडवइ । अज्जइ ॥

लज्जेर्जीहः ॥ ५६ ॥

---

(१) निशातन–क. । (२) वमूलौ–ख. ।

ओलस्जी व्रीडायामित्यस्य धातोर्जीह इत्यादेशो भवति तु। जीहइ। लज्जइ॥

राजेः सहरेहच्छज्जरिरग्घाः ॥ ५७ ॥

राजृ दीप्तावित्यस्य धातोः सह रेह छज्ज रिर अग्घ इति पञ्चादेशा भवन्ति तु। सहइ। रेहइ। छज्जइ। रिरइ। अग्घइ। राअइ॥

घटेर्गडः ॥ ५८ ॥

घटतेर्गड इत्यादेशो भवति तु। गडइ। घडइ॥

समो गलः ॥ ५९ ॥

समः परस्य घटतेर्गल इत्यादेशो भवति तु। संगलइ। संघडइ॥

हासेन स्फुटतेर्मुरः ॥ ६० ॥

हासेन करणेन प्रयुज्यमानो यः स्फुट विकसन इति धातुस्तस्य मुर इत्यादेशो भवति तु। मुरइ। हासेन स्फुटतीत्यर्थः॥

मण्डेष्टिविडिक्करिडचिंचचिंचिल्लचिंचआः ॥ ६१ ॥

मडि भूषायामित्यस्य धातोः विटिडिक्क रिड चिंच चिंचिल्ल चिंचअ इति पञ्चादेशा वा भवन्ति। टिविडिक्कइ। रिडइ। चिंचइ। चिंचिल्लइ। चिंचअइ। पक्षे–मंडइ॥

तुडिरुल्लुक्कणिल्लुकोल्लूरोक्खुडलुक्कतोडखुट्टखुडान्॥६२॥

तुड तोडन इत्ययं धातुः उल्लुक्क णिल्लुक्क उल्लूर उक्खुड लुक्क तोड खुट्ट खुड इत्यष्टादेशानापद्यते। उल्लुक्कइ। णिल्लुक्कइ। उल्लूरइ। उक्खुडइ। लुक्कइ। तोडइ। खुट्टइ। खुडइ। पक्षे–तुरइ। तुट्टइ इति तु त्रुटेः शकादिद्वित्वे भविष्यति॥

घुसलविरोलौ मन्थेः ॥ ६३ ॥

मन्थ विलोडन इत्यस्य धातोः घुसल विरोल इत्यादेशौ तु भवतः। घुसलइ। विरोलइ। मंथइ॥

ढंसोत्थंघौ विवृतिरुध्योः ॥ ६४ ॥

विपूर्वस्य वृतु वर्तन इत्यस्य, रुधिरावरण इत्यस्य च धातोः क्रमेण ढंस उत्थंघ इत्यादेशौ तु भवतः । ढंसइ । पक्षे-विवट्टइ । उत्थंघइ । पक्षे-रुंधइ ॥

णिहर आक्रन्देः ॥ ६५ ॥

आङ्पूर्वस्य क्रन्देर्णिहर इत्यादेशो भवति तु । णिहरइ । अक्कंदइ ॥

ओअंदोद्दालौ छिदेराङा ॥ ६६ ॥

छिदिर्द्वैधीकरण इत्यस्य धातोः आङा सहितस्य ओअंद उद्दाल इत्यादेशौ तु भवतः । ओअंदइ । उद्दालइ । आच्छिदइ ॥

णिल्लूरलूरणिव्वर(१)णिच्छल्लदुहावणिज्झोडाः ॥ ६७ ॥

छिदेरिति वर्तते । छिदेर्णिल्लूर लूर णिव्वर णिच्छल्ल दुहाव णिज्झोड इति षडदेशा वा भवन्ति । णिल्लूरइ । लूरइ । णिव्वरइ । णिच्छल्लइ । दुहावइ । णिज्झोडइ । पक्षे-छिंदइ ॥

अट्टः कथेः ॥ ६८ ॥

कथ निष्पाक इत्यस्य धातोः अट्ट इत्यादेशो भवति तु । अट्टइ । कढइ ॥

कथेर्वज्जरपज्जरसग्घसाससाहचवजप्पपिसुण-बोल्लोव्वालाः ॥ ६९ ॥

कथयतेः वज्जर पज्जर सग्घ सास साह चव जप्प पिसुण बोल्ल उव्वाल इति दशादेशा वा भवन्ति । वज्जरइ । पज्जरइ । सग्घइ । सासइ । साहइ । चवइ । जप्पइ । पिसुणइ । बोल्लइ । उव्वालइ । पक्षे-कहइ ॥

दुःखे णिव्वरः ॥ ७० ॥

दुःखविषयस्य कथयतेर्णिव्वर इत्यादेशो भवति तु । णिव्वरइ । दुःखं कथयतीत्यर्थः ॥

निषेधेर्हक्कः ॥ ७१ ॥

निपूर्वस्य षिधू शास्त्रे माङ्गल्ये च इत्यस्य धातोः हक्क इत्यादेशो भवति तु ।

(१) णिव्वर-क. ।

हक्कइ । णिसेहइ ॥

जूरः क्रुधेः ॥ ७२ ॥

कुप क्रुध रुष इति त्रयः क्रुध्यतिः, तस्य जूर इत्यादेशो भवति । जूरइ । कुज्झइ ॥

विसूरश्च खिदेः ॥ ७३ ॥

खिद दैन्य इत्यस्य धातोः विसूर इत्यादेशः, चकारात् जूरश्च वा भवति । विसूरइ । जूरइ । खिज्जइ ॥

तड्डवविरल्लतडतड्डास्तनेः ॥ ७४ ॥

तनु विस्तारे इत्यस्य धातोः तड्डव विरल्ल तड तड्ड इति चत्वार आदेशा भवन्ति तु । तड्डवइ । विरल्लइ । तडइ । तड्डइ । तणइ ॥

निरः पद्यतेर्वलः ॥ ७५ ॥

निर्पूर्वस्य पद गतावित्यस्य धातोर्वल इत्यादेशो भवति वा । णिव्वलइ । णिवज्जइ ॥

संतपां झंखः ॥ ७६ ॥

संपूर्वस्य तप्यतेः झंख इत्यादेशो भवति तु । बहुवचनात् निश्वसिति-विलपत्युपालभतीनां च । झंखइ । संतप्यते, निःश्वसिति, विलपति, उपालभते वा । पक्षे-संतवइ । णीससइ । विलवइ । उवालहइ ॥

ओअग्गसमाणौ व्यापिसमाप्योः ॥ ७७ ॥

व्याप्नोति समाप्नोतीत्यनयोर्यथासंख्यम् ओअग्ग समाण इत्यादेशौ तु भवतः । ओअग्गइ । समाणइ । पक्षे-वावेइ । व्याप्नोति । समावेइ । समाप्नोति ॥

णिरवो बुभुक्ष्याक्षिप्योः ॥ ७८ ॥

बुभुक्षेराचारे क्विबन्तस्य आङ्पूर्वस्य च क्षिपतेः णिरव इत्यादेशो भवति तु । णिरवइ । बुभुक्षते, आक्षिपति वा । बुभुक्खइ । अक्खिवइ ॥

क्षिपिरड्डक्खपरिहुलघत्तछुहफेल्लणोल्लसोल्लगल्लत्थान् ॥ ७९ ॥

क्षिप प्रेरणे इत्ययं धातुः अड्डक्ख परि हुल घत्त छुह फेल्ल णोल्ल सोल्ल गल्लत्थ इति नवादेशानापद्यते तु । अड्डक्खइ । परिइ । हुलइ । घत्तइ । छुहइ । फेल्लइ । णोल्लइ । सोल्लइ । गल्लत्थइ । पक्षे–खिवइ ॥

उत्क्षिपेरुत्थग्घोसिक्कहक्खुवाल्लत्थगुलुगुंछाब्भुत्तान् ॥८०॥

उत्क्षिपतिः उत्थग्घ उसिक्क हक्खुव अल्लत्थ गुलुगुंछ अब्भुत्त इति षडादेशानापद्यते तु । उत्थग्घइ । उसिक्कइ । हक्खुवइ । अल्लित्थइ । गुलुगुंछइ । अब्भुत्तइ । पक्षे–उक्खिवइ ॥

वेपेराअब्बाअज्झौ ॥ ८१ ॥

टुवेपृ कम्पन इत्यस्य धातोः आअब्ब आअज्झ इत्यादेशौ तु भवतः । आअब्बइ । आअज्झइ । वेवइ ॥

विरणडौ गुपेः ॥ ८२ ॥

गुप व्याकुलत्व इत्यस्य धातोः विर णड इत्यादेशौ तु भवतः । विरइ । णडइ । गुप्पइ ॥

चच्चारवेलवावुपालभेः ॥ ८३ ॥

उपाङ्पूर्वस्य डुलभष् प्राप्तावित्यस्य धातोः चच्चार वेलव इत्यादेशौ तु भवतः । चच्चारइ । वेलवइ । उवालंभइ ॥

खउरपड्डुहौ क्षुभेः ॥ ८४ ॥

क्षुभ्यतेः खउर पड्डुह इत्यादेशौ तु भवतः । खउरइ । पड्डुहइ । खुब्बइ ॥

प्रदीपेः संधुक्काब्बुत्ततेअवसंधुमाः ॥ ८५ ॥

प्रपूर्वस्य दीप्यतेः संधुक्क अब्बुत्त तेअव संधुम इति चत्वार आदेशा भवन्ति तु । संधुक्कइ । अब्बुत्तइ । तेअवइ । संधुमइ । पक्षे–पलीवइ ॥

अल्लिअ उपसर्पेः ॥ ८६ ॥

उपपूर्वस्य सृप गतावित्यस्य धातोः अल्लिअ इत्यादेशो भवति तु । अल्लिअइ । उवसप्पइ ॥

कमवसलिसलोट्टाः स्वपेः ॥ ८७ ॥

ञिष्वप् शयेइत्यस्य धातोः कमवस लिस लोट्ट इति त्रय आदेशा भवन्ति तु । कमवसइ । लिसइ । लोट्टइ । पक्षे–सुवइ । सोवइ ॥

बडवडो विलपेः ॥ ८८ ॥

लप व्यक्तायां वाचीत्यस्य धातोर्विपूर्वस्य बडवड इत्यादेशो भवति तु । बडवडइ । विलवइ । 'संतपां झंखः' इति विनिश्वसित्यादीनां बहुवचनग्रहणात्–झंखइ ॥

राभेराडो रंभडवौ ॥ ८९ ॥

आङः परो रभ राभस्य इत्ययं धातुः रंभ डव इत्यादेशावापद्यते तु । आरंभइ । आडवइ । आरहइ ॥

भाराक्रान्ते नमेर्निसुडः ॥ ९० ॥

णमु प्रह्वत्वे शब्दे इत्यस्य धातोर्भाराक्रान्ते कर्तरि निसुड इत्यादेशो भवति तु । निसुडइ । भाराक्रान्तो नमतीत्यर्थः ॥

उब्भाववेल्लणिसरकोड्डुमसक्खुड्डखेड्डुमोट्टाअ-किलिकिंचा रमतेः ॥ ९१ ॥

रमु क्रीडायाम् इत्यस्य धातोः उब्भाव वेल्ल णिसर कोड्डुम सक्खुड्ड खेड्ड मोट्टाअ किलिकिंच इत्यष्टादेशा भवन्ति तु । उब्भावइ । वेल्लइ । णिसरइ । कोड्डुमइ । सक्खुडइ । मोट्टाअइ । किलिकिंचइ । पक्षे–रमइ ॥

पडिसापरिसामौ शमेः ॥ ९२ ॥

शमु उपशम इत्यस्य धातोः पडिसा परिसाम इत्यादेशौ वा भवतः । पडिसाइ । परिसामइ । समइ ॥

लुभेः संभावः ॥ ९३ ॥

लुभ गार्ध्ये इत्यस्य धातोः संभाव इत्यादेशो भवति तु । संभवइ । लुब्भइ ॥

आक्रमिरोहावोत्थारच्छुंदान् ॥ ९४ ॥

आङ्पूर्वः क्रमु पादविक्षेप इत्ययं धातुः ओहाव उत्थार छुंद इत्यादेशा-न्नीनापद्यते । ओहावइ । उत्थारइ । छुंदइ । अक्कमइ ॥

विश्रमेर्णिप्पा ॥ ९५ ॥

श्रमु तपसि खेदे चेत्यस्य धातोः विपूर्वस्य णिप्पा इत्यादेशो भवति तु । णिप्पाइ । वीसमइ ॥

ढुंढुल्लढुमढंढल्लभमाडभमुडतलअंटझंटगुमटिरिटिल्ल-परिपरघमचक्कमुभमडघसझंपडुसा भमेः ॥ ९६ ॥

भ्रमु अनवस्थान इत्यस्य ढुंढुल्ल ढुम ढंढल्ल भमाड भम भमुड तलअंट झंट गुम टिरिटिल्ल परि पर घम चक्कमु भमड घस झंप डुस इत्यष्टादशादेशा वा भवन्ति । ढुंढुल्लइ । ढुमइ । ढंढल्लइ । भमाडइ । भमइ । भमुडइ । तल-अंटइ । झंटइ । गुमइ । टिरिटिल्लइ । परिइ । परइ । चक्कमुइ । भमडइ । घसइ । झंपइ । डुसइ । पक्षे-भमइ ॥

गमिरणुवज्जावज्जसाक्कुसोक्कुसाइच्छअईअवहरअवसेह-वडअवरिअलवरिअल्लवोल्लणिरिणासवच्छड्डाणिणाणिम्मह-पच्छंदणिलुक्करंभणिणिवहान् ॥ ९७ ॥

गम्लृ गतावित्ययं धातुः अणुवज्ज अवज्जस अक्कुस उक्कुस अइच्छ अई अवहर अवसेह वडअ वरिअल वरिअल्ल वोल्ल णिरिणास वच्छड्ड णिण णिम्मह पच्छंद णिलुक्क रंभ णि णिवह इत्येकविंशतिमादेशानापद्यते वा । अणुवज्जइ । अवज्जसइ । अक्कुसइ । उक्कुसइ । अइच्छइ । अईइ । अव-हरइ । अवसेहइ । वडअइ । वरिअलइ । वरिअल्लइ । वोल्लइ । णिरि-णासइ । वच्छड्डइ । णिणइ । णिम्महइ । पच्छंदइ । णिलुक्कइ । रंहइ । णिइ । णिवहइ । पक्षे-गच्छइ । हम्मइ, णिम्महइ, आहम्मइ इत्यादि तु हम्म गता-वित्यस्य भविष्यति ॥

प्रत्यागमागमाभ्यागमां पल्लोट्टाहिपच्चुओम्मच्छाः ॥९८॥

प्रत्यागमेः आगमेः अभ्यागमेश्च यथासंख्यं पल्लोट्ट अहिपच्चुअ उम्मच्छ

इत्यादेशा भवन्ति तु । पल्लोट्टइ । पच्चागमइ । प्रत्यागच्छति । अहिपच्चुअइ । अअच्छइ । आगच्छति । उम्मच्छइ । अब्भागच्छइ । अभ्यागच्छति ॥

रिहरिग्गौ प्रविशेः ॥ ९९ ॥

प्रविशतेः रिह रिग्ग इत्यादेशौ तु भवतः । रिहइ । रिग्गइ । पविसइ ॥

संगमोऽव्विडः ॥१०० ॥

संगच्छतेरव्विड इत्यादेशो भवति तु । अव्विडइ । संगच्छइ ॥

डिप्पणिड्डुहौ विगलेः ॥ १०१ ॥

विपूर्वस्य गलतेः डिप्प णिड्डुह इत्यादेशौ तु भवतः । डिप्पइ । णिड्डुहइ । विगलइ ॥

णिवहणिरिणासणिरिणिज्जरोञ्चचड्डा पिषेः ॥ १०२ ॥

पिष्लृ संचूर्णन इत्यस्य धातोः णिवह णिरिणास णिरिणिज्ज रोञ्च चड्ड इति पञ्चादेशा भवन्ति तु । णिवहइ । णिरिणासइ । णिरिणिज्जइ । रोञ्चइ । चड्डइ । पक्षे-पिशइ ॥

बलेर्वंफः ॥ १०३ ॥

बलतेर्वंफ इत्यादेशो भवति तु । वंफइ । बलइ ॥

भ्रंशेः पिडपिट्टछुक्कछुल्लपुट्टपुडाः(१) ॥ १०४ ॥

भ्रंशेरित्यस्य धातोः पिडु पिट्ट छुक्क छुल्ल पुट्ट पुड (२) इत्येते षडादेशा भवन्ति तु । पिडुइ । पिट्टइ । (३)छुक्कइ । छुल्लइ । पुट्टइ । पुडइ । पक्षे-भंसइ ॥

भषेर्बुक्कः ॥ १०५ ॥

भषतेर्बुक्क इत्यादेशो भवति तु । बुक्कइ । भसइ ॥

पुरग्घवाग्घोडाहिरेमाग्गुमाद्धुमाः ॥ १०६ ॥

पृ पालनपूरणयोरित्यस्य धातोः अग्घव अग्घोड अहिरेम अग्गुम अद्धुम

(१) चुक्कचुल्लघट्टघाडाः—ख. । (२) चुक्क चुल्ल घट्ट घाड—ख. ।

(३) चुक्कइ । चुल्लइ । घट्टइ । घाडइ । ख. ।

इति पञ्चादेशा भवन्ति तु । अग्घवइ । अग्घोडइ । अहिरेमइ । अग्गुमइ । अद्धुमइ । पक्षे-पूरइ ॥

आहाहिलंघवच्चाहिलक्खमहसिहचिल्लुंपचंपाः कांक्षेः ॥ १०७ ॥

काङ्क्षतेः आह अहिलंघ वच्च अहिलक्ख मह सिह चिल्लुंप चंप इत्यष्टादेशा वा भवन्ति । आहइ । अहिलंघइ । वच्चइ । अहिलक्खइ । महइ । सिहइ । चिल्लुंपइ । चंपइ । पक्षे-कंखइ ॥

नशिरवहरावसेहणिवहपडिसासेहणिरिणासान् ॥ १०८ ॥

नश्यतेः अवहर अवसेह णिवह पडिसा सेह णिरिणास इति षडादेशानापद्यते वा । अवहरइ । अवसेहइ । णिवहइ । पडिसाइ । सेहइ । णिरिणासइ । पक्षे-णासइ ॥

साअड्ढाणच्छकड्ढाच्छाअंछाणंछाः कृषेः ॥ १०९ ॥

कृष विलेखन इत्यस्य धातोः साअड्ढ अणच्छ कड्ढ अच्छ आअंछ आणंछ इति षडादेशा वा भवन्ति । साअड्ढइ । अणच्छइ । कड्ढइ । अच्छइ । आअंछइ । आणंछइ । पक्षे—करिसइ ॥

असावक्खोडः ॥ ११० ॥

असिविषयस्य कर्षतेः अक्खोड इत्यादेशो वा भवति । अक्खोडइ । असिं कोशात् कर्षति ॥

उल्लषेरूसलोसुंभारोअणिल्लसगुंजोल्लपुलआआः ॥ १११ ॥

उत्पूर्वस्य लष कान्तावित्यस्य धातोः ऊसल ऊसुंभ आरोअ णिल्लस गुंजोल्ल पुलआअ इति षडादेशा वा भवन्ति । ऊसलइ । ऊसुंभइ । आरोअइ । णिल्लसइ । गुंजोल्लइ । ह्रस्वे-गुंजल्लइ । पुलआअइ । पक्षे—उल्लसइ ॥

संदिशोऽप्पाहः ॥ ११२ ॥

संपूर्वस्य दिश अतिसर्जन इत्यस्य धातोः अप्पाह इत्यादेशो वा भवति । अप्पाहइ । संदिसइ ॥

ग्रसेर्घिसः ॥ ११३ ॥

ग्रस अदन इत्यस्य धातोः घिस इत्यादेशो भवति। घिसइ। गसइ ॥

भासेर्भिसः(१) ॥ ११४ ॥

भासृ दीप्तावित्यस्य धातोः भिस इत्यादेशो भवति। भिसइ। भासइ ॥

प्रतीक्षेर्विहिरविरमालसामआः ॥ ११५ ॥

प्रतिपूर्वस्य ईक्ष दर्शन इत्यस्य धातोः विहिर विरमाल सामअ इति त्रय आदेशा भवन्ति तु। विहिरइ। विरमालइ। सामअइ। पक्षे—पडिक्खइ ॥

स्रंसेर्ल्हसडिंभौ ॥ ११६ ॥

स्रंसु अवस्रंसन इत्यस्य धातोः ल्हस डिंभ इत्यादेशौ तु भवतः। ल्हसइ। परिल्हसइ। परिल्हसणं। डिंभइ। संसइ ॥

मृक्षे(३)श्चोव्वडः॥११७ ॥

मृक्षतेश्चोव्वड इत्यादेशस्तु भवति। चोव्वडइ। मक्खइ ॥

विसट्टो दलेः ॥ ११८ ॥

दलतेः विसट्ट इत्यादेशस्तु भवति। विसट्टइ। दलइ ॥

त्रसेर्वज्जडरौ ॥ ११९ ॥

त्रसतेः वज्ज डर इत्यादेशौ तु भवतः। वज्जइ। डरइ। तसइ ॥

वोज्जो वीजेश्च ॥ १२० ॥

वीज व्यजन इत्यस्य धातोः चकारात् त्रसेश्च वोज्ज इत्यादेशो भवति तु। वोज्जइ। पक्षे-वीजइ। तसइ ॥

गवेषेर्घत्तगमेसडुंडुल्लडंडोलाः ॥ १२१ ॥

गवेषेः घत्त गमेस डुंडुल्ल डंडोल इति चत्वार आदेशा भवन्ति तु। घत्तइ। गमेसइ। डुंडुल्लइ। डंडोलइ। पक्षे—गवेसइ ॥

---

(१) भासुर्बिसः—ख.। (२) विसइ—ख.।
(३) मुहे—ख.।

तक्षेश्चंछरंपरंफाः ॥ १२२ ॥

तनूकरण इत्यस्य धातोः चंछ रंप रंफ इति त्रय आदेशा भवन्ति तु। रंपइ । रंफइ । स्पृहादिपाठाच्छत्वे च-चच्छइ । तक्खइ ॥

हसेर्गुंजः ॥ १२३ ॥

गुंज इत्यादेशो भवति तु । गुंजइ । हसइ ॥

दहिरहिऊलालुक्खौ ॥ १२४ ॥

भस्मीकरण इत्ययम् अहिउल आलुक्ख इत्यादेशौ वाप्नोति । अहि-आलुक्खइ । दहइ ॥

विकसेः कोआसवोसग्गौ ॥ १२५ ॥

सतेः कोआस वोसग्ग इत्यादेशौ तु भवतः । कोआसइ । वोसग्गइ । ॥

श्लिषोऽवआससामग्गपरिअन्ताः ॥ १२६ ॥

आलिङ्गन इत्यस्य धातोः अवआस सामग्ग परिअन्त इति त्रय भवन्ति तु । अवआसइ । सामग्गइ । परिअन्तइ । सिलिसइ ॥

जुगुप्सतेर्दुगुंछझूणदुगुच्छाः ॥ १२७ ॥

सतेः दुगुंछ झूण दुगुच्छ इति त्रय आदेशा भवन्ति तु । दुगुंछइ । गुच्छइ । जुउच्छइ ॥

वलग्गचडमारुहेः ॥ १२८ ॥

निजजन्मनि प्रादुर्भावे चेत्यस्य धातोः आङ्पूर्वस्य वलग्ग चड तु भवतः । वलग्गइ । चडइ । आरुहइ ॥

हुल्लो लक्ष्यात् स्खलेः ॥ १२९ ॥

विषयस्य स्खलतेः हुल्ल इत्यादेशो वा भवति । हुल्लइ । लक्ष्यात् र्थः ॥

गाहोऽवाद्गाहः ॥ १३० ॥

अवात् परस्य गाहू विलोडन इत्यस्य धातोः वाह इत्यादेशो भवति तु। ओवाहइ। ओगाहइ॥

गुंमगुंमडौ मुहेः॥ १३१॥

मुह वैचित्य इत्यस्य धातोः गुंम गुंमड इत्यादेशौ तु भवतः। गुंमइ। गुंमडइ। मुज्झइ॥

अपुण्णगाः क्तेन॥ १३२॥

अपुण्णादयः शब्दाः क्तप्रत्ययेन सह निपात्यन्ते। अपुण्णं आक्रान्तम्। अम्मत्थं असम्बद्धं क्रोधेन भङ्ग्या च यद्भणितम्। उल्लुको, आसण्णो, मूरुओ(१)—त्रुटितः। पहट्टं=अविरतदष्टम्। गुज्जलिअं, पेज्जलिअं संघटितम्। सउल्लिओ, गल्लंडिलिओ, उरुसोल्लो प्रेरितः। उक्खिणं अवकीर्णम्। ओसट्टो, विहिमिहिओ विकसितः। उद्धरिअं अर्दितः। कमिओ उपसर्पितः। कडत्तरिअं छिन्नं, छिद्रितं च। सुदिओ श्रान्तः। परहाइअं परिक्षीणम्। णिक्कज्जो, अणिकज्जो, मुच्चग्गो, तडहडिओ अनवस्थितः(२)। उद्धओ शान्तः। उव्वंगो मुण्डितः। उच्चुल्लो(३) उद्विग्नः। उच्चुरणं उच्छिष्टम्। उव्विलं चकितं, क्लान्तं वा। पहोइअं, अकारिअं पर्याप्तम्। णालं, गोरडितं, हिड्डो, डड्डो त्रस्तः। उव्विड्डो क्रुद्धश्च। णिविट्ठो(४) सुप्तोत्थितः। ओमिसं अप्रवृत्तम्। उग्घक्कं प्रलपितम्। उप्पिअं हृतं, रोपितं, विमुक्तं च। ओहरणं, णिग्घिअं, ओअविअं आघ्रातम्। ऊसविअं उद्भ्रान्तम्। आहिद्धो रुद्धो, गलितश्च। णिसुद्धो निपातितः। णिच्चूडो, उम्मडो उद्धृतः। उड्डिअं, जूसअं क्षिप्तम्। णिज्जो, लवओ, णिहुओ, लुक्को सुप्तः। उज्झणिअं वञ्चितं, निम्नीकृतं च। ऊढं त्यक्तम्। उज्झरिअं शुष्कं, निम्नीकृतं च। पुड्डं स्पृष्टम्। डिढओ जलान्तःपतितः। ओसरिओ आकीर्णः, अक्षिनिकोचात् सङ्कुचितश्च। गुलिअं मथितम्। उम्मरिअं, गुत्थिअं उन्मूलितम्। उडाहिअं, परिच्चूडं, उग्गाहिअं उत्क्षिप्तम्।

---

(१) गुरुवो—ख.। (२) अनुत्थितः—ख.।
(३) उच्छुग्गो—ख.। (४) णिव्विडो—ख.।

आसिअं दत्तम् । हेसिअं, दुंदुमिअं रसितम् । चित्तविओ परितोषितः । पल्लोट्टं, झसिअं, पल्लत्थं पर्यस्तम् । पम्हुट्ठो प्रमुषितः, प्रमृष्टश्च । आवेहडो प्रवृद्धः, अन्यसक्तश्च । ओट्टलं, (१)ओआमिअं अभिभूतम् । रुमिल्लं अभिलषितम् । उच्चुडरिअं प्रत्युद्गतम् । अक्कन्तो प्रवृद्धः । ओअल्लो छन्नः । करमो क्षीणः । कथो उपरतः, क्षीणश्च । पेक्किअं वृषरटितम् । अंकिअं आलिङ्गितम् । अविअं उक्तम् । उदुसिअं, उलुसिअं, चिमिणं, उलुकुसिअं, ऊसलिअं रोमाञ्चितम् । अस्संगिओ सक्तः । आरेइअं मुकुलितं, मुक्तं, भ्रान्तं, पुलकितं च । ओच्छंडिअं शरीरादिव्यथितम्, आपहृतं च । छंडिअं छन्नम् । ऊसंसिअं, ऊसअं उपधानीकृतम् । आलिअं प्रोतम् । अवहिट्ठो दर्पितः । आरद्धो वृद्धिं गतः, गृहायातश्च । उडिअं, घसणिअं अन्विष्टम् । घुग्घुस्सुअं अशङ्कं भणितम् । उल्लुडो, डच्छूडो आरुढः । आविलिओ कुपितः । कडिअं प्रीणितम् । उप्पत्तो गलितः, विरक्तश्च । गुडिओ संनद्धः । गुम्मइओ आपूरितः, स्खलितः, आमूलात् संवलितः, मूढः, विघटितश्च । पडिरिग्गअं भग्नम् । परिअड्डिअं प्रकटितम् । परिअट्टलिअं परिच्छन्नम् । ओप्पं मृष्टम् । कोज्जरिअं पूरितम् । उम्मलं घनीभूतम् । वेल्लइअं, घडइअं संकुचितम् । झंटिअं प्रहृतम् । अणुअज्झिओ प्रयातः प्रतिजागरितश्च । णज्झरं दलितम् । उलुहुलिओ अवितृप्तः । वप्पिअं, आरोग्गिरिअं भुक्तम् । उग्गालणं, उघणं, अहिरोइअं, उद्दुमाअं, अप्पुराणं परिपूर्णम् । पच्चावेणिओ संमुखमागतः । दुगुच्छं(३) भ्रमितम् । वट्टाविअं समापितम् । पारद्धं अभिपीडितम् । उद्दालिअं रणद्रुतम् । उज्झमाणं पलायितम् । विट्ठितं अर्जितम् । छिक्कं स्पृष्टम् । वेणिल्लअं हृतम् । विडलो आविग्नः । साणिअं, णिक्खालिअं शान्तम् । सोहिल्लं, वक्कं, समराइअं, आइप्पणं पिष्टम् । ओत्थअं, ओसप्पिअं अवसन्नम् । पडिसारिअं स्मृतम् । वेणटइअं पीडितम् । उग्गहिओ निपुणगृहीतः, विरचितश्च । गमिअं अवधूतम् । उद्दुक्किओ निषिद्धः । णिग्गिणो निर्गतः । किवाडो स्खलितः । लोट्टो अत्यासक्तः, स्मृतश्च । पविरंजवो स्निग्धः । उवडिअं, उद्दूलिअं, ओणअं अवनतम् । ओज्झरिअं प्रक्षिप्तं, विक्षिप्तं च ।

---

(१) ओजअं—ख० ।　(२) कुरोग्गिअं-क० ।　(३) दुम्मुच्छं-ख० ।

विस्सुओ, अविहिओ उन्मत्तः। परिक्खाइअअं परिक्षीणम्। छिक्कं, पिलुअं क्षुतम्। पविग्घं विस्मृतम्। अज्झसिअं, अवडाहिअं, उक्कोसं उत्कृष्टम्। हल्लपविअं त्वरितम्। उद्दारिअं उत्खातम्। अट्टो यातः। उल्लिक्कं कुम्भोष्टितम्। उच्छड्डिअं मुषितम्। ऊगिअं, पद्विअं मिअं अलङ्कृतम्। वक्किअं प्रसृतम्। गत्तो, ह्लिको, सत्तो गतः। खसिअं विच्छुरिअं। पडिहत्थं अपूर्वम्। णिज्जरं जीर्णं, खिन्नं च। उच्चल्लो, उप्पल्लो, उव्वालो, अंजडिओ, उत्तत्तो अध्यासितम्। ओइल्लअं, उवकुड्डं विप्रलब्धः। उद्दच्छो लिप्तम्। छूहिअं, पार्श्वपरावृत्तम्। अणग्गपल्लट्टं पुनरुक्तम्। अणणासअं आस्तृतम्। उप्पड्डिअं अनष्टम्। अणहवणअं भर्त्सितम्। उज्झरिओ, उग्घओ, विमइओ, मइओ, पइओ विस्तीर्णः। कुद्दो, वामो, अवगदो, पइण्णो, धुत्तो आक्रान्तम्। ओक्खलिअं, ओरपिअं, उवखंडिअं त्रुटितं खण्डितमित्यर्थः। अणणं, कव्वरिअं आरोपितम्। अहविओ चूर्णितम्। उल्लुट्ठिअं, दुहअं, उत्थिअं, उक्कासिअं, ओदरिअं रणलब्धम्। ओमहिअं पुरस्कृतम्। वक्खलिअं उत्सङ्गितम्। उअक्किअं पुञ्जीकृतम्। पिण्डइअं प्रशान्तम्। उल्लुहुंडिअं हेषिअं, हेक्किअं, हिसमणं उन्नतम्, उत्तमं, चुम्बितं च। मुम्मिअं, मुल्लिअं शीलितम्। महुरालिअं णिस्सिमिओ निर्वासितः। विक्खिण्णो अवकीर्णः। णिरित्तो नृत्तः। गुम्मुओ मूलोत्पन्नम्। णिरुत्तं निश्चितम्। पक्कड्डिअं प्रस्फुरितम्। ओणिडओ मद्यासक्तः(१)। वेट्ठिओ वेष्टितः। वोरिण्णो अतिक्रान्तः। जणिम्मिओ स्थापितः। लक्खओ, मिओ विघटितः। णिच्चणिओ जलधौतः। चक्खिअं आस्वादितम्। तुत्थअं रञ्जितम्। किक्किअं (२)आक्षिप्तम्। परट्टो भीतः, पतितः, पीडितश्च। पडिअग्गिअं वर्धापितं, परिभुक्तं च। उक्कुल्लो विधारितः। णिडिओ वञ्चितः। डूसक्किओ, सग्गओ, पुंसुलो मुक्तः। मुमिलो मूढः, स्खलितः, आपूर्णश्च। संसाओ चूर्णितः, भीतः, आरूढः उद्विग्नश्च। उज्झंसिअं। इत्यादि॥

धातवोऽर्थान्तरेष्वपि ॥ १३३ ॥

उक्तेभ्योऽर्थेभ्योऽर्थान्तरेष्वपि धातवो वर्तन्ते। वलिः प्राणने पठितः

---

(१) खंडिओ अन्यासक्तः—क०। (२) रेक्किअं—क०।

खादनेऽपि वर्तते-वलइ खादति, प्राणनं करोति वा। एवं कलिः संख्याने संज्ञाने च—कलइ जानाति, संख्यानं करोति वा। गिरिर्गतौ प्रवेशे च—गिरइ प्रविशति, गच्छति वा। कांक्षतेः पंफआदेशः प्राकृते—पंफइ इच्छति, खादति वा। पंकतेः(?) थक्कआदेशः-थक्कइ नीचां(१) गतिं करोति, विलम्बयति, वा। विलप्युपालम्भिसन्तपिनिःश्वसां झंखादेशः—झंखइ विलपति, उपालभते, सन्तपति, निःश्वसिति वा। केचित् कैश्चिदुपसर्गैर्नित्यम्- पहरइ युध्यते। संहरइ संवृणोति। अणुहरइ सदृशी भवति। णिहरइ पुरीषोत्सर्गं करोति। विहरइ क्रीडति। आहरइ खादति। पडिहरइ पुनः पूरयति। परिहरइ त्यजति। उपहरइ पूजयति। वाहरइ आह्वयति। पवसइ देशान्तरं गच्छति। उच्छुवइ चोरयति। उल्लुहरइ निस्सरति ॥

इति श्रीत्रिविक्रमदेवविरचितव्याकरणवृत्तौ तृतीयाध्यायस्य प्रथमः पादः ॥

दस्तस्य शौरसेन्यामखावचोऽस्तोः ॥ १ ॥

शौरसेन्यां भाषायामखौ अनादौ वर्तमानस्याचः परस्य अस्तोः असंयुक्तस्य तकारस्य दकारो भवति। तदो पूरिदपडिण्णेण मारुदिणा मन्तिदो। एतस्मात् एदाहि। सततम् सददं। अखाविति किम्? तथा तहा करेथा तरइ। अच इति किम्? चिन्ता। मन्तिदं। अस्तोरिति किम्? मन्तो। अय्यउत्तो। असंभाविदसक्कारं। हला सउन्दले ॥

संयोगेऽधः क्वचित् ॥ २ ॥

तस्येत्यनुवर्तते। शौरसेन्यां संयोगे अधो वर्तमानस्य तस्य दकारो भवति, क्वचिल्लक्ष्यानुसारेण। महंदा। महंदो। अंदेउरं ॥

तावति खोर्वा ॥ ३ ॥

शौरसेन्यां तावच्छब्दे खोः आदेस्तकारस्य दो वा भवति। दावा तावा ॥

थो धः ॥ ४ ॥

वेत्यनुवर्तते। शौरसेन्यां थस्य धो वा भवति। कधेति कहेति कथयति। कधं कहं कथम्। पिधं पिहं पृथक्। कधा कहा कथा। अखावित्येव—

(१) निजां—ख०।

थाम। थेवं। अच इत्येव—किंथा। अखोरित्येव—तित्थं तीर्थम्॥

इहहचोर्हस्य ॥ ५ ॥

शौरसेन्यामिहशब्दस्य 'थध्वमित्थाहचौ' इति विहितस्य हच्प्रत्ययस्य हकारस्य धकारो वा भवति। इध इह। होध होह। परित्ताअध परित्ताअह

भुवो भः ॥ ६ ॥

हस्येत्यनुवर्तते। शौरसेन्यां भुवादेशस्य हकारस्य भकारो वा भव भोदि, होदि, भुवदि, हुवदि भवति॥

अन्त्यादिदेति मो णः ॥ ७ ॥

शौरसेन्यामन्त्यात् मकारात् परो णकारागमो वा भवति, इदेति इ एकारे च परे। जुत्तंणिमं जुत्तमिणं युक्तमिदम्। सरिसंणिमं सरिसमिणं स मिदम्। किंणेदं किमेदं किमेतत्। एवंणेदं एवमेदं एवमेतत्॥

र्यो य्यः ॥ ८ ॥

शौरसेन्यां र्यस्य स्थाने य्य इत्ययं वा भवति। अय्यउत्तो। पय्याउ किदम्हि। सुय्यो। कय्यपरवसो। पक्षे—अज्जउत्तो। पज्जाउलीकिदम्हि। सु कज्जपरवसो॥

पूर्वस्य पुरवः ॥ ९ ॥

शौरसन्यां पूर्वशब्दस्य पुरव इत्यादेशो वा भवति। पुरवमेदं। पक्षे पुव्वमेदं॥

इअदूणौ क्त्वः ॥ १० ॥

शौरसेन्यां क्त्वाप्रत्ययस्य इअ दूण इत्यादेशौ वा भवतः। भविअ होदू पढिअ पढिदूण। रमिअ रमिदूण। होत्ता भोत्ता पढिंता रंता इति सि वस्थायां वलोपे॥

कृगमोऽडदुअः ॥ ११ ॥

कृञ् गम् इत्याभ्यां परस्य क्त्वाप्रत्ययस्य डित् अदुअ इत्यादेशो वा भव कदुअ। गदुअ। करिअ। गमिअ। करिदूण। गमिदूण॥

इदानीमो दाणिं ॥ १२ ॥

शौरसेन्यामिदानीमः स्थाने दाणिं इत्यादेशो लिद् भवति । लित्वान्न विकल्पः । अनंदरकरणिज्जं दाणिं आणवेदु अय्यो । 'तद्व्यत्ययश्चे'ति सूत्रात् प्राकृतेऽपि-अणंतरं दाणिं होइ ॥

तस्मात्ता ॥ १३ ॥

शौरसेन्यां तस्माच्छब्दः ता इत्यादेशमापद्यते । ता जाव पविसामि । ता अलं एदिणा माणेण ॥

णं नन्वर्थे ॥ १४ ॥

शौरसेन्यां नन्वर्थे णं इति निपातः प्रयोक्तव्यः । णं अफलोदुअं । णं अय्य-मिस्सेहिं पढमं एव्व आणत्तं । णं भवं मे अग्गदो चलदि ॥

अम्महे हर्षे ॥ १५ ॥

शौरसेन्याम् अम्महे इति निपातो हर्षे प्रयोज्यः । अम्महे इदाए उम्मिलाए सुपरिघडिदो भवं ॥

हीही वैदूषके ॥ १६ ॥

शौरसेन्यां विदूषकसम्बन्धिनि हर्षे हीही इति निपातः प्रयोक्तव्यः । हीही संपण्णा मणोरहा पिअवअस्सस्स ॥

हीमाणहे निर्वेदविस्मये ॥ १७ ॥

शौरसेन्यां हीमाणहे इति निपातः निर्वेदे विस्मये च प्रयोक्तव्यः । निर्वेदे-हीमाणहे परिस्संता अम्हे एदेण णिअविहिणो दुव्विलसिदेण । परिश्रान्ता वय-मेतेन निजविधेर्दुर्विलसितेन । विस्मये-हीमाणहे जीवंतवच्छा मे जणणी ॥

एवार्थे एव्व ॥ १८ ॥

शौरसेन्यामेवार्थे एव्व इति निपातः प्रयोज्यः । मह एव्व भणतस्स सो एव्व देसो ॥

हंजे चेट्याह्वाने ॥ १९ ॥

शौरसेन्यां हंजे इति निपातः चेट्याह्वाने प्रयोज्यः । हंजे चदुरिए ॥

अतो ङसेर्दुदोश् ॥ २० ॥

शौरसेन्यामकारात् परस्य ङसेः दु दो इत्येतौ शितौ भवतः । दूरादु, दूरादो एव्व ॥

आत् सावामन्त्र्य इनो नः ॥ २१ ॥

शौरसेन्यामिनो नकारस्य आमन्त्र्ये सौ परे आत्वं वा भवति । हे कंचुइआ हे कञ्चुकिन् । हे तपस्सिआ । हे मणस्सिआ ॥

मः ॥ २२ ॥

शौरसेन्यामामन्त्र्ये सौ परे नकारस्य मकारो वा भवति । हे राअं । हे पिअवंमं । भअवं कुसुमाउह । पत्ते–सअललोअं अहिभवन् हुदवह ॥

भवताम् ॥ २३ ॥

आमन्त्र्येति निवृत्तम् । शौरसेन्यां भवत्प्रकाराणां सौ परे नकारस्य मो भवति । किं भवं हिअएण चिंतेदि । किं भवान् हृदयेन चिन्तयति । एदु भवं, पज्जलिदो भअवं हुदासणो । एतु भवान्, प्रज्वलितो भगवान् हुताशनः । महवं पाअसासणो । मघवान् पाकशासनः । कअवं, करोमि, काहं च । कृतवान्, करोमि, करिष्यामि च ॥

भविष्यति स्सि ॥ २४ ॥

शौरसेन्यां भविष्यदर्थे विहिते प्रत्यये परे स्सि इति भवति । हिस्सादीनामपवादः । भविस्सिदि । करिस्सिदि । गच्छिस्सिदि ॥

इजेचोर्दट् ॥ २५ ॥

'लटस्तिप्तापिजेच्' इति वर्तमाने प्रथमपुरुषैकवचनस्थाने विहितयोरिजेचोर्दकारागमो भवति । टित्वादनुक्तन्यायेनाऽऽदेः । रमदि रमदे । हसदि हसदे । गच्छदि गच्छदे । होदि । देदि । णेदि ॥

शेषं प्राकृतवत् ॥ २६ ॥

शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं ततोऽन्यत् प्राकृतवदेव भवति । 'दिह्रौ मिथः से'रित्यारभ्य 'दस्तस्य शौरसेन्यामखावचोस्तो'रिति सूत्रात् प्राग् यानि सूत्राणि, तेषु यान्युदाहरणानि तानि तदवस्थान्येव शौरसेन्यां भवन्तीति विभागः प्रतिसूत्रमभ्यूह्य दर्शनीयः । यथा—अन्तावेई । जुवईजणो । मणसिला । इत्यादि ।।

मागध्या शौरसेनीवत् ।। २७ ।।

शेषमिति वर्तते । मागध्यां यद्वक्ष्यते ततोऽन्यच्छौरसेनीवद् द्रष्टव्यम् । तत्र 'दस्तस्य शौरसेन्यामखावचोस्तो:'—पशीददु भावमिश्शे । 'संयोगेऽधः क्वचित्'—अले किं एशे महंदे कलकले किमेष महान्कलकलः । 'तावति खोर्वा'—माले दावा, मुंचे दावा, जं दाव से आगमे । 'थो धः—'अले कुंभालअ कधेहि । 'इहहचोर्हस्य'—ओशलध अय्या ओशलध । 'भुवो मः'—भोदि । 'अन्यादिदेति मो णः'—जुत्तंणिमं । शलिशंणिमं । 'र्यो य्यः'—अय्य एशे खु कुमाले मलअकेदु । 'पूर्वस्य पुरवः'—एशे पुरवे । 'इअदूणौ क्त्वः'—किं खु शोहणे वम्हणे शेत्तिकलिअ-लञ्जापदिग्गहे दिण्णे । 'कृगमोर्डदुअः'—कदुअं । गदुअं । 'इदानीमो दाणिं'—शुणध दाणिं, हगे शक्कावदालब्भंतलवाशी धीवले । 'तस्मात्ता'—ता जाव उव-विसामि । 'णं नन्वर्थे'—णं अवशलोपशप्पणीआ लाआणो शुणीअन्ते । 'अम्महे हर्षे'—अम्महे एदाए उम्मिलाए शुपलिघडिदे भवं । 'हीही वैदूषके'—हीही भो संवाअणअरी एशा । 'हीमाणहे निर्वेदविस्मये'—निर्वेदे यथा राक्षसः—हीमाणहे पलिश्शंता हगे एदेण णिअविहिणो दुव्विलशिदेण । विस्मये यथा उदात्तराघवे राक्षसः—हीमाणहे जीवंतवच्छा मे जणणी । 'एवार्थे एव्व'—मए एव्व । 'हंजे चेट्याव्हाने'—हंजे चउलिए । 'अतो ङसेर्दुदोशू—' हगे विआउला अणादो मुद्दं पावेदि । 'आत्सावामन्त्र्य इनो नः'—हे कंचुइआ । 'मः'—हे लाअं । 'भवताम्'—एदु भवं शमले, भवं महावले । 'भविष्यति स्सि'—कहिं नु एदे लुहिलप्पिए भविश्शशि । 'इजेचोर्दट्' अम्हे चलम्ह पेक्खिकदुं इदे एव्व आअच्छदि । अले किं एशे महंदे कलकले शुणीअदि । 'शेषं प्राकृतवत्'—मागध्यामपि 'दिह्रौ मिथः सेः'—इत्यारभ्य 'दस्तस्य शौरसेन्यामखावचोस्तोः' इत्यस्य प्राक् यानि सूत्राणि तेषु यान्युदाहरणानि सन्ति तेषु मध्ये अमूनि

तदवस्थान्येवेति विभागः स्वयमभ्यूह्य दर्शनीयः ॥

त्वाड्डाहो ङसः ॥ २८ ॥

मागध्यामित्यनुवर्तते । मागध्याम् आत् अवर्णात् परस्य ङसः डित् आह इत्यादेशो भवति तु । हगे न एलिशाह कम्माह काली । अहं न ईदृशस्य कर्मणः कारी । भअदत्त शोणिदाह कुंभे । भगदत्त शोणितस्य कुम्भः । पक्षे—भीम-शेणश्श पश्चादो आहिण्डीअदि । हिडिंबाए कुडुम्बअशोकेण उपशमदि ॥

आमो डाहङ् ॥ २९ ॥

मागध्यामवर्णात्परस्य आमो डाहादेशो ङिद्वा भवति । ङित्वात्सानुनासिक उच्चारः । शअणाह मुखं स्वजनानां मुखम् । पक्षे न डाहङ्-सअणाणं । व्यत्ययात्प्राकृतेऽपि डाहङ्—तुम्हाहं । अम्हाहं । सरिसाहं । कम्माहं ॥

सौ पुंस्येलतः ॥ ३० ॥

मागध्यां पुँल्लिङ्गे अकारस्य एकारो भवति सौ परे । लित्वान्न विकल्पः । एष मेषः एशे मेशे । एष पुरुषः एशे पुलिशे । अत इति किम् ? निधिः णिही । पुंसीति किम् ? जं । जलं ॥

हगेऽहंवयमोः ॥ ३१ ॥

मागध्यामहंवयमोः स्थाने हगे इत्यादेशो भवति । हगे शक्कावदालतभतल-वाशी धीवले । हगे शंपत्ता । वयं संप्राप्ताः ॥

छोऽनादौ श्चः ॥ ३२ ॥

मागध्यामनादौ वर्तमानस्य छकारस्य शकाराक्रान्तचकारो भवति । गच्छ गच्छ गश्च गश्च । उच्छलति उश्चलदि । पिच्छिलः पिश्चिलो । लाक्ष-णिकस्यापि—आपन्नवत्सलः आवण्णवच्छलो, आवण्णवश्चलो । तिर्यक् प्रेक्षते तिरिच्छि पेच्छइ, तिलिश्चि पेश्चिदि । अनादाविति किम् ? छाले ॥

क्षः ᳵकः ॥ ३३ ॥

मागध्यामनादौ वर्तमानस्य क्षकारस्य जिह्वामूलीयाक्रान्तककारो भवति । यक्षः यᳵके । राक्षसः लᳵकशो । अनादावित्येव-खले ॥

स्कः प्रेक्षाचक्षेः ॥ ३४ ॥

मागध्यां प्रेक्षतेराचक्षतेश्च सकाराक्रान्तः ककारो भवति । 'क्ष ×क' इत्यस्यापवादः । पेस्कदि । आअस्कदि ॥

सः सषोः संयोगेऽग्रीष्मे ॥ ३५ ॥

मागध्यां सकारषकारयोः संयोगे वर्तमानयोः सकारो भवति, अग्रीष्मे ग्रीष्मशब्दे न भवति । ऊर्ध्वलोपाद्यपवादः । परस्खलदि हस्ती । बहस्पदी । मस्कली । विस्मये । षः—शुष्कदारु शुस्कदालु । कष्टम् कस्तं । शष्पकवलः शस्पकवले । धनुष्कुण्डं धनुस्कुंडं । अग्रीष्म इति किम् ? गिह्मवाशले ॥

स्रोः श्लौ ॥ ३६ ॥

मागध्यां स्रोः सकाररेफयोः शकारलकारौ यथासंख्यं भवतः । समः शमे । हंसः हंशे । स्तुतिः शुदी । शोभनं सोहणं । रः—नरः नले । करः कले । उभये—सारसः शालशे । पुरुषः पुलिशे ॥

न्यण्यज्ञञ्जां ञ्ञः ॥ ३७ ॥

मागध्यां न्य ण्य ज्ञ ञ्ज इत्येषां ञ्ञः ञकारो भवति । रित्वात् द्वित्वम् । अभिमन्युकुमारः अहिमञ्ञुकुमाले । कन्यका कञ्ञका । सामान्यं शामञ्ञं । ण्य—पुण्यवान् पुञ्ञवंते । अब्रह्मण्यम् अबम्हञ्ञं । ज्ञ—प्रज्ञा पञ्ञा । ञ्ज—अञ्जलिः अञ्ञली । धनञ्जयः धणञ्ञये । पातञ्जलः पातञ्ञले ॥

ञो व्रजेः ॥ ३८ ॥

मागध्यां व्रजतेर्जकारस्य ञ्ञः भवति । यस्यापवादः । वञ्ञदि । वञ्ञदे ॥

जद्यां यः ॥ ३९ ॥

मागध्यां जकारयकारद्यकाराणां यकारो भवति । ज—जानाति याणादि । जनपदः यणपए । दुर्जनः दुय्यणे । गर्जति गय्यति । य—याणवत्तं यानपात्रम् । द्य—मद्यं मय्यं । अद्य किल विद्याधर आगतः अय्य किल विय्याहले आअदे । यस्य यत्वविधानम् 'आदेर्जः' इत्यस्य बाधनार्थम् ॥

ष्ट्टौ स्थम् ॥ ४० ॥

मागध्यां षकाराक्रान्तः ठकारो द्विरुक्तः टकारश्च सकाराक्रान्तं थकारमापद्यते। ष्ठ–शुस्थु कदं सुष्ठु कृतम्। कोस्थागालं कोष्ठागारम्। ट्ट–पट्टं पस्थं। भस्थारिआ। भट्टारिका। भट्टः भस्थे। भट्टिनी भस्थिणी।

स्थर्थौ स्तम् ॥ ४१ ॥

मागध्यां स्थ र्थ इत्येतौ सकाराक्रान्तं तकारमापद्येते। स्थ–उवस्तिदे उपस्थितः। शुस्तिदे सुस्थितः। र्थ—अस्तवदी अर्थपतिः। शस्तवाहे सार्थवाहः॥

चिट्टस्तिष्ठस्य ॥ ४२ ॥

मागध्यां स्थाधातोर्यः तिष्ठ इत्यादेशस्तस्य चिट्ट इत्यादेशो भवति। चिट्टदि। चिट्टदे॥

नो नणोः पैशाच्याम् ॥ ४३ ॥

पैशाच्यां भाषायां नकारणकारयोर्नकारो भवति। पनमत पनयप्पकुवितं प्रणमत प्रणयप्रकुपितम्। गुनगनजुत्तो गुणगणयुक्तः। गुणेन गुनेन। नकारस्य नकारकरणं णत्वबाधनार्थम्॥

न्यण्यज्ञां ञर् ॥ ४४ ॥

पैशाच्यां न्य ण्य ज्ञ इत्येतेषां ञकारो भवति। रित्वाद् द्वित्वम्। न्य–कञ्ञका कन्यका। अभिमञ्ञू अभिमन्युः। ण्य—पुञ्ञकम्मो पुण्यकर्मा। पुञ्ञाहं पुण्याहम्। ज्ञ—पञ्ञा प्रज्ञा। सव्वञ्ञो सर्वज्ञः। सञ्ञा संज्ञा। विञ्ञो विज्ञः। संञ्ञाणं संज्ञानम्॥

राज्ञो ज्ञो वा चिञ् ॥ ४५ ॥

पैशाच्यां राजन्शब्दसम्बन्धिनो ज्ञकारस्य चिञ् इत्यादेशो वा भवति। राचिञ्ञा लपितं रञ्ञा लपितं। राचिञ्ञो धनं रञ्ञो धनं। ज्ञ इति किम्? राजा॥

तल्तदोः ॥ ४६ ॥

पैशाच्यां तकारदकारयोस्तकारो भवति। लित्वान्न विकल्पः। त–भगवती

भअवती । सततं सततम् । द—मतनपरवसो । तामोतरो । वतनकं । मालातो मालातु । शिरीतो शिरीतु । तरीतो तरीतु । तरूतो तरूतु । वधूतो वधूतु । होतु । रमतु । तकारस्य तकारविधानमादेशान्तरबाधनार्थम् । तेन—पताका, वेतिसो इत्यादि सिद्धं भवति ॥

शषोः सः ॥ ४७ ॥

पैशाच्यां शकारषकारयोः सो भवति । सोभनं । ससी । संखो । संका । सक्को । ष—विसमो । किसनो कृष्णः । विसेसो । 'न प्रायो लुक्कादिच्छलूषट्—छम्यन्तसूत्रोक्त'मित्यस्य बाधकस्य बाधनार्थेऽयं योगः ॥

लो ळः ॥ ४८ ॥

पैशाच्यां लकारस्य ळकारो भवति । सीळं । कुळं । जळं । फळं । कमळं ॥

दृस्तिर्यादृशगे ॥ ४९ ॥

पैशाच्यां यादृश इत्यादिषु दृश इत्यस्य स्थाने ति इत्यादेशो भवति । यातिसो यादृशः । भवातिसो भवादृशः । तातिसो तादृशः । अह्मातिसो अस्मादृशः । अन्न्यातिसो अन्यादृशः । ईतिसो ईदृशः । केतिसो कीदृशः । एतातिसो एतादृशः । इत्यादि ॥

र्यस्नष्टां रिअसिनसिटाः क्वचित् ॥ ५० ॥

पैशाच्यां र्य स्न ष्ट इत्येतेषां यथासंख्यं रिअ सिन सिट इत्यादेशाः क्वचिद्भवन्ति । भार्या भारिआ । स्नानं सिनानं । कष्टं कसिटं । क्वचिदिति किम् ? अय्यो । सुसा । भट्टो ॥

टोस्तु तु ॥ ५१ ॥

पैशाच्यां टु इत्यस्य तु इति भवति तु । कुटुम्बकं कुतुंबकं ॥

यः पो हृदये ॥ ५२ ॥

पैशाच्यां हृदयशब्दे यस्य पो भवति । हितपकं । किं वि किं वि हितपके अत्थं चिंतयमानी ॥

टा नेन तदिदमोः ॥५३ ॥

पैशाच्यां तदिदमोः स्थाने टावचनेन सह नेन इत्यादेशो भवति । नेन । तेन अनेन वा ॥

नाये स्त्रियाम् ॥ ५४ ॥

पैशाच्यां तदिदमोः टावचनेन सह नाये इत्यादेशः स्त्रियां भवति । नाये । तया अनया वा ॥

ङसेस्तोतुशतः ॥ ५५ ॥

पैशाच्याम् अकारात्परस्य ङसेः तो तु इत्येतौ भवतः । शित्वात्पूर्वस्य दीर्घः । तुवातो तुवातु । ममातो ममातु ॥

तडिजेचः ॥ ५६ ॥

पैशाच्यां लटः प्रथमपुरुषैकवचनादेशयोः इच् एच् इत्येतयोः तकारागमः टिद्भवति । टकार आदिविध्यर्थः । रमति रमते । हसति हसते । गच्छति गच्छते । होति ॥

एय्य एव भविष्यति ॥ ५७ ॥

पैशाच्यामिजेचोः स्थाने भविष्यति एय्य एत्ययमेव भवति, नतु सिः । तं तध्थून चिंतितं रञ्ञा का एसा हुएय्य । तां दृष्ट्वा चिन्तितं राज्ञा कैषा भविष्यति ॥

इय्यो यकः ॥ ५८ ॥

पैशाच्यां यक्प्रत्ययस्य इय्य इत्यादेशो भवति । नीइय्यते । गीइय्यते । रमिय्यते । पडिय्यते ॥

कृञो डीरः ॥ ५९ ॥

पैशाच्यां कृञः परस्य यकः डित् ईर इत्यादेशो भवति । पढमदंसनेन सव्वस्सेव संमानं कीरते । प्रथमदर्शनेन सर्वस्यैव सम्मानः क्रियते ॥

क्त्वा तूनं ॥ ६० ॥

पैशाच्यां क्त्वाप्रत्ययः तूनं इत्यादेशमापद्यते। गंतूनं। रंतूनं। मंतूनं। हशितूनं। पठितूनं। कथितूनं॥

ष्ट्वः ट्ठूनत्थूनौ ॥ ६१ ॥

पैशाच्यां षत्वे कृते ष्ट्वेतिसिद्धस्य क्त्वाप्रत्ययस्य स्थाने ट्ठून त्थून इत्यादेशौ भवतः। तट्ठून तत्थून। नट्ठून नत्थून॥

शेषं शौरसेनीवत् ॥ ६२ ॥

पैशाच्यां यदुक्तं ततोऽन्यत् शौरसेनीवद्भवति। अथ ससरीरो भगवं मकरद्धजो एत्थ परिभमन्तो एव्व एवंविधाए भगवतीए कथं ताए सातेसगहनं कं कं एतातिसं अतित्थपुरवं महाधनं तट्ठून॥

न प्रायो लुक्कादिच्छलूषट्छम्यन्तसूत्रोक्तम् ॥ ६३ ॥

पैशाच्यां 'प्रायो लुक्कगचजतदपयवाम्' इत्यारभ्य 'छलूषट्छमीसुधाशावसप्तपर्णे' इति यावत् यानि सूत्राणि तैर्यदुक्तं कार्यं तन्न भवति। मकरकेतू। मगधपुत्तवचनं। विजयसेनेन लपितं। मतं। पापं। आयुधं। देवरो। एवमन्यसूत्राणामप्युदाहरणानि द्रष्टव्यानि॥

रो लस्तु चूलिकापैशाच्याम् ॥ ६४ ॥

चूलिकापैशाच्यां भाषायां रेफस्य लकारो भवति तु। पनमत पनयप्पकुपितकालीचलनग्गलग्गपतिबिंबं तस्स तु न उतप्पनेसुं एक्कातस्ततु थलं लुत्तं। नलो नरो। सलो सरो॥

गजडदबघझढधभां कचटतपखछठथफाः ॥ ६५ ॥

चूलिकापैशाचिके गजडदबघझढधभ इत्येतेषां यथासंख्यं कचटतप खछठथफ इत्येते लितो भवन्ति। नगरं नकलं। मार्गणः मक्कनो। मेघः मेखो। घनः खनो। व्याघ्रः वक्खो। राजा राचा। जीमूतः चीमूतो। जर्जरं चच्चलं। निर्झरः निच्छलो। झर्झरः छच्छलो। तडागं तटाकं। डमरुकः टमरुको। मण्डलं मंटलं। गाढं काठं। ढक्का ठक्का। षण्डः संटो। मदनः मतनो। दामोदरः

तामोतरो। मन्दरः मंतरो। मधुरं मथुलं। धारा थारा। बान्धवः बंथवो। बालकः पालको। रभसः रफसो। रम्भा रंफा। भगवती फकवती। नियोजितं नियोचितं। कचिल्लाक्षणिकस्यापि–प्रतिमा पडिमा पटिमा। दंष्ट्रा दाढा ताठा ॥

अन्येषामादियुजि न ॥ ६६ ॥

अन्येषामाचार्याणां मते गजडदबघझढधभ इत्येषामादौ स्थितानां युजि-धातौ च कचटतपखछठथफा न भवन्ति। गती। घम्मो। जनो। झल्लरी। डमरुकः। ढक्का। दानं। धूळी। बालो। पालं। युज्–नियोजितम्। अन्येषा-मिति किम्? कती। नियोचितं॥

शेषं प्राग्वत् ॥ ६७ ॥

चूलिकापैशाचिके 'रो लस्तु' इत्यादि यदुक्तं, ततोऽन्यत् प्राग्वत् प्राक्तन-पैशाचीवद्भवति। 'नो णनोः'—नयनं। फनी। एवमन्यदपि॥

इति श्रीत्रिविक्रमदेवकृतप्राकृतव्याकरणवृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः॥

प्रायोऽपभ्रंशेऽचोऽच् ॥ १ ॥

अपभ्रंशेऽचः स्थाने प्रायः अच् अन्यो भवति। कउ काउ। वेणा वेणी। बाहु बाहा बाहुः। पट्ठं पुट्ठं(१) पृष्ठम्। तणु तिणु तुणं तृणम्। सुकिदु सुकुदु सिकिउ सुकृतम्। लिह लिहा लेहं लेखा। गउरं गोरं। प्रायोग्रहणात् यश्चापभ्रंशे शेषो वक्ष्यते, तस्यापि कचित्प्राकृतवत् शौरसेनीवच्च कार्यं भवति॥

अचोऽस्तवोऽखौ कखतथपफा गघदधबभान् ॥ २ ॥

अपभ्रंश इत्यनुवर्तते। अपभ्रंशे अचः परे अस्तवः असंयुक्ताः अखौ अनादौ वर्तमानाः कखतथपफ इत्येते वर्णा गघदधबभ इत्येतान् प्रायो यथा-संख्यमापद्यन्ते। कस्य गः-

जं दिट्ठउं सोमग्गहणु–अइसहिं हसिउ निसंकु।
पिअमाणुसविच्छोहगरु गिलि गिलि राहु मियंकु॥

---

(१) पिट्ठी ख०।

यद् दृष्टं सोमग्रहणमसतीभिर्हसितं निःशङ्कम् ।
प्रियमानसविक्षोभकरं गिल गिल राहो मृगाङ्कम् ॥

खस्य घः—

अम्मीए सत्थावत्थेहिं सुधिं चिन्तिज्जइ माणु ।
प्रिए दिट्ठे हल्लोहलेण को चेअइ अप्पाणु ॥
अम्ब ! स्वस्थावस्थैः सुखेन चिन्त्यते मानः ।
प्रिये दृष्टे हल्लोहल्लेन कश्चेतयत्यात्मानम् ॥

तथफफानां दधबभाः—

सबधु करेप्पिणु कधिदु मइं तसु पर सभलउं जम्मु ।
जासु न चाउ न चारहडि न य पम्हट्ठउ धम्मु ॥
शपथं कृत्वा कथितं मया तस्य परं सफलं जन्म ।
यस्य न त्यागो न चारभटी न यस्य प्रमुष्टो धर्मः ॥

अच इति किम् ? गिलि गिलि राहु मयंकु । अस्तव इति किम् ? एक्कु हिं अक्खिहिं सावणु । एकस्मिन्नक्षिणि श्रावणः । अखाविति किम् ? सबधु प्पिणु करेप्पिणु । प्रायोधिकारात् क्वचिन्न भवति—

(१)जइ केवँइ पावीसु पिउ अकिआ कोड्ड करीसु ।
पाणीउ नवइ सरावि जिवँ सव्वंगे पइसीसु ॥
यदि कथञ्चित् प्राप्स्ये प्रियमकृतं कौतुकं करिष्यामि ।
पानीयं नवे शरावे यथा सर्वाङ्गेण प्रविशाति ॥
उअ कणिआरु पफुल्लिअउ कंचणकांतिपयासु ।
गोरीवयणविणिज्जिअउ नं सेवइ वणवासु ॥
पश्य कर्णिकारः प्रफुल्लितः काञ्चनकान्तिप्रकाशः ।
गौरीवदनविनिर्जित इव सेवते वनवासम् ॥

तु मो ड्वम् ॥ ३ ॥

अपभ्रंशेऽचः परोऽसंयुक्तोऽनादौ वर्तमानो मकारो वत्वमापद्यते तु । ङित्वात् सानुनासिकः । कवँलु कमलु । भवँरु भमरु । लाक्षणिकस्यापि—जीवँ । आवँ ।

---

(१) इदमुदाहरणं ख० पुस्तके नास्ति ।

तिवँ। अच इत्येव-संमाणेइ लोउ। असंयुक्त इत्येव-तसु परसुलभउ जम्ह
अखावित्येव-मअणु ॥

ह्मो म्हम् ॥ ४ ॥

अपभ्रंशे ह्म इत्ययं मकाराक्रान्तहकारमापद्यते तु। म्ह इति 'श्मष्मस्मह्
मस्मररश्मौ म्हः' इति प्राकृतलक्षणविहितोऽत्र गृह्यते, संस्कृते तस्यासंभवात्
गिम्हो गिह्मो। बम्हणो बह्मणो।

बम्ह ते विरला केवि नर जे सव्वंग छइल्ल।
जे वंका ते बंचयर जे उज्जुअ ते वइल्ल ॥
ब्रह्मन्! ते विरलाः केपि नरा ये सर्वाङ्गदक्षाः।
ये वक्रास्ते वञ्चकतरा य ऋजवस्ते बलीवर्दाः ॥

रो लुकमधः ॥ ५ ॥

अपभ्रंशे संयोगस्याधो वर्तमानो रेफो लुकं लोपमाप्नोति तु। पिउ प्रि
प्रियः।

जइ केवँइ पावीसु पिउ अकिआ कोड्ड करीसु।
पाणीउ नवइ सरावि जिवँ सव्वंगे पइसीसु ॥
यदि कथञ्चित् प्राप्स्ये प्रियमकृतं कौतुकं करिष्यामि।
पानीयं नवे शरावे यथा सर्वाङ्गेण प्रविशति ॥

पक्षे—

जइ भग्गा पारक्कडा तो सहि मज्झु पिएण।
अह भग्गा अम्हहंतणा तो ते मारिअडेण ॥
यदि भग्नाः परकीयास्ततः सखि! मम प्रियेण।
अथ भग्ना अस्मदीयास्ततस्तेन मारितेन ॥

क्वचिदभूतोऽपि ॥ ६ ॥

अपभ्रंशे क्वचिदविद्यमानोऽपि रेफो भवति। व्रासू व्यासः।

व्रासु महरिसि एउ भणइ जइ सुइ सत्थु पमाणु।
मायहं चलण णवंताहं दिवे दिवे गंगएहाणु ॥

व्यासो महर्षिरेतद्भणति यदि श्रुतिः शास्त्रं प्रमाणम् ।
मातॄणां चरणौ नमतां दिवा दिवा गङ्गास्नानम् ॥

क्वचिदिति किम् ? वासेण वि भारअखंभि बद्धं । व्यासेनापि भारत-स्तम्भे बद्धम् ॥

विपदापत्सम्पदि द इ ॥ ७ ॥

अपभ्रंशे विपद् आपद् संपद् इत्येतेषां दकारस्य इकारो भवति । विवइ । आवइ । संपइ। प्रायोऽधिकारात्–गुणेहिं न संपइ किन्ति। गुणैर्न सम्पत्कीर्तिः॥

कथंयथातथा डिहडिथडिमडेमास्थादेः ॥ ८ ॥

अपभ्रंशे कथं यथा तथा इत्येतेषु थादेरवयवस्य इह इथ इम एम इत्येते चत्वार आदेशा डितो भवन्ति(१) । किह किथ किम केम कथम् । जिह जिथ जिम जेम यथा । तिह तिथ तिम तेम तथा ।

बिम्बाहरि तणुरअणवणु किह ठिउ सिरिआणंदु ।
निरुबमरसु पिए पिअविजणु सेसहो दिण्णी मुद्दु ॥
बिम्बाधरे तनुरदनव्रणः कथं स्थितः श्रीआनन्द ! ।
निरुपमरसं प्रियेण पीत्वेव शेषस्य दत्ता मुद्रा ॥
केम समप्पउ दुट्ठु दिणु किध रअणी चुडु होइ ।
णवबहुदंसणलालसउ वहइ मणोरहसोइ ॥
कथं समाप्यतां दुष्टं दिनं कथं रजनी यदि भवतु ।
नववधूदर्शनलालसो वहति मनोरथान् सोऽपि ॥
ओ गोरीमुहणिज्जिअउ बद्दलि लुक्कु मिअङ्कु।
अन्नु वि जो परिहविअतणु सो किम भमइ निसंकु ॥
ओ गौरीमुखनिर्जितो दुर्दिने लीनो मृगाङ्कः।
अन्योऽपि यः परिभूततनुः स कथं भ्रमति निःशङ्कम् ॥
भण सहि निहुअउं तेम मइं जइ पिउ दिट्ठु सदोसु ।
जेम न जाणइ मज्झु मणु पक्खावडिअं तासु ॥

---

(१) इतः परं प्रायः ख०पुस्तके केवलं शब्दरूपाण्येवोदाहरणेषु दत्तानि, क०पुस्तके तु पद्यगतान्येव । द्विविधान्यपि सङ्गृहीतान्यत्र पुस्तके।

भण सखि ! निभृतं तथा मां यदि प्रियो दृष्टः सदोषः ।
यथा न जानाति मम मनः पक्षायितं तस्य ॥
जिम जिम वङ्किम लोअणहं णिरि सावलि सिक्खेइ ।
तिम तिम वम्महु अप्पिअ सरा खरपत्थरी तिक्खेइ ॥
यथा यथा वक्रिमाणं लोचनयोर्नितरां श्यामला शिक्षयति ।
तथा तथा मन्मथो निजान् शरान् खरप्रस्तरे तीक्ष्णयति ॥
णवर मिअङ्कु वि तिह तवइ जिह दिणअरु खअगालि ।
मइ जाणिउं पिअविरहिअहं कवि धर होइ विआलि ॥
केवलं मृगाङ्कोऽपि तथा तपति यथा दिनकरः क्षयकाले ।
मया ज्ञातं प्रियविरहितानां कापि धरा भवत्यपराह्णे ॥

एवं जिथतिथौ उदाहार्यौ ॥

दादेर्डेहो यादृक्तादृक्कीदृगीदृशाम् ॥ ९ ॥

अपभ्रंशे यादृगादीनां दादेरवयवस्य डित् एह इत्यादेशो भवति । सर्वत्र डित्वाट्टिलोपः ।

मइं भणिअउ बलिराउ तुहुं केहउ मग्गणु एहु ।
जेहु तेहु नवि होइ वढ सइं नाराअणु एहु ॥
मया भणितो बलिराज ! त्वं कीदृङ्, मार्गण ईदृक् ।
यादृक्तादृङ् न भवति मूढ ! स्वयं नारायण एषः ॥

डइसोऽताम् ॥ १० ॥

अपभ्रंशे यादृशादीनामकारान्तानां यादृश-तादृश-कीदृश-ईदृश-इति रूपाणां दादेरवयवस्य डित् अइस इत्यादेशो भवति । जइसु । तइसु । कइसु । अइसु ॥

यावत्तावत्युंमहिंमा वादेः ॥ ११ ॥

अपभ्रंशे यावत्तावदित्यव्यययोर्वकारादेरवयवस्य उं महिं म इति त्रय आदेशा भवन्ति ।

तिलहं तिलत्तणु ताउं पर जाउं न नेह गलन्ति ।
नेहि पणट्ठहि तेज्जि तिल तिल फिट्टवि खल होन्ति ॥

तिलानां तिलत्वं तावत्परं यावन्न स्नेहा गलन्ति ।
स्नेहे प्रनष्टे त एव तिलास्तिला भ्रष्ट्वा खला भवन्ति ॥
जामहिं विसमी कज्जगइ जीवहं मज्भे एइ ।
तामहिं अच्छउ इअरु जणु सुअणुवि अंतरु देइ ॥
यावद्विषमा कार्यगतिर्जीवानां मध्य एति ।
तावदास्तामितरो जनः सुजन एवान्तरं ददाति ॥
जाम न निवडइ कुम्भअडि सीहचवेउचडक्क ।
ताम समत्तहं मयगलहं पइ पइ वज्जइ ढक्क ॥
यावन्न निपतति कुम्भतटे सिहचपेटाद्दढाघातः ।
तावत् समस्तानां मदकलानां पदे पदे वाद्यते ढक्का ॥

डेत्तुलडेवडावियत्कियति च व्यादेर्वतुपः ॥ १२ ॥

इयत्कियदित्येतयोश्चकाराद्यावत्तावतोश्च परिमाणार्थे विहितो यो वतुप्प्रत्ययः :स्य व्यादेर्वकारादेर्यकारादेश्चावयवस्य एत्तुल एवड इत्यादेशौ डितौ ः । एत्तुलो । केत्तुलो । एवडो । केवडो ।

जेवडु अंतरु रावणरामहं तेवडु अंतरु पट्टणगामहं ।
यावदन्तरं रावणरामयोः, तावदन्तरं पत्तनग्रामयोः ।

डेत्तहे त्रलः ॥ १३ ॥

अपभ्रंशे सर्वादेः सप्तम्यर्थे त्रल्प्रत्ययस्य डित् एत्तहे इत्यादेशो भवति । त्तहे । तेत्तहे ।

जेत्तहे तेत्तहे वारि घरि लच्छि विसंठुल धाइ ।
पिअपब्भट्ठव गोरड निच्चल कहिं वि न ठाइ ॥
यत्र तत्र द्वारे गृहे लक्ष्मीर्विसंस्थुला भवति ।
प्रियभ्रष्टेव गौरी निश्चला कुत्रापि न तिष्ठति ॥

यत्तदोर्डेत्तु ॥ १४ ॥

त्रल इत्यनुवर्तते । यत् तत्-आभ्यां परस्य त्रल्प्रत्ययस्य डित् एत्तु इत्यय- देशो भवति । जेत्तु ठिदो । यत्र स्थितः । तेत्तु ठिदो । तत्र स्थितः ॥

कुत्रात्रे च डेत्थु ॥ १५ ॥

अपभ्रंशे कुत्र अत्र इत्येतयोः स्थितस्य चकारात् यत्तदोः परस्य त्रल्प्रत्ययस्य डित् एत्थु इत्यादेशो भवति। केत्थु । एत्थु । जेत्थु । तेत्थु ।

जइ सो घडिदि प्रयावदी केत्थुवि लेप्पिणु सिक्खु ।
जेत्थुवि तेत्थुवि एत्थु जगि भण तो तहि सारिक्खु ॥
यदि स घटयति प्रजापतिः कुत्रापि लात्वा शिक्षाम् ।
यत्रापि तत्राप्यत्र जगति भण तर्हि तस्याः सदृक्षः ॥

त्वतलौ प्पणम् ॥ १६ ॥

अपभ्रंशे भावेऽर्थे विहितौ त्वतल्प्रत्ययौ प्पण इत्यादेशमापद्येते। पडुप्पणं पटुत्वं पटुता वा । सुक्कप्पणं शुक्लत्वं शुक्लता वा ।

साहुवि लोउ तडप्फडइ वड्डत्तणहो तणेण ।
वड्डप्पणु परिपाविअइ हत्थि मोक्कलडेण ॥
सर्वोऽपि लोक उत्ताम्यति बृहत्त्वस्यार्थे ।
महत्त्वं परं प्राप्यते हस्तेन मुक्तेन ॥

तडप्फडइ इति तु औत्सुक्ये शब्दानुशासने देशीयात् ॥

तव्यस्य एव्वइएव्वउएव्वाः ॥ १७ ॥

अपभ्रंशे तव्यप्रत्ययस्य एव्वइ एव्वउ एव्व इति त्रय आदेशा भवन्ति। जेव्वइ, जेव्वउ, जेव्व जेतव्यः ।

एउ गृण्हेप्पिणु ध्रुं मइं जइ प्रिउ उव्वारिज्जइ ।
महु करिएव्वउ किंपि नवि मरिएव्वउ पर देज्जइ ॥
एतद् गृहीत्वा यन्मया यदि प्रिय उद्वार्यते ।
मम कर्तव्यं किमपि नापि मर्तव्यं परं दीयते ॥
देसुच्चाडणु सिहिकढणु घणकुट्टणु जं लोइ ।
मंजिट्ठए अइरत्तिए सव्वु सहेव्वउ होइ ॥
देशोच्चाटनं शिखिकथनं घनकुट्टनं यल्लोके ।
मञ्जिष्ठयाऽतिरक्तया सर्वं सोढव्यं भवति ॥
सोएव्व पर वारिआ पुप्फवईहिं समाणु ।

जग्गेव्व पुणु को धरइ जइ सो वेउ पमाणु ॥
स्वपितव्यं परं वारितं पुष्पवतीभिः समम्।
जागर्तव्यं पुनः को बिभर्ति यदि स वेदः प्रमाणम् ॥

क्त्व इइउइविअवि ॥ १८ ॥

अपभ्रंशे क्त्वाप्रत्ययस्य इ इउ इवि अवि इति चत्वार आदेशा भवन्ति। करइ, करइउ, करइवि, करअवि कृत्वा। इ-

हिअडा जइ वेरिअ घणा तो किं अब्भि चडाहुं।
अम्हहं बे हत्थडा जइ पुणु मारि मराहुं ॥
हृदय! यदि वैरिणो घनास्ततः किमाकाश आरोहामः।
अस्माकं द्वौ हस्तौ यदि पुनर्मारयित्वा म्रियामहे ॥

इउ—

पओहर वज्जडा निच्चु जे संमुह चिट्ठन्ति।
महु थक्कहो समरंगणि गयघड भज्जिउ जंति ॥
पयोधरौ वज्रमयौ नित्यं यौ संमुखं तिष्ठतः।
मम तान्तस्य समराङ्गणे गजघटा भङ्क्त्वा यान्ति ॥

इवि—

रक्खइ सा विसहारिणी बे कर चुम्बिवि जीउ।
पडिबिम्बिअमुंजालु जलु जेहिं अडोहिउ पीउ ॥
रक्षति सा विषहारिणी द्वौ करौ चुम्बित्वा जीवम्।
प्रतिबिम्बितमुञ्जालं जलं याभ्यामनवगाह्य पीतम् ॥

अवि—

बाह विछोडवि जाहि तुहुं हउं तेवँइ को दोसु।
हिअअट्ठिउ जइ नीसरहि जाणउं मुंज स रोसु ॥
बाहू विच्छोड्य यासि त्वं भवतु तथा को दोषः।
हृदयस्थितो यदि निस्सरसि जानामि मुञ्ज! स रोषः ॥

एप्प्येप्पिण्वेव्येविणु ॥ १९ ॥

अपभ्रंशे क्त्वाप्रत्ययस्य एप्पि एप्पिण एवि एविण इति चत्वार

आदेशा भवन्ति। करएप्पि, करएप्पिणु, करएपि, करएपिणु कृत्वा।

जेप्पि असेसु कसाअबलु देप्पिणु अभउ जअस्सु।
लेवि महव्वअ सिवु लहहिं झाएपिणु तत्तस्सु॥
जित्वाऽशेषं कषायबलं दत्त्वाऽभयं जगतः।
लात्वा महाव्रतानि शिवं लभन्ते ध्यात्वा तत्त्वम्॥

पृथग्योग उत्तरार्थः॥

तुम एवमणाणहमणहिं च॥ २०॥

अपभ्रंशे तुमुन्प्रत्ययस्य एवं अण अणहं अणहिं इत्येते चत्वारः, चकारात् एप्पि एप्पिणु एपि एपिणु इत्येते च चत्वार एवमष्टादेशा भवन्ति। करएवं, करअण, करअणहं, करअणहिं, करएप्पि, करएप्पिणु, करएपि करएपिणु कर्तुम्।

देवं दुक्करु निअयधणु करअण न तउ पडिहाइ।
एमइ सुहु भुञ्जणहं मणु पर भुंजणहिं न जाइ॥
दातुं दुष्करं निजधनं कर्तुं न तपः प्रतिभाति।
एवमेव सुखं भोक्तुं मनः परं भोक्तुं न याति॥
जेप्पि चएप्पिणु सअल धर लेपिणु तवु पालेवि।
विणु संते तित्थेसरेण को सक्कइ भुवणेवि॥
जेतुं त्यक्तुं सकलं, धरां लातुं तपः पालयितुम्।
विना शान्त्या तीर्थेश्वरेण कः शक्नोति भुवनेऽपि॥

गमेस्त्वेप्प्येपिण्वोरेलुक्॥ २१॥

अपभ्रंशे गमेर्धातोः परयोः एपि एपिणु इत्यादेशयोरेकारस्य लुग्भवति तु। गंपि, गंपिणु, गमेप्पि, गमेप्पिणु गत्वा।

गंपिणु वाराणसिहि नर अह उज्जइणिहि गंपि।
मुआ पप्पुवन्ति परम पउ दिव्वन्तरइ न जंपि॥
गत्वा वाराणस्यां नरा अथ उज्जयिन्यां गत्वा।
मृताः प्राप्नुवन्ति परमं पदं दिव्यन्तरे न यदपि॥

पक्षे—

गंगं गमेप्पिणु जो क्खु अन्नु जो सिवतित्थु गमेप्पि।

कीडदि तिदसावास गइ सोव्ज लोउ जएप्पि ।
गङ्गां गत्वा यः खलु अन्यत् यः शिवतीर्थं गत्वा ॥
क्रीडति त्रिदशावासं गतः सोऽद्य लोकं जित्वा ॥

तृनो णअल् ॥ २२ ॥

अपभ्रंशे तृनः प्रत्ययस्य लित् णअ इत्यादेशो भवति । होणउ भविता । सुणउ श्रोता ।

हत्थि मारणउ लोउ बोल्लणउ ।
पडहु वज्जणउ सुनउ भसणउ ॥
हस्ती मारयिता, लोकः कथयिता ।
पटहो वदिता, शुनको भषिता ॥

छस्य युष्मदादेर्डारः ॥ २३ ॥

अपभ्रंशे युष्मदादिभ्यः परस्य छस्य डित् आर इत्यादेशो भवति । तुम्हारु युष्मदीयः । अम्हारु अस्मदीयः ।

संदेसें काइं तुम्हारेण जं संगहो न मिलिज्जइ ।
सुविणंतरि नं पाणिएण पिअ पिआस किं छिज्जइ ॥
संदेशेन किं त्वदीयेन यत् सङ्गस्य (सङ्गो) न मिल्यते ।
स्वप्नान्तरेऽपि तेन पानीयेन प्रिय ! पिपासा किं छिद्यते ॥

दिक्खि अम्हार कन्तु । पश्य मदीयं कान्तम् । बहिणि अम्हार कन्तु । भगिनि ! मदीयः कान्तः ॥

जणिजणुनंनइनावइनाइ इवार्थे ॥ २४ ॥

अपभ्रंशे इवार्थे जणि जणु नं नइ नावइ नाइ इति षडादेशा भवन्ति । चंदु-जणि, चंदुजणु, चंदुनं, चंदुनइ, चंदुनावइ, चंदुनाइ चन्द्रइव । जणि—

चम्पअकुम्भमज्झि सहि सहलु पइट्ठउ ।
सोहइ इन्दणील जणि कणइ उवविट्ठउ ॥
चम्पककुम्भमध्ये सखि ! भ्रमरः प्रविष्टः ।
शोभते इन्द्रनील इव कनक उपविष्टः ॥

जणु—

निरुवमरसु पिए पिअविजणु । प्रागेव व्याख्यातम् ।

नं--

मुहकबरिबन्ध तहे सोह धरहि नं मल्लजुज्झु ससिराहु करहिं ।
तहे सोहहिं कुरल भमरउलतुलिअ नं तिमिरडिंभ खेल्लन्ति मिलिअ ॥
मुखकबरीबन्धौ तस्याः शोभां धरत इव मल्लयुद्धं शशिराहू कुरुतः ।
तस्याः शोभन्ते कुरला भ्रमरकुलतुलिता इव तिमिरडिम्भाः क्रीडन्ति मिलित्वा ॥

नइ—

रविअत्थमणसमाउलें कंठट्ठिअ न छिन्नु ।
चक्कें खण्डु मुणालिअहे नइ जीवग्गलु दिन्नु ॥
रव्यस्तमनसमाकुलेन कण्ठस्थितो न च्छिन्नः ।
चक्रेण खण्डो मृणालिकाया इव जम्बार्गलो दत्तः ॥

नावइ--

पेक्खीविणु जिणवरहं अदीरहधणसलोणु ।
नावइ गरुमच्छहरिउ जलणि पवीसइ लोणु ॥
दृष्ट्वा जिनवराणामदीर्घधनसलावण्यम् ।
इव गुरुमत्स्यहरितं ज्वलने प्रविशति लवणम् ॥

नाइ--

वलआवलिनिवडणवलआ धणी उद्धभुअ जाइ ।
वल्लहविरहधूमह अस्स गाहप्पण गवेसइ नाइ ॥
वलयावलिनिपतनवलया धन्या उर्ध्वभुजा याति ।
वल्लभविरहधूमादस्य गाधत्वं गवेषयत इव ॥

तणेणतेसिंतेसितेहिंकेहिं तादर्थ्ये ॥ २५ ॥

अपभ्रंशे तादर्थ्ये द्योत्ये तणेण तेसिं तेसि तेहिं केहिं इति पञ्च निपाताः प्रयोक्तव्याः । रामतणेण, रामतेसिं, रामतेसि, रामतेहिं, रामकेहिं णमोक्कारो रामार्थं नमस्कारः ।

ढोल्ला एह परिहासडी अइ भन कवणहिं देसि ।

हउं झिज्जउं तउकेहिं पिअ तुहुं पुणु अन्नहितेसि ॥
विट ! एतां परिहासिकामयि भण कस्मै न ददासि ।
अहं क्षीये तवार्थे प्रिय ! त्वं पुनरन्यस्यार्थे ॥
वड्डत्तणहोतणेण महत्त्वस्यार्थे । एवं तेहिंतेसिमावुदाहार्यौ ॥

स्वार्थे डुः पुनर्विनाध्रुवमः ॥ २६ ॥

अपभ्रंशे पुनः विना ध्रुवम् इत्येतेभ्यः परः स्वार्थे डित् उप्रत्ययो भवति । पुणु होइ पुनर्भवः । पावु बिनु पापं विना । धुवु जम्मु ध्रुवं जन्म ।

सुमरिज्जइ तं वल्लहउं जं वीसरइ मणाउ ।
जहिं पुणु सुमरणु जाउं गउ तहो नेहहो काइं नाउ ॥
स्मर्यते तद्वल्लभं यद्विस्मरति मनाक् ।
यस्मिन् पुनः स्मरणं यावद्गतं तस्य स्नेहस्य किं नाम ॥
चंचलु जीविउ धुवु मरणु पिअ रूसिज्जइ काइं ।
होसइं दिअहा रूसणा दिव्वइं वरिससआइं ॥
चञ्चलं जीवितं ध्रुवं मरणं प्रिय ! रुष्यते कथम् ।
भविष्यन्ति दिवसा रोषणस्य दिव्यानि वर्षशतानि ॥

डेंडाववश्यमः ॥ २७ ॥

स्वार्थ इत्यनुवर्तते । अपभ्रंशे अवश्यमः परौ एं अ इत्येतौ डितौ प्रत्ययौ भवतः । अवसें, अवस अवश्यम् ।

जिब्भिन्दिउ नायउं वसि करहु जसु अधिन्नइं अन्नइं ।
मूलि विणट्ठइ तुंबिणिहे अवसें सुक्कइं पण्णइं ॥
जिह्वेन्द्रियं नायकं वशे कुरुत यस्याधीनान्यन्यानि ।
मूले विनष्टे तुम्बिन्या अवश्यं शुष्यन्ति पर्णानि ॥
अवस न सुअहिं सुहच्छिअहिं । अवश्यं न स्वपन्ति सुखासिकायाम् ॥

परमेकशसोर्डडि ॥ २८ ॥

अपभ्रंशे परम् एकशस् इत्याभ्यां परौ स्वार्थे डितौ अ इ इत्येतौ यथा-संख्यं भवतः । पर परम् । एक्कसि एकशः ।

उणहिं न संपइ कित्ति पर फल लिहिआ भुञ्जन्ति ।
केसरि न लहइ बोड्डिअवि गय लक्खेहिं घेप्पन्ति ॥

गुणैर्न सम्पत् कीर्तिः परं फलानि लिखितानि भुञ्जते ।
केसरी न लभते कपर्दिकामपि गजा लक्षैर्गृह्यन्ते ॥
एक्कसि सीलकलंकिअहं देज्जहिं पच्छित्ताइं ।
जो पुणु खण्डइ अणुदिअहु तसु पच्छित्तें काइं ॥
एकशः शीलकलङ्कितानां दीयन्ते प्रायश्चित्तानि(१) ।
यः पुनः खण्डयत्यनुदिवसं तस्य पश्चात्तापेन(२) किम् ॥

अडडडुल्लाः स्वार्थिककलुक् च ॥ २९ ॥

अपभ्रंशे नामतः परतः अ इति अड उल्ल इत्येतौ च डितौ प्रत्ययौ भवतः, तत्संनियोगेन स्वार्थिकस्य कप्रत्ययस्य लोपश्च । बलउ, बलडु, बलुल्लु बलम् ।

विरहानलजालकरालिअउ पहिउ पन्थि जं दिट्ठउ ।
तं मेलवि सव्वहिं पन्थिअहिं सोजि किअउ अग्गिट्ठउ ॥
विरहानलज्वालाकरालितः पथिकः पथि यद् दृष्टः ।
तन्मिलित्वा सर्वैः पान्थैः स एव कृतोऽग्निष्ठः ॥
महु कंतहो बे दोसडा हेल्लि म झङ्खहि आलु ।
देन्तहो हउं पर उव्वरिअ जुज्झन्तहो करवालु ॥
मम कान्तस्य द्वौ दोषौ हे सखि ! मा जल्पाऽनर्थकम् ।
ददतोऽहं परमुद्धरिता युध्यमानस्य करवालम् ॥

एक्क कुडुल्ली पञ्चहिं रुद्धी । एका कुटी पञ्चभी रुद्धा ॥

तद्योगजाश्च ॥ ३० ॥

अपभ्रंशे अडडडुल्लानां योगभेदेभ्यो ये जायन्ते अडडुल्लअडुल्लड इत्यादयः प्रत्ययाः तेऽपि स्वार्थे प्रायो भवन्ति । अड-

फोडेन्ति जे हिअडउं अप्पणउं ताहं पराई कवण घिणु ।
रक्खेज्जउ तरुणहो अप्पणा बालहे जाया विसम थणु ॥
स्फोटयन्ति ये हृदयमात्मीयं तेषां परकीया का घृणा ।
रक्षयतां तरुणा ! आत्मानं बालाया जातौ विषमौ स्तनौ ॥

डुल्लअ—चूडुल्लअउ चुण्णीहोसइ । चूडा चूर्णीभविष्यति ।

---

(१) पश्चात्तापाः—क० । (२) प्रायश्चित्तेन—ख० ।

डुल्लइ–देक्खिअ बाहुबलुल्लडउ मुचइ नीसासं । दृष्ट्वा बाहुबलं मुञ्चति निःश्वासम् । एवं बाहुबलुल्ल इत्यादि ॥

डीतः स्त्रियाम् ॥ ३१ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्न इतः प्राक्तनसूत्रद्वयविहितप्रत्ययान्तात् परो ङीप्रत्ययो भवति ।

वहिआ दिट्ठा गोरडी तुट्ठा मग्गु निअंत ।
अंसुसाए कं चूआ ? तोतुवाण करन्त ॥
दृष्टा दृष्टा गौरी तुष्टा मार्गं पश्यन्ती ।
अश्रूच्छ्वासैः कं चकन्ति ? मितशुष्कं कुर्वती ॥

अदन्तात् डा ॥ ३२ ॥

अपभ्रंशे अडडडुल्लानां मध्ये यः अकारान्तः प्रत्ययः तदन्तान्नाम्नः स्त्रियां वर्तमानात् डाप्रत्ययो भवति । ड्यपवादः ।

पिउ आअगउ पत्तडिझुणि कण्णइ पइट्ठ ।
तहो विरहहो नासत्तहो धूलडिआवि न दिट्ठ ॥
प्रिय आगतः पत्रध्वनिः कर्णौ प्रविष्टः ।
तस्य विरहस्य नश्यतो धूलिरपि न दृष्टा ॥

इदतोऽति ॥ ३३ ॥

अपभ्रंशे स्त्रियां वर्तमानस्य नाम्नो योऽकारस्तस्य अति अकारे प्रत्यये परे इकारो भवति । धूलडिआवि न दिट्ठ । स्त्रियामित्येव–झुणि कण्णइ पइट्ठ ॥

इदानीमेव्वहि ॥ ३४ ॥

अपभ्रंशे इदानीमः स्थाने एव्वहि इति भवति । एव्वहि होइ । इदानीं भवतु

हरि नच्चावउ पंगणइ विम्हइ पाडिउ लोउ ।
एव्वहि राहपओहरहं जं भावइ तं होउ ॥
हरिर्नर्तितः प्राङ्गणे विस्मये पातितो लोकः ।
इदानीं राधापयोधरयोर्यद्भविता तद्भवतु ॥

एव जि ॥ ३५ ॥

अपभ्रंशे एवशब्दस्थाने जि इति भवति। रामु जि र
जाउ म जंतउ पल्लवह देक्खउं कइ पय देइ।
हिअइ तिरिच्छी हउं जि पर पिउ डम्बरइं करे
यातु मा यातं पल्लवत पश्यामि कति पदानि द
हृदये तिर्यग्भूताऽहमेव परं प्रियो डम्बराणि क

एवमेम ॥ ३६ ॥

एवम्—इत्यव्यये एम इति भवति। एम राम कुणइ
पियसंगमि कउ निद्दडी पिअहो परोक्खहो केम
मइ बेन्निवि विन्नासिअ निद्द न एम न तेम ॥
प्रियसङ्गमे कुतो निद्रा प्रियस्य परोक्षस्य कथम्
मया द्वे अपि नाशिते निद्रा नैवं न तथा ॥

नहि नाहि ॥ ३७ ॥

नहि इत्यव्ययं नाहि इति भवति। नाहि धम्मु नहि ध
एत्तहे मेह पिअन्ति जलु एत्तहे वडवाणलु आ
पेक्खु गहीरिम साअरहो एक्कवि कणिअ नाहि
इतो मेघाः पिबन्ति जलमितो वडवानल आवर्त
पश्य गभीरत्वं सागरस्य एकापि कणिका नहि

प्रत्युत पच्छलिउ ॥ ३८ ॥

प्रत्युत इत्यव्ययं पच्छलिउ इति भवति। पच्छलिउ स
सावसलोणी गोरडी नवखी कवि विसगंठि।
भडु पच्छलिउ सो मरइ जासु न लग्गइ कंठि।
सर्वस्वलावण्या गौरी नवीना कापि विषग्रन्थिः
भटः प्रत्युत स म्रियते यस्य न लगति कण्ठे॥
ग्रन्थिरित्यत्र 'लिङ्गमतन्त्र'मिति सूत्रात् स्त्रीलिङ्गता॥

एवमेव एमइ ॥ ३९ ॥

एवमेव इत्यव्ययम् एमइ इति भवति। एमइ लोगु ए

अंगहिं अंग न मिलिउ अहरे अहरु न पत्तु ।
पिअ जोअन्तिहे मुहकवँलु एमइ सुरउ समत्तु ॥
अङ्गैरङ्गं न मिलितं सखि ! अधरेणाऽधरो न प्राप्तः ।
प्रियस्य पश्यन्त्या मुखकमलमेवमेव सुरतं समाप्तम् ॥

समं समाणु ॥ ४० ॥

समम्-इत्यव्ययं समाणु इति भवति । रामाण समाणु । रामेण समम् ।

कंतु जं सीहहो उवमिअइ तं महु खण्डिउ माणु ।
सीहु अरक्खअ गअ हणइ पिउ पयरक्ख समाणु ॥
कान्तो यत् सिंहस्योपमीयते तन्मम खण्डितो मानः ।
सिंहोऽरक्षकान् गजान् हन्ति प्रियः पदरक्षैः समम् ॥

किल किर ॥ ४१ ॥

अपभ्रंशे किल इत्यव्ययं किर भवति । न किर खाइ । न किल खादति ।

न किर खाइ न पिअइ न विद्दवइ धम्मि न वेच्चइ रूअडउ ।
इह किवणु न जाणइ जह जमहो खणेण पहुच्चइ दूअडउ ॥
न किल खादति न पिबति न विद्रवति धर्मे न व्ययति रूपकम् ।
इह कृपणो न जानाति यथा यमस्य क्षणेन पर्याप्नोति दूतः ॥

पग्गिमप्राइमप्राउप्राइव प्रायसः ॥ ४२ ॥

प्रायस्—इत्यव्ययम् अपभ्रंशे पग्गिम प्राइम प्राउ प्राइव इति चतुर्धा प्रयोज्यम् । पग्गिम चवलु । प्रायश्चपलः इत्यादि ।

एसी पिउ रूसेसु हउं रुट्ठी मइं अणुणेइ ।
पग्गिम एइ मणोरहइं दुक्करु दइउ करेइ ॥
एष्यति प्रियो रुष्याम्यहं रुष्टां मामनुनयति ।
प्राय एतान्मनोरथान् दुष्करान् दैवं करोति ॥
प्राइव मुणिहवि भंतडी ते मणिअडा गणन्ति ।
अक्खइ निरामइ परमपइ अज्जवि पउ न लहन्ति ॥
प्रायो मुनीनामपि भ्रान्तिः ते मणीन् गणयन्ति ।
अक्षये निरामये परमपदेऽद्यापि पदं न लभन्ते ॥

अन्ने ते दीहर लोअण अन्नु तं भुअजुअलु ।
अन्नु सु घण थणहारु तं अन्नु जि मुहकमलु ।।
अन्ये ते दीर्घे लोचने अन्यत्तद्भुजयुगलम् ।
अन्यः स घनः स्तनभारः तदन्यदेव मुखकमलम् ।।
अन्न सु केसकलापु सु अन्नजि प्राउ विहि ।
जेण णिअंबिणि घडिअ सुगुणलाअण्णणिहि ।।
अन्यः स केशकलापः सोऽन्य एव प्रायो विधिः ।
येन नितम्बिनी घटिता स गुणलावण्यनिधिः ।।
अंसुजलें प्राइव गोरिअहे सहि उव्वत्ता नअणसर ।
तें संमुह संपेसिआ देन्ति तिरिच्छी घत्त पर ।।
अश्रुजलेन प्रायो गौर्याः सखि ! उद्वान्ते नयनसरसी ।
ते सम्मुखे संप्रेषिते ददतस्तिर्यग्घातं परम् ।।

दिवा दिवे ।। ४३ ।।

दिवा इत्यव्ययं दिवे इति भवति । दिव दिवे गंगण्हाणु । दिवा दिवा गङ्गास्नानम् ।।

सह सहुं ।। ४४ ।।

सह इत्यव्ययं सहुं इति भवति ।

जइ पवसन्ते सहु न गयअ न मुअ विओएँ तस्सु ।
लज्जिज्जइ संदेहसडा दिन्तेहिं सुहअजणस्सु ।।
यदि प्रसवता सह न गता न मृता वियोगेन तस्य ।
लज्जते सन्देशान् ददतीभिस्सुभगजनस्य ।।

मा मं ।। ४५ ।।

मा इत्यव्ययं मं इति भवति । मं धणि करहि विसाउ । मा धन्ये ! कुरु विषादम् । प्रायोग्रहणात्—

माणि पणट्ठइ जइ न तणु तो देसडा चइज्ज ।
मा दुज्जणकरपल्लवेहिं दीसिज्जन्तु भमेज्ज ।।
माने प्रणष्टे यदि न तनुः ततो देशान् त्यजेत् ।

मा दुर्जनकरपल्लवैर्दृश्यमानो भ्रमेत् ॥

कुतः कउकहुतिहु ॥ ४६ ॥

अपभ्रंशे कुत इत्यव्ययं कउ कहु तिहु इति च भवति। कउ गदु, कहु तिहु गदु । कुतो गतः ।

महु कंतहो गुट्ठट्ठिअहो कउ झुम्पडा वलन्ति ।
अह रिउरुहिरे उल्लवइ अह अप्पणेन भन्ति ॥
मम कान्तस्य गोष्ठस्थितस्य कुतः कुटीरकानि ज्वलन्ति ।
अथ रिपुरुधिरेण विध्मापयत्यथात्मीयेन न भ्रान्तिः ॥

धुमु कहु तिहु उट्ठिअओ । धूमः कुतः कुत उत्थितः ॥

अथवामनागहवइमणाउं ॥ ४७ ॥

अथवा मनाक् इत्येतौ अहवइ मणाउं इति भवतः। अहवइ ण सुहं ताहु । वा न सुखं तासाम् । किंपि मणाउं मह पिअस्स। किमपि मनाङ् **प्रियस्य** ।

जाइज्जइ तहिं देसडइ लब्भइ पिअहो पमाणु ।
जइ आवइ तो आणिअइ अहवइ तं जि निवाणु ॥
गम्यते तत्र देशे लभ्यते प्रियस्य प्रमाणम् ।
यद्यागच्छति तत आनीयतेऽथवा तदेव निर्वाणम् ॥
विहवि पणट्ठइ वंकडउ रिद्धी जणसामन्नु ।
किंपि मणाउं महु पिअहो ससि अणुहरइ न अन्नु ॥
विभवे प्रनष्टे वक्रः ऋद्धौ जनसामान्यः ।
किमपि मनाङ् मम प्रियस्य शशी अनुहरति नान्यः ॥

इतसेत्तहे ॥ ४८ ॥

तस् इत्यव्ययम् एत्तहे इति भवति । एत्तहे मेह पिअन्ति जलु । इतो **पेबन्ति** जलम् ॥

पश्चात्पच्छइ ॥ ४९ ॥

पभ्रंशे पश्चादित्यव्ययं पच्छइ इति भवति । पच्छइ होइ विहाणु। पश्चा- **विभातम्** ॥

ततस्तदा तो ॥ ५० ॥

ततस् तदा इत्येतौ तो इति भवतः। तो गदु। ततो गतस्तदा गतो वा।

जइ भग्गा पारक्कडा तो सहि मज्झु पिएण।
अह भग्गा अम्हहंतणा तो तें मारिअडेण॥
यदि भग्नाः परकीयास्ततः सखि! मम प्रियेण।
अथ भग्ना अस्मदीयास्तदा तेन मारितेन॥

त्वनुसाहावन्यथासर्वौ ॥ ५१ ॥

अन्यथा सर्व इत्येतौ अनु साह इति यथासंख्यं तु भवतः। अनु कदु। अन्यथा कृतम्।

विरहानलजालकरालिअउ पहिउ कोवि बुड्डिवि ठिअओ।
अनु सिसिरकालि सीअलजलु धुमु कहँ तिहु उट्ठिअओ॥
विरहानलज्वालाकरालितः पथिकः कोऽपि निमज्य स्थितः।
अन्यथा शिशिरकाले शीतलजलाद्धूमः कथं कुत उत्थितः॥

पक्षे—अन्नहा साहुवि लोउ तडप्फडइ। अन्यथा साधुरपि तडफडायते (ताम्यति)॥

किं काइंकवणौ ॥ ५२ ॥

अपभ्रंशे किंशब्दः काइं कवण इत्यादशौ आपद्यते।

जइ सु न आवइ दूइ घरु काइं अहोमुहु तुज्झु।
वअणु जु खण्डइ तउ सहि एसो पिउ होइ न मज्झु॥
यदि स नायाति दूति! गृहं किमधोमुखं तव।
वचनं यः खण्डयति तव सखि! एष प्रियो भवति न मम॥

काइं न दूरे पेक्खइ। किं न दूरे पश्यसि? ताहं पराइं कवण घिणु। तेषां परकीया का घृणा।

उन्नविच्छवुत्ता विषण्णवर्त्मोक्ताः ॥ ५३ ॥

विषण्ण वर्त्म उक्त इत्येते उन्न विच्छ वुत्त इति यथासंख्यं भवन्ति।

मइं वुत्तउं तुहुं धुरु धरहि कसरेहिं विगुत्ताइं।

पइं विणु धवल न चडइ भरु एमइ उन्नउ काइं ॥
मयोक्तं त्वं धुरं बिभृहि कसरैर्विगोपितः ।
त्वया विना धवल ! न चटति भर एवमेव विषण्णः किम् ॥
जं मणुविच्छि न माइ । यन्मनोवर्त्मनि न माति ॥

अत् खुः परस्परस्य ॥ ५४ ॥

अपभ्रंशे परस्परशब्दस्य खुः आदिः अद्भवति ।

ते मुग्गडा हराविआ जे परिविट्ठा ताहं ।
अवरोप्परु जोअंताहं सामिउ गंजिउ जाहं ॥
ते मुद्रा हारिता ये परिवेष्टितास्तेषाम् ।
परस्परं पश्यतां(१) स्वामी परिभूतो(२) येषाम् ॥

अन्यादृशस्याण्णाइसावराइसौ ॥ ५५ ॥

अपभ्रंशे अन्यादृशस्य अन्नाइस अवराइस इत्यादेशौ भवतः। अण्णाइसु । अवराइसु ॥

बहिल्लगाः शीघ्रादीनाम् ॥ ५६ ॥

अपभ्रंशे शीघ्रादीनां बहिल्लादय आदेशाः प्रायो भवन्ति । शीघ्रस्य बहिल्लः—

एक्कु कइअहवि न आवही अन्नु बहिल्लउ जाहि ।
मइं मित्तडा प्रमाणिअउ पइं जेहउ खलु नाहि ॥
एकं कदाचिदपि नायासि अन्यत् शीघ्रं यासि ।
मया मित्र ! प्रमाणितस्त्वया यादृशः खलो नहि ॥

अस्मिन् गणे कस्य किं भवति ? तथाहि, झकटकस्य घग्घलः—

जिम सुपुरिस तिम घग्घलइं जिम नइ तिम वलणाइं ।
जिम डोंगर तिम कोट्टरइं हिआ विसूरहि काइं ॥
यथा सुपुरुषास्तथा झकटका यथा नद्यस्तथा वलनानि ।
यथा पर्वतास्तथा कोटराणि हृदय ! खिद्यसे कथम् ॥

---

(१) युध्यतां—मु० पु० । (२) गञ्जितो—मु० पु० ।

रम्यस्य रवराणः—

सरिहिं न सरेहिं न सखरेहिं नवि उज्जाणवणेहिं ।
देस रवरणा होन्ति वढ निवसन्तेहिं सुअणेहिं ।।
सरिद्भिर्न सरोभिर्न सरोवरैर्नाप्युद्यानवनैः ।
देशा रम्या भवन्ति मूढ ! निवसद्भिः सुजनैः ।।

यद्यद् दृष्टं तत्तदित्यस्य जाइट्ठिआ—

अह रच्चसि जाइट्ठिअए हिअडा मुद्धसहाव ।
लोहें फुट्टणएण जिम घणा सहेसहि ताव ।।
अथ रज्यसि यद्यद् दृष्टं तत्तत् हृदय ! मुग्धस्वभाव ! ।
लोहेन स्फुटता यथा घनः सहिष्यते तापः ।।

पृथक्पृथगित्यस्य अंजुअः—

एक कुडुल्ली पञ्चहिं रुद्धी तहं पञ्चहंवि जुअंजुअ बुद्धिइ ।
बहिणुए तं घरु कहि किंव नन्दउ जेत्थ कुडुंबउं अप्पणच्छंदइ ।।
एक कुटी पञ्चभी रुद्धा तेषां पञ्चानामपि पृथक्पृथग्बुद्धिः ।
भगिनि ! तद् गृहं कथय कथं नन्दतु यत्र कुटुम्बकमात्मच्छन्दकम् ।।

भयस्य द्रवक्कः(१)—

दिवेहिं विढत्तउं खाहि वढ संचि म एक्कुवि द्रम्मु ।
कोवि द्रवक्कउ सो पडइ जेण समप्पइ जम्मु ।।
देवैरर्जितं खादय मूढ ! संचिनु मा एकमपि द्रम्मम् ।
किमपि भयं तत्पतति येन समाप्यते जन्म ।।

मा भैषीरित्यस्य स्त्रीवत् मब्भिसडी—

सत्थावत्थहं आलवणु साहुवि लोउ करेइ ।
आदन्नहं मब्भिसडी जो सज्जणु सो देइ ।।
स्वस्थावस्थानामालपनं सर्वोऽपि लोकः करोति ।
आर्तानां मा भैषीर्यः सज्जनः स ददाति ।।

अवस्कन्दस्य दडवडः—

चलेहिं चलन्तेहिं लोअणेहिं जे तइं दिट्ठा बालि ।

---

(१) डवंक—इति ख० ।

तहिँ मअरद्धअदडवडउ पडइ अपूरइ कालि ॥
चलैश्चलद्भिर्लोचनैर्ये त्वया दृष्टा बाले ! ।
तेषु मकरध्वजावस्कन्दाः पतन्त्यपूर्णे काले ॥

आत्मीयस्य अप्पणः—

फोडेन्ति जे हिअडउं अप्पणउं । स्फोटयन्ति ये हृदयमात्मनः ॥

गाढस्य निच्चट्टः—

विहवे कस्सु थिरत्तणउं जोव्वणि कस्सु मरट्टु ।
सो लेखडउ पठाविअउ जो लग्गइ निच्चट्टु ॥
विभवे कस्य स्थिरत्वं यौवने कस्य गर्वः ।
स लेखः प्रस्थाप्यते यो लगति गाढम् ॥

क्रीडायाः खेड्डः—

खेड्डअ कयमम्हेहिं निच्छयं किं पयम्पह ।
अणुरत्ताउ भत्ताउ अम्हे मा चअ सामिअ ॥
क्रीडा कृतास्माभिर्निश्चयं किं प्रवदथ ।
अनुरक्तान् भक्तानस्मान् मा त्यज स्वामिन् ! ॥

असाधारणस्य असड्ढलः—

कहिँ ससहरु कहिँ मअरहरु कहिँ बरिहिणु कहिँ मेहु ।
दूरठिआहंवि सज्जणहं होइ असड्ढलु नेहु ॥
कुत्र शशधरः कुत्र मकरगृहं कुत्र बर्हिणः कुत्र मेघः ।
दूरस्थितानामपि सज्जनानां भवत्यसाधारणः स्नेहः ॥

नवस्य नवखी—

नवखी कवि विसगंठि । नवा कापि विषग्रन्थिः ॥

मूढस्य नालिअवढौ—

जो पुणु मणि जि खसिफसिहूअउ चिन्तइ देइ न दम्मु न रूअउ ।
रइवसभमिरु करग्गुल्लालिउ घरहिँ जि कोन्तु गणइ सो नालिउ ॥
यः पुनर्मनस्येव व्याकुलीभूतश्चिन्तयति ददाति न द्रम्मं न रूपकम् ।
रतिवशभ्रमणशीलः कराग्रोल्लालितं गृह एव कुन्तं गणयति स मूढः ॥
दिवेहिँ विढत्तउ खाहि वढ । दैवैरर्जितं खादय मूढ ! ॥

अस्पृश्यसंसर्गस्य विट्टाल:—

जे छड्डेविणु रअणनिहि अप्पउं तडि घल्लन्ति ।
तहं संखहं विट्टालु पर फुक्किज्जन्त भमन्ति ॥
ये मुक्त्वा रत्ननिधिमात्मानं तटे क्षिपन्ति ।
तेषां शङ्खानामस्पृश्यसंसर्गः परं फूत्क्रियमाणा भ्रमन्ति ॥

अद्भुतस्य ढक्करि:—

हिअडा पइं बहु बोल्लिअउ मह्रु अग्गइ सअवार ।
फुट्टिसु पिए पवसन्ति हउं भंडय ढक्करिसार ॥
हृदय ! त्वया बहूक्तं ममाग्रे शतवारम् ।
स्फुटिष्यामि प्रियेण प्रवसताऽहं भण्डयाद्भुतसार ! ॥

कौतुकस्य कोड्ड:—

कुञ्जरु अन्नहं तरुवरहं कोड्डेण घल्लइ हत्थु ।
मणु पुणु एक्कहिं सल्लइहिं जइ पुच्छह परमत्थु ॥
कुञ्जरोऽन्येषु तरुवरेषु कौतुकेन क्षिपति हस्तम् ।
मनः पुनरेकस्यां सल्लक्यां यदि पृच्छथ परमार्थम् ॥

हे सखीत्यस्य हेल्लि:—

हेल्लि म झंखहि आलु देत्थु सु विहिवि न सइ ।
विडअतु गहिमि वि णिरहु विसाउ सव्वइ कड्ढइ ॥
हे सखि ! मा जल्पानर्थकं दृष्ट्वा स विधिरपि नास्ति ।
पीडयतु गृह्णाम्यपि नित्यं विषादं सर्वमाकर्षामि ॥

यदेश्छुड्ड:—

वेस जि छुड्डु अग्घइ ववसाउ ॥
वेश्यैव यदि अर्घति व्यवसायम् ॥

सम्बन्धिन: केरतणौ—

गअउ सु केसरि पिअहु जलु निच्चिन्तइं हरिणाइं ।
जसु केरएं हुंकारडए मुहहुं पडंति तिणाइं ॥
गतः स केसरी पिबत जलं निश्चिन्ता हरिणाः ।
यस्य सम्बन्धिना हुङ्कारेण मुखेभ्यः पतन्ति तृणानि ॥

जइ भग्गा अम्हहंतणा । यदि भग्ना अस्माकं सम्बन्धिनः ॥

दृष्टेर्द्रेहिः—

एकमेक्कउं जइवि पेक्खइ हरि सुट्ठु सव्वाअरेण, तो वि द्रेहि जहिं कहिं वि राही को सक्कइ संवरेवि दड्ढनअणा नेहिं पलुट्टा ।

एकैकं यद्यपि पश्यति हरिः सुष्ठु सर्वादरेण, ततोऽपि दृष्टिर्यत्र कुत्रापि राधा, कः शक्नोति संवरितुं दग्धनयने स्नेहेन पर्यस्ते । इत्यादि ॥

हुहुरुघिग्घिगाः शब्दचेष्टानुकृत्योः ॥ ५७ ॥

अपभ्रंशे हुहुर्वादयः शब्दानुकरणे घिग्दयादयश्चेष्टानुकरणे यथासंख्यं प्रयोक्तव्याः ।

मइं जाणिउं बुड्डीसु हउं पेमद्रहि हुहुरुत्ति ।
णवरि अचिन्तिअ संपडिय विप्पिय नवि झडत्ति ॥
मया ज्ञातं मज्जिष्याम्यहं प्रेमह्रदे हुहुरु इति ।
केवलमचिन्तिता सम्पत्तिर्विप्रिया नापि झटिति ॥

आदिग्रहणात्—

खज्जइ न कसरक्केहिं पिज्जइ न घुंटेहिं ।
एमइ होइ सुहच्छडी पिए दिट्ठे नअणेहिं ॥
खाद्यते न कसरत्कैः पीयते न घुण्टैः ।
एवमेव भवति सुखास्या प्रिये दृष्टे नयनाभ्याम् ॥

इति शब्दानुकरणम् ।

अज्जुवि नाहु महुज्जि घरि सिद्धत्था वंदेइ ।
ताउंजि विरहु गवक्खेहिं मक्कडुघिग्घिउ देइ ॥
अद्यापि नाथो ममैव गृहे सिद्धार्थान् वन्दते ।
तावदेव विरहो गवाक्षेभ्यो मर्कटविभीषिकां ददाति ॥

आदिग्रहणात्—

सिरि जर खंडी लोअडी गलि मणियडा न वीस ।
तोवि गोट्ठडा कराविआ मुद्धए उट्ठ बईस ॥
शिरसि जरा खण्डिता लोमपुटी गले, मणयो न विंशतिः ।

ततोऽपि गोष्ठाः कारिता मुग्धया ऽत्तिष्ठोपविश ॥

इति चेष्टानुकरणमित्यादि ॥

अनर्थका घइमादयः ॥ ५८ ॥

अपभ्रंशे घइं इत्यादयो निपाता अनर्थकाः प्रयुज्यन्ते ।

पेम्मडि पच्छायावडा पिउ कलहिअउ विआलि ।
घइं विवरीडी बुद्धडी होइ विणासहो कालि ॥
प्रेम्णि पश्चात्तापः प्रियः कलहायितो विकाले ।
विपरीता बुद्धिर्भवति विनाशस्य काले ॥

आदिग्रहणात् खाइं—इत्यादि ॥

इति श्रीत्रिविक्रमकृतप्राकृतव्याकरणवृत्तौ तृतीयाध्यायस्य तृतीयः पादः ॥

---

(१)प्राकृतं, शौरसेनी, मागधी, पैशाची, चूलिकापैशाची, अपभ्रंश इति षड् भाषाः, आसामित्थङ्कारं शेषातिदेशः-शौरसेनीशेषं प्राकृतवत्, मागधीशेषं शौरसेनीवत्, पैशाचीशेषमपि शौरसेनीवत्, चूलिकापैशाचीशेषं पैशाचीवत्, अपभ्रंशे तु प्रायः शौरसेनीवत् कार्यं ; लिङ्गातन्त्रता च, शेषं प्राकृतवत्। शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं, ततोऽन्यत् प्राकृतवदेव भवति । 'दिहौ मिथस्से'-इत्यारभ्य 'दस्तस्य शौरसेन्यामखावचोऽस्तो'रिति सूत्रात् प्राग् यानि सूत्राणि, तेषु यान्युदाहरणानि तान्येव शौरसेन्यां भवन्तीति विभागः प्रतिसूत्रमभ्यूह्य दर्शनीयः ॥

दिहौ सुपि ॥ १ ॥

अपभ्रंश इत्यनुवर्तते । अपभ्रंशे सुपि परे नाम्नोऽन्त्यस्य स्वरस्य दिहौ दीर्घह्रस्वौ प्रायो भवतः । रामु, रामू, रामः । सौ—

ढाल्ला सावला धण चंपअवण्णी ।
णाइ सुवण्णरेह कसवट्टइ दिण्णी ॥
विटः श्यामलो धन्या चम्पकवर्णी ।
इव सुवर्णरेखा कषपट्टे दत्ता ॥

---

(१) 'प्राकृतं'—इत्यारभ्य 'दर्शनीयः'—इत्यन्तं नास्ति ख० पुस्तके ।

आमन्त्र्ये—

ढोल्ला मइं तुहुं वारिआ मा करु दीहा माणु ।
णिद्दए गमिही रत्तडी दडवड होइ विहाणु ॥
हे विट ! मया त्वं वारितो मा कुरु दीर्घं मानम् ।
निद्रया गमिष्यति रात्रिः शीघ्रं भवति प्रभातम् ॥

स्त्रियाम्—

बिट्टीए मइ भणिय तुहुं मा करु वङ्की दिट्ठि ।
पुत्ति सकण्णी भल्लि जिम मारइ हिअइ वइट्ठि ।
हे शिशो ! मया भणिता त्वं मा कुरु वक्रां दृष्टिम् ।
पुत्रि ! सकर्णा भल्लिर्यथा मारयति हृदये प्रविष्टा ॥

जसि—

एइ ति घोडा एह थली एइ ति निसिआ खग्ग ।
एत्थु, मुणिसिम जाणीअइ जेणवि वालइ वग्ग ॥
एते ते घोटका एषा स्थली एते ते निशिताः खड्गाः ।
अत्र मनुष्यत्वं ज्ञायते येनापि वालयति वल्गा ॥

एवं विभक्त्यन्तरेष्वप्युदाहार्यम् ॥

स्वम्यत उत ॥ २ ॥

अपभ्रंशे स्वमोः परयोरुकारो भवति । रामु । घडु । पडु ।

दहमुहु भुवणभअंकरु तोसिअसंकरु णिग्गउ रहवरि चडिअउ ।
चउमुहु छम्मुहु झाइवि एक्कहिं लाइविणावइ दइवें वडिअउ ॥
दशमुखो भुवनभयङ्करस्तोषितशङ्करो निर्गतो रथोपरि आरूढः ।
चतुर्मुखं षण्मुखं ध्यात्वापि एकत्र लगित्वेव दैवेन घटितः ॥

ओत् सौ पुंसि तु ॥ ३ ॥

अपभ्रंशे पुंसि वर्तमानस्य नाम्नोऽकारस्य सौ परे ओत्वं वा भवति । रामो । घडो । पडो ।

अगलिअनेहनिवट्टाहं जोअणलक्खुवि जाउ ।
वरिससएणवि जो मिलइ सहि सो सोक्खहं ठाउ ॥

अगलितस्नेहनिवृत्तानां योजनलक्षमपि यातु ।
वर्षशतेनापि यो मिलति सखि ! स सौख्यानां स्थानम् ॥

पुंसीति किम् ?

अंगहिं अंगु न मिलिउ हलि अहरे अहरु न पत्तु ।
पिअ जोअंतिहे मुहकमलु एमहि सुरउ समत्तु ॥
अङ्गैरङ्गं न मिलितं सखि ! अधरेणाऽधरो न प्राप्तः ।
प्रियस्य पश्यन्त्या मुखकमलमेवमेव सुरतं समाप्तम् ॥

ए भिसि ॥ ४ ॥

अपभ्रंशे अकारस्य भिसि परे एत्वं तु भवति । रामेहिं । घडेहिं ।

गुणहिं न संपइकित्ति पर फल लिहिआ भुंजंति ।
केसरि न लहइ वोड्डिअवि गअ लक्खेहिं घेप्पंति ॥
गुणैर्न सम्पत्कीर्तिः परं फलानि लिखितानि भुञ्जते ।
केसरी न लभते कपर्दिकामपि गजा लक्षैर्गृह्यन्ते ॥

टि ॥ ५ ॥

अपभ्रंशे अतः टावचने परे एकारो भवति । पृथग्योगान्न विकल्पः । रामेण । घडेण ।

जे महु दिण्णा दिअहडा दइएं पवसन्तेण ।
ताण गणंतिए अंगुलिउ जज्जरिआउ नहेण ॥
ये मम दत्ता दिवसा दयितेन प्रवसता ।
तान् गणयन्त्या अङ्गुल्यो जर्जरिता नखेन ॥

ङिनेच्च ॥ ६ ॥

अपभ्रंशे अकारस्य ङिना सह इकार एकारश्च भवति । रामि, रामे । घडि, घडे ।

साअरु उप्परि तणु धरइ तलि घल्लइ रयणाइं ।
सामि सुभिच्चुवि परिहरइ संमाणेइ खलाइं ॥
सागर उपरि तृणानि धरति तले क्षिपति रत्नानि ।
स्वामी सद्भृत्यमपि परिहरति सम्मानयति खलान् ॥

ङसेर्हेहु ॥ ७ ॥

अत इति पञ्चम्यन्तविपरिणामः । अपभ्रंशे अकारात् परस्य ङसेः हे हु इत्यादेशौ भवतः ।

वच्छहे गेण्हइ फलाइं जणु कडु पल्लव वज्जेइ ।
तोवि महद्दुमु सुअणु जिम ते उच्छंगि करेइ ॥
वृक्षाद् गृह्णाति फलानि जनः कटून् पल्लवान् वर्जयति ।
ततोऽपि महाद्रुमः सुजनो यथा तानुत्सङ्गे करोति ॥

वच्छहु गेण्हइ । वृक्षाद् गृह्णाति ॥

भ्यसो हुं ॥ ८ ॥

अपभ्रंशे अकारात् परस्य भ्यसः पञ्चमीबहुवचनस्य हुं इत्यादेशो भवति ।

दुरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ ।
जिह गिरिसिंगहुं पडिअ सिल अनुवि चूरु करेइ ॥
दुरोड्डानेन पतितः खल आत्मानं जनं मारयति ।
यथा गिरिश्रृङ्गेभ्यः पतिता शिलान्यदपि चूर्णं करोति ॥

सुस्सुहो ङसः ॥ ९ ॥

अपभ्रंशे अतः परस्य ङसः सु स्सु हो इति त्रय आदेशा भवन्ति । रामसु, रामासु । रामस्सु । रामहो, रामाहो ।

जो गुण गोवइ अप्पणा पअडा करइ परस्सु ।
तसु हउं कलिजुगि दुल्लहहो बलि किज्जउं सुअणस्सु ॥
यो गुणान् गोपायत्यात्मनः प्रकटान् करोति परस्य ।
तस्याहं कलियुगे दुर्लभस्य बलिं करोमि सुजनस्य ॥

आमो हं ॥ १० ॥

अपभ्रंशे अकारात् परस्य आमः हं इत्यादेशो भवति ।

तणहं तइज्जी भंगि नवि तें अवडयडि वसंति ।
अह जणु लग्गिवि उत्तरइ अह सह सइं मज्जंति ॥
तृणानां तृतीया भङ्गिर्नापि तेनावटतटे वसन्ति ।

अथ जनो लगित्वा उत्तरति अथ सह स्वयं मज्जन्ति ॥

टो णानुस्वारौ ॥ ११ ॥

अपभ्रंशे अतः परस्य टावचनस्य णत्वमनुस्वारश्च भवतः। दइएं पवसन्तेण। दयितेन प्रवसता ॥

एं चेदुतः ॥ १२ ॥

अपभ्रंशे इकारादुकाराच्च परस्य टावचनस्य एं इति, चकारात् णानुस्वारौ च भवन्ति। एं--

अग्गिएं उगहउ होइ जग वाएं सीअलु तेवं।
जो पुणु अग्गिएं सीअला तसु उगहत्तणु केवं ॥
अग्निनोष्णं भवति जगद् वातेन शीतलं तथा।
यः पुनरग्निना शीतलस्तस्योष्णत्वं कथम् ॥

णानुस्वारौ-

विप्पिअआरउ जइवि पिउ तोवि तं आणहि अज्जु।
अग्गिण दड्ढा जइवि घरु तो तें अग्गि कज्जु ॥
विप्रियकारको यद्यपि प्रियस्तथापि तमानयाद्य।
अग्निना दग्धं यद्यपि गृहं ततस्तेनाऽग्निना कार्यम् ॥

एवमुकारान्तादप्युदाहार्यम् ॥

हिहे ङिङस्योः ॥ १३ ॥

अपभ्रंशे इदुद्भ्यां परयोः ङि ङसि इत्येतयोः हि हे इत्यादेशौ क्रमेण भवतः। ङेर्हि—

अह विरलपहाउ जि कलिहि धम्मु। अथ विरलप्रभाव एव कलौ धर्मः ॥

ङसेर्हे—

गिरिहे सिलायलु तरुहे फलु घेप्पइ नीसावन्नु।
घरु मेल्लेप्पिणु माणुसहं तोवि न रुच्चइ रन्नु ॥
गिरेः शिलातलं तरोः फलं गृह्णाति निस्सामान्यम्।
गृहं मुक्त्वा मानुषाणां तथापि न रोचतेऽरण्यम् ॥

हुं भ्यसः ॥ १४ ॥

इदुतः परस्य भ्यसः हुं इत्यादेशो भवति ।

तरुहुंवि वक्कलु फलु मुणिवि परिहणु असणु लहंति ।
सामिहुं एत्तिउं अग्गलउं आअरु भिच्चु गृहन्ति ॥
तरुभ्योऽपि वल्कलं फलं मुनयोऽपि परिधानमशनं लभन्ते ।
स्वामिभ्य एतावदर्गलमादरं भृत्या गृह्णन्ति ॥

आमो हं च ॥ १५ ॥

अपभ्रंशे इदुद्भ्यां परस्य आमो हं इति, चकारात् हुं इति चादेशौ भवतः ।

दइवु घडावइ वणि तरुहुं सउणिहं पक्कफलाइं ।
सो वरि सुक्खु पइट्ठ णवि कण्णहिं खलवअणाइं ॥
दैवं घटयति वने तरूणां शकुनीनां पक्कफलानि ।
तद् वरं सौख्यं, प्रविष्टानि किन्तु कर्णयोः खलवचनानि ॥

प्रायोग्रहणात् कचित् सुपोऽपि हुं—

धवलु विसूरइ सामिअहो गरुआ भरु पिक्खेवि ।
हउं किं न जुत्तउ दुहुं दिसिहिं खण्डइं दोण्णि करेवि ॥
धवलो विषीदति स्वामिनो गुरुं भारं प्रेक्ष्य ।
अहं किं न योजितो द्वयोर्दिशोः खण्डे द्वे कृत्वा ॥

ङसो लुक् ॥ १६ ॥

अपभ्रंशे ङसः षष्ठीविभक्तेः प्रायो लुक् भवति । राम । रामा । रामस्य रामाणां वा ।

